ॐ तत्सद्ब्रह्मणे नमः ।

सत्याषाढविरचितं श्रौतसूत्रम् ।

(धर्मसूत्रापरपर्यायं षड्विंशसप्तविंशप्रश्नद्वयात्मकम्) ।

महादेवदीक्षितविरचितोज्ज्वलाव्याख्यासमेतम् ।

अथ षड्विंशप्रश्नप्रारम्भः ।

तत्र प्रथमः पटलः ।

हिरण्यकेशिनं नत्वा गणेशं च गुरुं तथा ।
प्रश्नयोर्धर्मसंज्ञानां लिख्यते वृत्तिरुज्ज्वला ॥

अथातः सामयाचारिकान्धर्मान्व्याख्यास्यामः ॥ १ ॥

अथशब्द आनन्तर्यार्थोऽधिकारार्थो वा । अतःशब्दो *हेत्वर्थः । समयाचारप्राप्ताः +सामयाचारिकास्तान् ॥ १ ॥

---

* हेत्वर्थ इति—आचान्तेन कर्तव्यम्, यज्ञोपवीतिना कर्तव्यम् । 'संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु' अशुचिकरनिर्वेषः 'द्विजातिकर्मभ्यो हानिः पतनम्,' इत्यादिवचनाद्यस्मादुक्तानि श्रौतानि गार्ह्याणि कर्माणि ब्रह्महत्यादिप्रायश्चित्तानि च वक्ष्यमाणान्धर्मानपेक्षन्ते तस्मात्सामयाचारिकान्धर्मान् व्याख्यास्यामः कथयाम इति योजनयेत्यर्थः । + समयो नाम श्रुत्याद्यर्थविचारप्रवृत्तपुरुषकृतव्यवस्थोच्यते । सा च विधिनियमनिषेधभेदात्त्रिविधा । तत्र प्रवृत्तिप्रयोजनको विधिः । यथा संध्योश्च बहिर्ग्रामादासनम्, अहरहः संध्यामुपासीतेत्यादिः । निवृत्तिप्रयोजनकौ नियमनिषेधौ । तत्र प्राङ्मुखोऽन्नानि भुञ्जीतेत्यादिर्नियमः । क्षुदुपहन्तुं हि भोजने प्रवृत्तिः । तत्र यत्किंचिद्दिगभिमुखोऽपि भूत्वा भोजनेन क्षुत्प्रतिघातं कर्तुं शक्नोति नरः । एवं सति यत्प्राङ्मुखोऽन्नानि भुञ्जीतेत्युच्यते तेन नियमः क्रियते । प्राङ्मुख एव भूत्वाऽन्नानि भुञ्जीत नेतरदिगभिमुख इति । परिसंख्या तु नियमस्यैव क्रियताऽप्यंशेन भेदो बोध्यः । न कलञ्जं भक्षयेत्, न सुरां पिबेत्, नानृतं वदेत्, इत्यादिर्निषेधः । सोऽनृतवदनादिभ्यः पुरुषं निवारयतीति । तादृशसमयमूला आचाराः समयाचाराः । समयाचारेषु भवाः सामयाचारिकाः । एवंभूतान्धर्मानित्यर्थः । कर्मजन्यान्यभ्युदयनिःश्रेयसनिदानभूतानि पण्डापूर्वाणि धर्मा इति मीमांसकाः केचिद्वदन्ति । चोदनालक्षणोऽर्थो धर्म इति तु परे । धर्मपदं चाधर्मस्याप्युपलक्षणम् । अधर्मपरित्यागेन स्वविरोधिनोऽभावात्संचितधर्महानिसंभवप्रतिबन्धद्वाराऽधर्मस्यापि धर्मोपयोगित्वादित्यर्थः । धर्माधर्मलक्षणं सामान्यमुखेन विश्वामित्र आह—यमार्याः क्रियमाणं तु शंसन्त्यागमवेदिनः । स धर्मो यं विगर्हन्ते तमधर्मं प्रचक्षते ॥ इति । विधिषु विधिविषयानुष्ठानाद्धर्म इति तावत्सर्वसंमतम् । नियमनिषेधयोरपि नियमनअर्थानुष्ठानाद्धर्म इति केचिद्वदन्ति । अन्ये तु विधिविषयानुष्ठानादेव धर्मो न तु नियमनिषेधानुष्ठानात् । नियमनिषेधेषु हि तद्विपरीतानुष्ठानादधर्म एव केवलं न क्रियानपि कश्चिदपि धर्मः । न ह्यप्रतिगृह्णन्नपिबन्वा सुरां धार्मिक इति लोके प्रसिद्धमिति वदन्ति ।

समयशब्दं स्वयं व्याचष्टे–

धर्मज्ञसमयः ॥ २ ॥

धर्मज्ञाः* ऋष्यादयः ॥ २ ॥

तेषां तत्र प्रमाणं किमत आह–

=प्रमाणं वेदाः ॥ ३ ॥

अस्मिन्नर्थे वेदाः प्रमाणम् ॥ ३ ॥

चत्वारो वर्णा ब्राह्मणक्षत्रियवैश्यशूद्राः ॥ ४ ॥

ब्राह्मणाद्याश्चत्वारो वर्णाः सामयाचारिकैर्धर्मैरधिक्रियन्ते । चतुर्णामेवोपदेशेऽपि पुनश्चतुर्ग्रहणं यथाकथंचित्तेष्वन्तर्भूतानामपि ग्रहणार्थम् । ततश्च ब्राह्मणः क्षत्रियो वैश्य इति बोधायनादिभिरुक्तानामनुलोमजानामत्र ग्रहणं मतम् । तथा च गौतमः प्रतिलोमानामेवानधिकारमाह—प्रतिलोमा धर्महीना इति ॥ ४ ॥

तेषां पूर्वः पूर्वो जन्मतः श्रेयान् ॥ ५ ॥

जन्मत इति हेतुवचनात्सद्वृत्तादपि शूद्राद्वैश्यब्रुवोऽपि श्रेयान् । एवं वैश्यात्क्षत्रियः । क्षत्रियाद्ब्राह्मणः ॥ ५ ॥

---

* धर्मज्ञा इति । ते च यथा—तेषामन्वङ्गिरोव्यासगोतमात्र्युशनोयमाः । वसिष्ठदक्षसंवर्तशातातपपराशराः ॥ विष्णवापस्तम्बहारीताः शङ्खः कात्यायनो गुरुः । प्रचेता नारदो योगी बौधायनपितामहौ ॥ सुमन्तुः कश्यपो बभ्रुः पैठीनो व्याघ्र एव च । सत्यव्रतो भरद्वाजो गार्ग्यः कार्ष्णाजिनिस्तथा । जाबालिर्जमदग्निश्च लौगाक्षिर्ब्रह्मसंभवः इति धर्मप्रणेतारः षट्त्रिंशदृषयः स्मृताः । इति । ननु येऽत्र परिगणितास्तावन्त एव धर्मज्ञा उतान्येऽपि सन्ति । सन्तीत्याह । तथा चाङ्गिराः—जाबालिर्नाचिकेतश्च स्कन्दो लौगाक्षिकाश्यपौ । व्यासः सनत्कुमारश्च शंतनुर्जनकस्तथा ॥ व्याघ्रः कात्यायनश्चैव जातूकर्ण्यः कपिंजलः । बौधायनः कणादश्च विश्वामित्रस्तथैव च । उपस्मृतय इत्येताः प्रवदन्ति मनीषिणः । इत्युक्तेः । तस्मात्पूर्वोक्तं न परिसंख्यानं किंतूदाहरणप्रदर्शनमात्रमिति बोध्यम् ।

= ननु कथं पुनरिदमवगम्यते यन्मन्वादय एव धर्मज्ञा न बुद्धादय इति । यदि च बुद्धादीमतीन्द्रियेऽर्थे धर्मे ज्ञानं न संभवतीत्युच्यते तर्हि मन्वादिष्वप्यतीन्द्रियार्थज्ञानासंभवः केन दण्डनिवारितः । अथ मन्वादीनां धर्मजादतिशयादतीन्द्रियेऽपि ज्ञानं युज्यत इति चेद्बुद्धादिष्वपि तत्समानम् । यदुक्तम्—सुगतो यदि सर्वज्ञः कपिलो नेति का प्रमा । तावुभौ यदि सर्वज्ञौ मतिभेदः कथं तयोरिति । तस्मान्मन्वादीनां धर्मज्ञत्वे प्रमाणमाह—प्रमाणं वेदा इति । चोऽवधारणे । वेद एव मूलप्रमाणं धर्माधर्मयोः । नहि नित्येषु निर्दोषेषु वेदेषूक्तोपालम्भः संभवति । तस्मात्स्वतःप्रमाणस्य शब्दस्य न वक्तृदोषनिबन्धनमप्रामाण्यम् । तदिह्वासादादीनां धर्मज्ञसमयः प्रमाणम् । धर्मज्ञानां तु वेदाः प्रमाणम् । मनुरप्याह—वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् । आचारश्चैव साधूनामात्मनस्तुष्टिरेव च । इति । यद्यपि धर्ममूलभूतोऽप्रत्यक्षो वेदोऽस्मदादिभिर्नोपलभ्यते तथाऽपि मन्वादय उपलब्धवन्त इत्यनुमीयते । वक्ष्यति च—तेषामुत्सन्नाः पाठाः प्रयोगादनुमीयन्ते (स० धर्म २६ । १२ । १) इति ।

अशूद्राणामदुष्टकर्मणामुपनयो वेदाध्ययनमग्न्याधेयं फलवन्ति च कर्माणि ॥ ॥ ६ ॥

शूद्रवर्जितानां त्रयाणां वर्णानामदुष्टकर्मणामुपनयादयो धर्माः । उपनय उपनयनम् । माणवकेनाऽऽत्मनः समीपं नय आगमनमिति यावत् । इ(द्विजा)तिकर्माध्ययनवत्कर्मत्वात् । अध्ययनस्य योग्यत्वात् । नात्र त्रैवर्णिकानामुपनयादि विधीयते । प्राप्तत्वात् । नापि शूद्राणां प्रतितिषिध्यते । प्राप्त्यभावात् । तथाहि—उपनयनं तावद्गृह्ये सप्तवर्षं ब्राह्मणमित्यादिना त्रैवर्णिकानामेव विहितम् । इहापि तथैव विधास्यते । अध्ययनमप्युपेतस्याऽऽचार्यकुले ब्रह्मचारिवास इत्यारभ्य विधानादनुपेतस्य शूद्रस्याप्राप्तमेव । किंच श्मशानवच्छूद्रपतितावित्यनध्यायप्रकरणे वक्ष्यते । ततश्च यस्य समीपेऽपि नाध्येयं स कथं स्वयमध्येतुमर्हति । अग्न्याधेयमिति । वसन्ते ब्राह्मणमित्यादिना त्रैवर्णिकानामेव विहितम् । फलवन्ति चाग्निहोत्रादीनि कर्माणि च त्रयाणामेव वर्णानामित्युक्तत्वात्त्रैवर्णिकानामेव नियतानि । विद्याग्न्यभावाच्च शूद्राणामप्रसक्तानि । उक्तो विद्याग्न्यभावः । तस्माद्दुष्टकर्मप्रतिषेधार्थं सूत्रम् । तथा स्मृत्यन्तरे द्विजातिकर्मभ्यो हानिः पतनमिति । पतनं पतनकरं कर्म द्विजातिकर्मभ्यो हानिकारं विश्लेषकरम् । द्विजातिकर्मसु न पतितस्याधिकार इति यावत् । एवमुपनयनादिप्रतिषेधादसत्यत्र प्रतिषेधे तु दुष्टकर्मणामप्यधिकारो भवत्येव । फलवन्ति च कर्माणीत्यभिधानात्फलेप्सुना क्रियत इति कर्मेति वचनात् । चकारान्नित्यान्यपि । अथवा कर्मभिर्निःश्रेयसमित्युक्तत्वान्निःश्रेयसार्थत्वान्नित्येष्वपि प्राप्तिः । फलवद्ग्रहणं पूर्वेषामुपनयनादीनामङ्ग[त्व]लाभादि(र्थम्)। तेन चकारः समुच्चयार्थ इत्यर्थः । यदपि प्रागुपनयनात्कामचारवादभक्ष इति गौतमस्मरणं तदपि ब्रह्महत्यादिमहापातकव्यतिरिक्तविषयमित्यनुपेतस्यापि दुष्टकर्मत्वसंभवाददुष्टकर्मणामुपनयादिकमित्युक्तम् । शूद्रप्रतिषेधस्तु नित्यप्राप्तानुवादः ॥ ६ ॥

एवं च यथा ब्राह्मणादीनामुपनयनादयो धर्माः प्रधानभूतास्तादृशं शूद्रस्य धर्ममाह—

शुश्रूषा शूद्रस्येतरेषां वर्णानाम् ॥ ७ ॥

इतरेषां ब्राह्मणादीनां या शुश्रूषा सा शूद्रस्य परमो धर्मः ॥ ७ ॥

तत्र विशेषः—

पूर्वस्मिन्पूर्वस्मिन् वर्णे निःश्रेयसं भूयः ॥ ८ ॥

शुश्रूषेत्यनुवृत्तिः । सर्वप्रकारं कृताया अपि वैश्यशुश्रूषाया मात्रयाऽपि कृता क्षत्रियशुश्रूषा बहुतरं फलं साधयति । एवं क्षत्रियशुश्रूषाया अपि ब्राह्मणशुश्रूषा । निःश्रेयसं निःश्रेयससाधनमतिशयेन जनयति । एषा नित्यकर्मत्वेनोक्ता प्रधानभूता ॥ ८ ॥

उपनयनं वेदाध्ययनमित्यादि यदुक्तमस्मिन्क्रम उपनयने विशेषमाह—

उपनयनं विद्यार्थस्य श्रुतितः संस्कारः ॥ ९ ॥

विद्या अर्थः प्रयोजनं यस्य स विद्यार्थः । तस्यायं श्रुतिविहितः संस्कारः । उपनयनमाचार्यसमीपे गमनं पूर्ववत् । विद्यार्थस्येति वचनान्मूकादेर्न संभवति । तथा च शङ्खलिखितौ—नोन्मत्तमूकान्संस्कुर्यादिति । विद्यार्थस्येति विधेयकर्तृलिङ्गस्य विवक्षितत्वात्स्त्रिया अपि न भवति । यद्यपि तस्या अग्ने गृहपत इत्यादिकया विद्ययाऽर्थस्तथाऽपि तस्या अनुपनीताया एवाऽऽधानात्पूर्वमेवाध्ययनं भवेत् । यावदुपयुक्तं मन्त्रजातये(मि)ति । श्रुतित इति वचनं तदतिक्रमे श्रौतातिक्रमप्रायश्चित्तं कर्तव्यं व्रात्यस्तोमाद्यपीति दर्शयितुम् । उपनयनस्य शाट्यायनिकश्रुतौ सेतिकर्तव्यताकस्य दृष्टस्योपनयनं व्याख्यास्यामः । जातत्वादिश्रौतभाष्यकारादिनिश्चि(श्चे)तुं स्मर्तुं निवेशः स्मार्तप्रकृतित्वात् (?) ॥ ९ ॥

अनेकवेदाध्यायिनां वेदव्रतवदुपनयनमपि प्रतिवेदं भेदेन कर्तव्यमिति प्राप्त उच्यते—

सर्वेभ्यो वै वेदेभ्यः सावित्र्यनूच्यत इति हि ब्राह्मणम् ॥१०॥

वेदेभ्य इति पञ्चमी । उद्धृत्येत्यर्थः । चतुर्थी वा तादर्थ्ये ।
त्रिभ्य एव तु वेदेभ्यः पादं पादमदूदुहत् ।
तदित्यृचोऽस्याः सावित्र्याः परमेष्ठी प्रजापतिः ॥ इति मनुः ।

अदूदुहदिति पृथक्कृतवान् । वेदार्थ एवात्रानूच्यत इति सिद्धानुवादाद्विधिः । ततश्चोपनयने यत्सावित्र्या अनुवाचनं तन्मुखेन सर्वे वेदा अनूक्ता भवन्तीत्यगृह्यमाणविशेषत्वादेकमेवोपनयनं सर्वार्थमिति न्यायः । अस्मिन्नर्थे शाट्यायनब्राह्मणमेव पठितम् । अथर्वणस्य वेदस्य पृथगुपनयनं वचनात्कर्तव्यम् । तथा च तत्रैव श्रुतं—नान्यत्र संस्कृतो भृग्वङ्गिरसोऽधियीतेति । अन्यत्रान्यवेदार्थं भृग्वङ्गिरसोऽथर्वणो विद्वानेवोपनेताऽभिगम्यत इति विधातुं निन्दामाह—तमसो वा एष तमः प्रविशति यमविद्वानुपनयते यश्चाविद्वानिति हि ब्राह्मणम् । यथा कश्चित्तमसः सकाशात्तम एव प्रविष्टो न किंचिज्जानात्येवमेवैषं माणवकमविद्वानुपनयते तथा यश्चाविद्वान् ‘ उपनयते ’ इत्यपेक्षते । यश्च स्वयमविद्वान्सन्नुपनयते सोऽपि तमस एव तमः प्रविशतीत्यस्मिन्नर्थे ब्राह्मणं भवति ॥ १० ॥

कीदृशस्तर्ह्युपनेताऽभिगम्यस्तत्राऽऽह—

तस्मिन्नभिजनविद्यासमुदेतꣳ समाहितꣳ सꣳस्कर्तारमिच्छेत् ॥ ११ ॥

अविच्छिन्नवेदवेदिसंबन्धे कुले जन्माभिजनम् । अभिजनं विद्यां च सम्यगात्तं भूतगतं प्राप्तम् । कर्तरि(क्तः) । गत्यर्थाकर्मकेति सूत्रात् । षड्भिरङ्गैः सह यथावदर्थज्ञानपर्यन्तमधीतवेदविद्याः । पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिता वेदाः । तासां सर्वासामसंभवे वेद एव वा । तस्मिन्नुपनयने कर्तव्ये ताभ्यामभिजनविद्याभ्यां समुदेतं संपन्नम् । समाहितं

विहितप्रतिषिद्धेष्ववहितमनसं संस्कर्तारमाचार्यमिच्छेत्। इच्छया करणं लक्ष्यते । आप्नुयादधिगच्छेदिति ॥ ११ ॥

तस्मिंश्चैव विद्याकर्माऽऽन्तमविप्रतिपन्ने धर्मेभ्यः ॥ १२ ॥

तस्मिन्नेव चोपनेतरि विद्याकर्म विद्याग्रहणं कर्तव्यमारम्भादासमाप्तेः । अविप्रतिपन्ने धर्मेभ्यः । यद्यसावाचार्यो धर्मेभ्यः प्रच्युतो न भवति । प्रच्युते तु तस्मिन्नसंपर्कार्हेऽन्यतोऽपि विद्याकर्म भवत्येव । आचार्यान्तराद्भवतीति *द्रष्टव्यम् ॥ १२ ॥

आचार्यशब्दनिर्वचनमाह —

यस्माद्धर्मानाचिनोति स आचार्यः ॥ १३ ॥

यस्मात्पुरुषान्माणवको धर्मानाचिनोति आत्मनः प्रति चिनोति शिक्षते स आचार्यः । अप्यक्षरसाम्यान्निर्ब्रूयादिति चकारमात्रेणेदं निर्वचनम् । अनेन प्रकारेण माणवकमाचार्यः शौचाचारांश्च शिक्षयेदित्युक्तं भवति ॥ १३ ॥

तस्मै न द्रुह्येत्कदाचन ॥ १४ ॥

तस्मा एवं भूतायाऽऽचार्याय कदाचन कदाचिदपि न द्रुह्येत् । तद्विषयमपकारं च न कुर्यात् ॥ १४ ॥

कस्मादित्याह—

स हि विद्यातस्तं जनयति ॥ १५ ॥

स ह्याचार्यो माणवकं विद्यातो जनयति । यथा पिता मातृतः । अत्रास्य माता सावित्री पिता तु आचार्य इत्युच्यत इति शास्त्रान्तरम् । तथा मातुरग्रे प्रजायेत द्वितीयं मौञ्जिबन्धनादिति । इदमेव द्विजातिशब्दप्रवृत्तिनिमित्तम् ॥ १५ ॥

तच्छ्रेष्ठं जन्म ॥ १६ ॥

तद्विद्यातो जन्म श्रेष्ठं प्रशस्ततमम् । अभ्युदयनिःश्रेयसहेतुत्वात् ॥ १६ ॥

मातापितृभ्यामाचार्यः श्रेष्ठ इत्याह—

शरीरमेव मातापितरौ जनयतः ॥ १७ ॥

मातापितरौ हि शरीरमात्रमेव काष्ठकुड्यसमं जनयतः । आचार्यस्तु सर्वपुरुषार्थक्षमं रूपं जनयतीति । आचार्यः श्रेष्ठो गुरूणामिति च गौतमः ॥ १७ ॥

---

* द्रष्टव्यमिति । येषां चाऽऽचार्यकरणविधिप्रयुक्तमध्ययनं तेषामेतन्नोपपद्यते । कथम् उपनीयाध्यापनेनाऽऽचार्यकं भावयेदिति । सकृदुपनीतस्य माणवकस्य न पुनरुपनयनसंस्कारः संभवति । तत्कथमन्योऽध्यापयेदेनम् । एतेन मध्ये आचार्यमरणे माणवकस्य तदनन्तरमध्ययनं नाऽऽचार्यान्तरात्संभवतीति द्रष्टव्यम् ।

तथाऽऽचार्यः श्रेष्ठतर इत्युक्तं तस्मै न द्रुह्येदिति च यदुक्तं तत्र वेदं प्रमाणयति श्लोकरूपम्—

अथाप्युदाहरन्ति य आतृणत्त्यवितथेन कर्मणा-
दुःखं कुर्वन्नमृतꣳ संप्रयच्छꣳस्तं मन्येत पितरं
मातरं च तस्मै न द्रुह्येत्कतमश्चनाहेति ॥ १८ ॥

अथाप्यत्रापि पठन्ति य आचार्योऽवितथेन सफलेन कर्मणा माणवकं योजयति कर्माऽऽचाराध्ययनादि तस्मै शिक्षयति तदवितथम् । पितरौ केवलं तत्तच्छिक्षयतः । यदा शिक्षयतः प्रातरेव भोक्तव्यं वासो भूषादि धार्यमिति तद्भोगमात्रेण क्षीयतेऽतो वितथम् । किंच तावात्मनः सुखमेतत्काले संपादयते न तथाऽऽचार्यः । आचार्य आत्मनेऽतिप्रयासजन्यं दुःखं संपादयंस्तस्मा अमृततुल्यं परमाहितमिहामुत्र च तत्कर्मफलं ददत्कर्मणा योजयति तमेव पितरं मातरमुपदेष्टारं स्निग्धहितं मन्येत । अत एव तस्मै न द्रुह्येत् कतमश्चनैहिकमामुष्मिकं वा हितं जानानः । अहेत्यव्ययं छान्दसो वा दीर्घः । निश्चितमित्यर्थः ॥ १८ ॥

इदानीमविद्वांसमुपनयनमात्रज्ञं संस्कर्तारं संस्कृतं च निन्दति प्रतिषेधकल्पनाय—

तमसो वा एष तमः प्रविशति यमविद्वानुपनयते
यश्चाविद्वानिति विज्ञायते ॥ १९ ॥

वेदमजानानो यं माणवकमुपनयते माणवकोऽविद्वान्य उपनेता(यः) स च तमसः पापकर्मणः सकाशात् पापफलं दुःखाख्यं तमो मोहकरत्वं प्रविशति प्राप्नोति । माणवको ह्यज्ञाननिरासाय विद्यार्थसंस्कारमपेक्षते सोऽवेदविदुषा कृतस्तदा तेन निषिद्धेन संस्कारेण न संस्क्रियते नापि विद्यां प्राप्नोतीति । तथोपनेताऽपीह लाभपूजाख्यादिकं न प्राप्नोति । लोकनिन्दितेन कर्मणा दुःखं च प्राप्नोतीति विज्ञायते श्रुतिरित्यर्थः ॥ १९ ॥

एवं संस्कारकसंस्कार्यौ व्याख्याय त्रयाणामेव कालं व्याचष्टे—

वसन्ते ब्राह्मणमुपनयीत ग्रीष्मे राजन्यꣳ शरदि वैश्यम् ॥ २० ॥

प्राप्ताधिकारोऽत्रोपनेयादिर्ग्राह्य इति व्याख्येयम् । वसन्ते ब्राह्मणमित्यादि गृह्ये गतम् ॥ २० ॥

गर्भाष्टमेषु ब्राह्मणं गर्भैकादशे राजन्यं गर्भद्वाद-
शेषु वैश्यम् ॥ २१ ॥

गर्भस्थस्य यः कालो वर्षं सोऽपि गर्भस्तस्मादष्टमं वर्षपूरणं येषां तानि तेषूपनयनम् । नायमपूर्वविधिः किंतु सप्तवर्षमित्यादिगृह्यवद्व्याख्या । बहुवचनं कन्यानामपि तेष्वन्तर्भावार्थम् ॥ २१ ॥

अथ काम्यानि ॥ २२ ॥

कामनिमित्तान्युपनयनानि वक्ष्यन्ते ॥ २२ ॥

सप्तम आयुष्काममष्टमे ब्रह्मवर्चसकामं नवमे तेजस्कामं दशमेऽन्नाद्यकाममेकादश इन्द्रियकामं द्वादशे पशुकामम् ॥ २३ ॥

एतानि षट् सूत्राणि स्पष्टार्थानि । सर्वत्रोपनयेदित्यपेक्षते ॥ २३ ॥

आचार्याधीनः स्यादित्यादीनि यानि ब्रह्मचारिणो व्रतानि वक्ष्यन्ते तेष्वसमर्थानां कुमाराणां वर्णक्रमेणानुकल्पानाह—

आ षोडशाद्ब्राह्मणस्यानात्यय आ द्वाविंशात्क्षत्रियस्याऽऽ चतुर्विꣳशाद्वैश्यस्य ॥ २४ ॥

येषां त्वाचार्यकरणविधिप्रयुक्तमध्ययनं तेषामेतन्नोपपद्यते । उपनीयाध्यापनेनाऽऽचार्यत्वं भवति । न च सकृदुपनीतस्य माणवकस्य पुनरुपनयनसंस्कारः संभवति । तत्कथमन्योऽध्यापयेत् । एतेनाध्येष्यमाणस्य माणवकस्य तदन्तमध्ययनं स्यात् । अज्ञेन कृतस्य संस्कारस्य कृतत्वाद्वैगुण्यं प्रायश्चित्तेन परिहार्यम् । अत्र वसन्तादिविधानं गृह्ये कृतमपि पुनः क्रियते तत्तु स्मार्यते । गर्भाष्टमेष्वित्यादिविषयः । यदन्यैरष्टमे ब्राह्मणमित्युच्यते तत्तु गर्भान्तेन सप्तमे इति यदुक्तं तेन विकल्प्यते । यच्च स्मृत्यन्तरात्क्षत्रियवैश्ययोर्गर्भैकादशद्वादशयोः श्रवणं तत्तु गृह्योक्तेन विकल्प्यते । न्यूनत्वात् । किंचात्र सप्तमीबहुवचनेन पूरणप्रत्ययेनायमर्थः—गर्भादष्टमं वर्षमेकादशं द्वादशं च तेषु सत्स्वेवेत्ययं नियम आचार्यस्येष्टस्तेनावशब्देनाऽऽनन्तर्यवाचिना च काम्येषु पूर्वतने नियमे सतीत्येव काम्यानि नत्वशक्तविषयेऽङ्गीकृतो गौणोऽपि कालः फलाङ्गमिति । तेन गर्भसप्तमे ब्राह्मणं ब्रह्मवर्चसकामस्य गर्भाष्टमेनाऽऽह—नवम इत्यादि । क्षत्रिये त्वेकादशमभिव्याप्येत्येव तस्य न पशुकामस्योपनयनं गर्भाष्टम इत्यनुवर्तते । अग्रेऽपि गर्भद्वादशेषु गर्भाद्वादशेषु ये गर्भाष्टमान्तास्तेषु क्षत्रियवैश्ययोर्ब्रह्मवर्चसकामः पारलौकिकः । अवश्यं चैतदङ्गीकार्यम् । कुतः । इदं तावत्प्रयोजनं गृह्यात्पुनरुक्तिपरिहारः । तथा च विशिष्टविधिना च फलार्थविधेर्विरुद्धत्रिकद्वयापत्त्या वाजपेयाधिकरणे निराकृतत्वात् । अथ गोदोहनवद्विधिः प्रकृतोपनयन एव । स किं गृह्यात्प्राप्तो न भवति । तत्र सप्तवर्षाद्युत्पत्तिशिष्टगुणावरोधाद्विरुद्धाष्टवर्षादिगुणविधिः फलार्थो न संभवति । स एवाऽऽचार्येण स्वीकृ[illegible] । तत्र वसन्तादिगुणविधयः शाट्यायनकात् । अथ शाखान्तरीयोऽत्र वसन्ते ब्राह्मणमित्यादिविशिष्टस्तत्र विरोधो नास्तीति चेत् तर्हि तत्रावशब्दमधिकारार्थं व्यर्थमप्यङ्गीकृत्याष्टवर्षादिव्याख्यानं नित्यमेव स्यात् । तथा च ब्राह्मणस्याष्टमादप्यकाम्यान्यपर्यो-

रष्टममारभ्येति प्राप्ताच्छास्त्रान्तरात्प्राप्तकालविधिः स्वीकार्यो वा पूर्वोक्त एव वा पक्षः स्वीकार्यः। गृह्ये सप्तवर्षव्याख्यानार्थमुत्तरयोरेकादशद्वादशविकल्पितगर्भैकादशद्वादशविधिर्न भवत्येव बहुवचनवैयर्थ्यादित्यलमति प्रसङ्गेन । गृह्ये सप्तवर्षादिविशिष्टः कर्तारमुपगच्छेदिति विशिष्टविधिर्वसन्तादिगुणविधिस्तत्र काम्यविधिनामसंभवाद्वसन्तादिव्यतिरिक्तेनासंभवाद्गुणविधिर्न । तदर्थमाह—वसन्तादिविशिष्टविधिरत्र तथैतस्मिन्यदि काम्यगुणविधिस्तदाऽपि वसन्तादिर्व्यभिचारी । यदा तु गर्भाष्टमेष्वित्यादिना काम्यविधिस्तदाऽसावत्रत्येन वसन्तादिना त्वविशिष्ट इत्युदगयनादिकालेऽपि भवति । भवति च गृह्योक्तवसन्तादावपीति विकल्पः । गृह्य उत्पत्तिविशिष्टत्वेन वसन्तादिविधानाच्छास्त्रान्तरेणोदगयनादिना नित्योपनयनमपि विकल्प्यते । अत्रत्यं न विकल्पते । आकारोऽभिविधौ । अत्ययोऽतिक्रमः । स एवात्ययः । तदभावोऽनात्ययः । यादृच्छिको दीर्घः । आङो वा प्रयोगः । प्रकरणादुपनयनस्येति गम्यते ॥ २४ ॥

यथा व्रतेषु समर्थः स्याद्यानि वक्ष्यामः ॥ २५ ॥

यथा व्रतेषु समर्थः स्यात्तथा एतावान्कालः प्रतीक्ष्यः । पूर्वमेव तु सामर्थ्ये सत्यष्टवर्षव्यतिक्रमे वक्ष्यमाणप्रायश्चित्तमेव भवति । एवं षोडशादिभ्य ऊर्ध्वं कियन्तंचित्कालमसमर्थानां पश्चात्सामर्थ्ये सति प्रायश्चित्तं भवत्येव ॥ २५ ॥

तदिदं प्रायश्चित्तमाह

अतिक्रान्ते सावित्र्याः काल ऋतुं त्रैविद्यकं ब्रह्मचर्यं चरेत् ॥ २६ ॥

यस्य यः सावित्र्याः कालस्तदतिक्रमे त्रैविद्यकं त्र्यवयवा विद्या तामधीयते त्रैविद्यास्तेषामिदं त्रैविद्यकम् । 'गोत्रचरणाद्वुञ्'[1] 'चरणाद्धर्माम्नाययोरिति वुञ्'[2] । एवं भूतं ब्रह्मचर्यमग्निपरिचर्यामध्ययनं गुरुशुश्रूषामिति परिहाय सकलं ब्रह्मचर्यधर्मं चरेत् । कियन्तं कालम्—ऋतुम् । कालाध्वनोरत्यन्तसंयोग इति द्वितीया । ऋतुमिति वचनादृत्वारम्भे प्रायश्चित्तारम्भमिच्छन्ति ॥ २६ ॥

तत उपनयनम् ॥ २७ ॥

एवंचरितव्रत उपनेतव्यः ॥ २७ ॥

अथोदकोपस्पर्शनम् ॥ २८ ॥

तत उपनयनादारभ्य संवत्सरमुदकोपस्पर्शनं स्नानं कर्तव्यम् । शक्तस्य त्रिषवणमशक्तस्य यथाशक्ति । संवत्सरमित्यापस्तम्बे दर्शनात् ॥ २८ ॥

अथाध्याप्यः ॥ २९ ॥

चरितव्रतः पश्चादध्याप्यः ॥ २९ ॥

---

१ (पा० सू० ४ । ३ । १२६) । २ (पा० सू० २ । ३ । ५) ।

अथ यस्य पिता पितामह इत्यनुपनीतौ स्यातां ते ब्रह्महसꣳस्तुताः ॥ ३० ॥

यस्य माणवकस्य पिता पितामह इत्यनुपनीतौ स्यातां स्वयं च ते तथाविधा माणवका ब्रह्महसंस्तुता ब्रह्महण इत्येवं कीर्तिता ब्रह्मवादिभिः । अतस्तस्मिंस्तच्छब्दप्रयोगस्तद्धर्मप्राप्त्यर्थः । श्मशानवच्छूद्रपतितावित्यध्ययनप्रतिषेधो वक्ष्यते । ततश्च यथा ब्रह्महसमीपे नाध्येयमेवमेषामपीति ॥ ३० ॥

तेषामभ्यागमनं भोजनं विवाहमिति वर्जयेत् ॥ ३१ ॥

तेषामेषामभ्यागमनमाभिमुख्येन गमनं मातृपितृपुत्रदारशरीररक्षणार्थमपि वर्जयेत् । यद्यपि रक्षा सर्वतः प्रग्राह्येति वक्ष्यते, भोजनमुद्य(द्ध)तमपि वर्जयेत् । अपि दुष्कृतकारिण इति सत्यपि वचने विवाहं वर्जयेत् । यद्यपि स्त्रीरत्नं दुष्कुलादपीति मानववचनं च ॥ ३१ ॥

तेषामिच्छतां प्रायश्चित्तम् ॥ ३२ ॥

इच्छतामिति वचनान्न बलात्कारेण प्रायश्चित्तं कारयितव्याः ॥ ३२ ॥

यथा प्रथमेऽतिक्रम ऋतुरेवꣳ संवत्सरम् ॥ ३३ ॥

यथा प्रथमे ब्रह्मचर्यस्य ऋतुः काल एवमस्मिन्नतिक्रमे संवत्सरः कालः । अथोपनयनं तत उदकोपस्पर्शनमिति पूर्ववच्छेषमापस्तम्बदर्शनाच्च ॥ ३३ ॥

प्रतिपूरुषꣳ संख्याय संवत्सरान्यावन्तोऽनुपेताः स्युः ॥ ३४ ॥ (ख० १)

यदि पितैवानुपेतः स्यात्संवत्सरमेकम् । अथ पितामहोऽपि ततो द्वौ । अथ स्वयमपि यथाकालमनुपेतस्ततः संवत्सरानिति ॥ ३४ ॥ (ख० १) ॥

अथोदकोपस्पर्शने मन्त्राः—

सप्तभिः पावमानीभिर्यदन्ति यच्च दूरक इत्येताभिर्यजुष्पवित्रेण सामपवित्रेणाऽऽङ्गिरसेनेति ॥ ३५ ॥

पवमानः सोमो देवता यासां ताः पावमान्यः । यजुष्पवित्रेण आपो अस्मान्मातरः शुन्धयन्तु' इत्येतेन । सामपवित्रेण कया नश्चित्र आभुवदिति तृचेन गीतेन वामदेव्येन साम्ना आङ्गिरसेन हꣳसः शुचिषदित्येतेन । एतैरञ्जलिना शिरस्यपोऽवसिञ्चेत् ॥३५॥

अपि वा व्याहृतिभिरेव ॥ ३६ ॥

पूर्वैः सह व्याहृतीनां विकल्पः ।

अथाध्याप्यः ॥ ३७ ॥

गतम् । अथ यस्य पिता पितामह इत्युपक्रमे यस्येत्येकवचनमन्तेऽपि अथाध्याप्य इति, मध्ये तु ब्रह्महसंस्कुतास्तेषामभ्यागमनं तेषामिच्छतामिति बहुवचनं तत्रोपक्रमोपसंहारानुसारेण माणवकस्यैव प्रायश्चित्तमुपनयनमध्यापनं च । बहुवचनं तु तथाविधमाणवकबहुत्वापेक्षमित्यवोचाम ॥ ३७ ॥

अथ यस्य प्रपितामहादि नानुस्मर्यत उपनयनं ते श्मशानसंस्कृताः ॥ ३८ ॥

प्रपितामहादारभ्य प्रपितामहः पितामहः पिता स्वयं च यथाकालमितिते तथाविधा माणवकाः श्मशानसंस्कृताः । तेन श्मशाने सर्वतः शम्याप्रासादित्यध्ययननिषेध एषामपि संनिधौ भवति ॥ ३८ ॥

तेषामभ्यागमनं भोजनं विवाहमिति वर्जयेत्तेषामिच्छतां प्रायश्चित्तं द्वादश वार्षाणि त्रैविद्यकं ब्रह्मचर्यं चरेत्तत उपनयनमथोदकोपस्पर्शनं पावमानी(न्यादि)भिः ॥ ३९ ॥

गतम् । पावमानी(न्यादि)भिरित्यनेन प्रतिपुरुषं संख्याय संवत्सरानित्येतदपि द्रष्टव्यम् ॥ ३९ ॥

अथ गृहमेधोपदेशनम् ॥ ४० ॥

गृहमेधो गृह्यशास्त्रं गृहस्थस्य धर्मो वा ॥ ४० ॥

नाध्यापनम् ॥ ४१ ॥

कृत्स्नस्य वेदस्य किंतु गृह्यमन्त्राणामेव ॥ ४१ ॥

ततो यो निर्वर्तते तस्य संस्कारो यथा प्रथमेऽतिक्रमे ॥ ४२ ॥

तत एवं कृतप्रायश्चित्ताद्गृहस्थीभूताद्यो निर्वर्तत उत्पद्यते तस्योपनयनसंस्कारः कर्तव्यः । कथं यथा प्रथमेऽतिक्रम ऋतुं त्रैविद्यकं ब्रह्मचर्यं चरित्वेत्यन्तम् ॥ ४२ ॥

तत ऊर्ध्वं प्रकृतिवत् ॥ ४३ ॥

ततस्तु यो निर्वर्तते तस्य प्रकृतिवत् । यथाप्राप्तमुपनयनं कर्तव्यमिति । यस्य पितुरारभ्य नानुस्मर्यत उपनयनं तत्र प्रायश्चित्तं नोक्तं धर्मशास्त्रेस्तूहितव्यम् । निरूपितमुपनयम् ॥ ४३ ॥

अथाध्ययनविधिः—

उपेतस्याऽऽचार्यकुले ब्रह्मचारिणो वासः ॥ ४४ ॥

एवं यथाविध्युपेतस्य ब्रह्मचारिणः संततमाचार्यकुले वासो भवति । ब्रह्म वेदस्तदर्थं व्रतं चरतीति ब्रह्मचारी । अध्ययनाङ्गानि व्रतानि चरितुं नित्यमाचार्यकुले वस्तव्यमिति उक्तं भवति ॥ ४४ ॥

तत्र कालः—

अष्टाचत्वारिंशद्वर्षाणि ॥ ४५ ॥

चतुर्णां वेदानामेषोऽध्ययनकालः । एवं च प्रतिवेदं द्वादश वर्षाणि ॥ ४५ ॥

एषः कालः—

पादोनम् ॥ ४६ ॥

स एव एष कालः पादोनं वा प्रत्येतव्यः । पादेनोनं पादोनम् । प्रकृत्यादित्वात्पादेनेति तृतीया । तद्भवत्षट्त्रिंशद्वर्षाणि । प्रतिवेदं नव नव ॥ ४६ ॥

अर्धोनम् ॥ ४७ ॥

ऊनमित्येव समस्तचतुर्विंशतिर्वर्षाणि । प्रतिवेदं षट् ॥ ४७ ॥

त्रिभिर्वा ॥ ४८ ॥

पादैरूनमिति प्रकरणाद्गम्यते । द्वादश वर्षाणि । प्रतिवेदं त्रीणि ॥ ४८ ॥

द्वादशावरार्ध्यम् ॥ ४९ ॥

अवरार्ध्यशब्दोऽवरमात्रेत्यस्मिन्नर्थे वर्तते । द्वादश वर्षाण्यवरा मात्राऽवरमानं न्यूनमानं यथा भवति तथा ब्रह्मचारिणा गुरुकुले वस्तव्यम् । पूर्वेणैव सिद्धे ब्रह्मचार्यतिमेधावितया चतुरो वेदानितोऽल्पीयसा कालेन गृह्णाति तेनाप्येतावत्कालं गुरुकुले वस्तव्यम् । यावद्ग्रहणमित्यस्मिन्नपि पक्षे नातित्वरितेन स्नातव्यमिति । एवमर्थमिदमारभ्यते । एवमेकस्य वेदस्य ब्रह्मचर्यमवश्यंभावीत्यर्थात्सिद्धम् । गृह्ये षट्त्रिंशत्कालो नोक्तोऽत्र तु द्वादशन्यूनेनोक्तस्तस्माद्विकल्पार्थमेकवाक्यता । मनुरप्याह—

षट्त्रिंशदाब्दिकं चर्यं गुरौ त्रैविद्यकं व्रतम् ।
तद(र्धि)कं पादिकं वा ग्रहणान्तिकमेव वेति ॥

त्रयाणां वेदानां षट्त्रिंशत् । एकैकस्य द्वादश । तदर्धिकं त्रयाणामष्टादश । एकैकस्य षट् । पादिकं वा त्रयाणां नव । एकैकस्य त्रीणि । ग्रहणान्तिकमेवेत्येकैकस्य त्रिभ्य ऊर्ध्वं नियमो न प्रागित्यर्थो द्रष्टव्यः । अन्ये द्वादश द्वादशैकैकवेदार्थे यथाकामं यावद्ग्रहणपक्षोऽपि तुल्यं विकल्पते । अपरे जातपुत्रः कृष्णकेशोऽग्नीनादधीतेति श्रुतिविरोधपरिहारायाष्टाचत्वारिंशतमिति पक्षमाधानानधिकारिणि मन्यन्ते । पक्षान्तराणि तु अधिकारिषु ॥ ४९ ॥

न ब्रह्मचारिणो विद्यार्थस्य परोपवासोऽस्ति ॥ ५० ॥

ब्रह्मचारिविद्यार्थशब्दयोरर्थ उक्तः । यो ब्रह्मचारी विद्यार्थो भवति न तेन दिवसमात्रमपि परस्य समीपे वस्तव्यम् । आचार्यसमीपे वस्तव्यमित्युक्तं भवति । विद्यार्थस्येति वचनान्नैष्ठिकस्य कदाचिदन्यत्र वासेऽपि न दोषः । यद्वा भोजननिवृत्तिरेवोपवासः । परलोकायोपवासः परोपवासः । स विद्यार्थस्य न भवति । नैष्ठिकस्य न दोष इति । अत्र पक्ष आहिताग्निरनड्वानित्यादिविद्यार्थब्रह्मचारिविषयम् ॥ ५० ॥

अथ ब्रह्मचर्यविधिः ॥ ५१ ॥

ब्रह्म वेदस्तदर्थं यद्व्रतं चरितव्यं तद्ब्रह्मचर्यमधिक्रियते ॥ ५१ ॥

आचार्याधीनः स्यादन्यत्र पतनीयेभ्यः ॥ ५२ ॥

आचार्याधीनतया स्थातव्यमिति विधिरनधीयानस्याप्युपनयनानन्तरम् । अन्यत्र पतनीयेभ्य इति विशेषं वक्ष्यामीति पतनीयेभ्य इति कारेण (करणे) कृत्यप्रत्ययः । कृत्यल्युटो बहुलमिति । अस्मदरातिं ब्राह्मणं व्यापादयेत्याचार्येण चोदितोऽप्येवमादि न कुर्यात् ॥ ५२ ॥

हितकारी गुरोरप्रतिलोमयन्वाचा ॥ ५३ ॥

आचार्येण प्रयुक्तोऽप्यप्रयुक्तोऽपि तस्मै हितमेव कुर्यात्, वाचा प्रातिकूल्यमकुर्वन् । अत्र गुरुराचार्यः ॥ ५३ ॥

अधासनशायी ॥ ५४ ॥

आसनमुपवेशनं भावे ल्युट् । शयनं शायः । भावे घञ् । अध आसनशायौ यस्य सोऽधासनशायी । नित्ययोगार्थमिन्प्रत्ययोऽन्यथा बहुव्रीहिणैवालम् । गुरुसंनिधावध आसीताधः शयीतेत्युक्तं भवति । अधः शब्दस्य सवर्णदीर्घश्छान्दसोऽकारलोपश्च । अपपाठो वा । तृणेषु प्रस्तरेषु वाऽऽसनशयने शिष्टाचारसिद्धे ॥ ५४ ॥

नानुदेश्यं भुञ्जीत ॥ ५५ ॥

अनुदेश्यं श्राद्धान्नं देवतार्थं वोद्दिष्टं न भुञ्जीत । अग्रे न दोषो ब्रह्मचार्यर्थत्वेन कल्पितत्वात् ॥ ५५ ॥

तथा क्षारलवणमधुमांसानि ॥ ५६ ॥

न भुञ्जीतेत्येव । क्षारलवणादीनि गृह्ये भोक्तव्यानीति उक्तं तत्फलार्थिनो निषेधो न भोक्तव्यानीति क्षारलवणानाम् । इक्षुविकाराः क्षाराः । लवणानि सामुद्रादीनि ॥ ५६ ॥

अदिवास्वापी ॥ ५७ ॥

दिवा न स्वप्यात् ॥ ५७ ॥

अगन्धसेवी ॥ ५८ ॥

चन्दनादिगन्धद्रव्याणि न सेवेत ॥ ५८ ॥

मैथुनं न चरेत् ॥ ५९ ॥

उपचारः क्रिया केलिः स्पर्शो भूषणवाससाम् ।
एकशय्यासनक्रीडाश्चुम्बनालिङ्गने तथा ॥

इत्यादेः सर्वस्योपलक्षणं मैथुनग्रहणम् ॥ ५९ ॥

उत्सन्नश्लाघः ॥ ६० ॥

श्लाघा शोभा सा उत्सन्ना यस्य स उत्सन्नश्लाघः । एवंभूतो भवेत् । म्रक्षणादिना मुखादिकमुज्ज्वलं न कुर्यादिति ॥ ६० ॥

अङ्गानि न प्रक्षालयीत ॥ ६१ ॥

विना शिरसा मु(सु)खार्थमुष्णोदकादिना शरीरं न प्रक्षालयेत् ॥ ६१ ॥

प्रक्षालयीत त्वशुचिलिप्तानि गुरोरसंदर्शे ॥ ६२ ॥

यानि तु मूत्रपुरीषाद्यशुचिलिप्तानि अङ्गानि तानि मृद्भिः प्रक्षालयेद्यावद्गन्धलेपश्चापैति । तदपि गुरोरसंदर्शे यत्र स्थितो गुरुरमुं न पश्यति तत्र। आचार्यप्रकरणे गुरुग्रहणात् पित्रादीनामपि ग्रहणम् ॥ ६२ ॥

नाप्सु श्लाघमानः स्नायात् ॥ ६३ ॥

स्नाने प्राप्ते न श्लाघमानः स्नायात् । किंतु दण्डवत्प्लवेत् । स्नानीयैर्द्रव्यैर्मलापकर्षणं श्लाघा, क्रीडा वा जले ॥ ६३ ॥

जटिलः शिखाजटो वा स्याद्वापयेदितरान् ॥ ६४ ॥

सर्वकेशानां जटा अथवा शिखामेव जटां कृत्वा इतरान्केशान्वापयेन्नापितेन ॥ ६४ ॥

त्रिवृन्मौञ्जी मेखला ब्राह्मणस्य शक्तिविषये दक्षिणावृत्तानाम् ॥ ६५ ॥

मुञ्जानां विकारो मौञ्जी । त्रिवृत् त्रिगुणा । एवं भूता ब्राह्मणस्य मेखला भवति । सा च शक्तिविषये शक्तौ सत्यां दक्षिणावृत्तानां कर्तव्या । तद्धितार्थे गुणभूतानामपि मौञ्जानामेतद्विशेषणम् ॥ ६५ ॥

ज्या राजन्यस्य ॥ ६६ ॥

स्पष्टम् ॥ ६६ ॥

मौञ्जी वाऽयोमिश्रा ॥ ६७ ॥

अथवा अयोमिश्रा क्वचित्कालायसेन बद्धा मेखला ॥ ६७ ॥

आवीसूत्रं वैश्यस्य सैरी तामली वेत्येके ॥ ६८ ॥

अविरूर्णायुः। तत्संबन्धिनी ऊर्णा आवी । तत्कृतं सूत्रमावीसूत्रम् । सा मेखला वैश्यस्य भवति । सैरी सीरवाहयोक्त्ररज्जुः । तमालो वृक्षस्तस्य त्वचा ग्रथिता तामली ॥ ६८ ॥

बैल्वः पालाशो वा दण्डो ब्राह्मणस्य नैयग्रोधः स्कन्धजोऽवाङ्ग्रो राजन्यस्य बादर औदुम्बरो वा वैश्यस्य वार्क्षो दण्ड इत्यवर्णसंयोगेनैक उपदिशन्ति ॥ ६९ ॥

गृह्ये गता एव केचिद्विकल्पाय स्मार्यन्ते ॥ ६९ ॥

वासः ॥ ७० ॥

वस्यते कौपीनमाच्छाद्यते येन तद्वासः ॥ ७० ॥

वक्ष्यते—

शाणीक्षौमाजिनानि ॥ ७१ ॥

शणस्य विकारः शाणी पटी। क्षुमा अतसी तस्य विकारः क्षौमम् । श्वेतपट्टाख्यो वासोविशेष इत्यन्ये । अजिनं यस्य कस्यचिन्मेध्यस्य पशोः । त्रीण्येतानि वर्णविशेषेण वासांसि ॥ ७१ ॥

काषायं चैके वस्त्रमुपदिशन्ति ॥ ७२ ॥ (ख०२)

वस्त्रं कार्पासं तच्च काषायं कषायेण रक्तं पूर्ववत् ॥ ७२ ॥ (ख०२)

माञ्जिष्ठं राजन्यस्य ॥ ७३ ॥

मञ्जिष्ठया रक्तं माञ्जिष्ठम् ॥ ७३ ॥

हारिद्रं वैश्यस्य ॥ ७४ ॥

हरिद्रया रक्तं हारिद्रं वैश्यस्य। एतान्युत्तरीयाणि ॥ ७४ ॥

हारिणमैणेयं वा कृष्णं ब्राह्मणस्य ॥ ७५ ॥

बस्ताजिनमिति वक्ष्यमाणत्वादिहाप्यजिनमिति गम्यते । अजिनमुत्तरमुत्तरस्य इत्युपनयने यदजिनं धार्यमुक्तं तद्धारणं ब्राह्मणस्य । हरिणो मृगस्तस्य विकारः। ऐणेयं वा कृष्णम्। एणी मृगी तस्या विकार ऐणेयम् । एण्या ढञ् । द्विविधा एण्यः कृष्णा गौराश्च । अतो विशेष्यते कृष्णमैणेयमिति ॥ ७५ ॥

अस्मिन्पक्षे विशेषमाह—

कृष्णं चेदनुपस्तीर्णासनशायी स्यात् ॥ ७६ ॥

कृष्णं चेद्विभृयान्न केवलं हारिणं तस्मिन्नुपस्तीर्णे नाऽऽसीत न च शयीत । अयं तावदर्थः । शब्दनिर्वाहस्तु अधासनशायीत्यत्र कृतः ॥ ७६ ॥

रौरवं राजन्यस्य ॥ ७७ ॥

रुरुर्बिन्दुमान्मृगः ॥ ७७ ॥

बस्ताजिनं वैश्यस्य ॥ ७८ ॥

बस्तश्छागः ॥ ७८ ॥

आविकं सार्ववर्णिकम् ॥ ७९ ॥

अविरूर्णायुः । स एवाऽऽविकः । तस्य चर्माऽऽविकम् । तत्सर्वेषामेव वर्णानाम् । तस्य हारिणादिभिर्विकल्पः ॥ ७९ ॥

कम्बलश्च ॥ ८० ॥

अयमप्याविक एव प्रावरणः सर्वेषाम् ॥ ८० ॥

काषायं चैके वस्त्रमुपदिशन्तीत्यारभ्य वासांस्यजिनानि च विहितानि तत्र कामवशेन विशेषमाह—

ब्रह्मवृद्धिमिच्छन्नजिनान्येव वसीत क्षत्रवृद्धिमिच्छन्वस्त्राण्येवोभयवृद्धिमिच्छन्नुभयमिति हि ब्राह्मणम् ॥ ८१ ॥

ब्रह्मवृद्धिर्ब्राह्मण*वृद्धिः । क्षत्रवृद्धिः क्षत्रिय+वृद्धिः ॥ ८१ ॥

अथ स्वपक्षमाह —

अजिनं त्वेवोत्तरं धारयेत् ॥ ८२ ॥

उत्तरमुत्तरीयमाजिनमेव धारयेत् ॥ ८२ ॥

न गायेन्न रोदेत् ॥ ८३ ॥

गानं साम्व्यतिरिक्तं न कुर्यात् । अश्रूणि न मुञ्चेत् ॥ ८३ ॥

अनृत्तदर्शी ॥ ८४ ॥

न नृत्तं पश्येत् ॥ ८४ ॥

---

* ब्राह्मणत्वोत्कर्षः । + जयप्राप्तिरित्यर्थः ।

सभाः समाजांश्चागन्ता ॥ ८५ ॥

द्यूतादिस्थानं सभा । उत्सवादिषु समवायाः समाजाः । ताः सभाः समाजांश्च ताच्छील्येन नो गच्छेत् । यदृच्छया गमने न दोषः ॥ ८५ ॥

अजनवादशीलः ॥ ८६ ॥

जनवादः परिवादो लोकवार्ता वा तच्छीलो न स्यात् ॥ ८६ ॥

रहःशीलः ॥ ८७ ॥

सति संभवे रहःशीलः स्यात् ॥ ८७ ॥

गुरोरुदाचारेष्वकर्ता स्वैरिकर्माणि ॥ ८८ ॥

येषु प्रदेशेषु गुरुरुदाचरति पौनःपुन्येन चरति तेषु स्वैरिकर्माणि मैत्रप्रसाधनादीनि न कुर्यात् ॥ ८८ ॥

स्त्रीभिर्यावदर्थसंभाषी ॥ ८९ ॥

स्त्रीभिः सह यावत्प्रयोजनमेव संभाषेत न प्रसक्तानुप्रसक्तमतिचिरम् । बलवानिन्द्रियग्रामो विद्वांसमपि कर्षतीति । अतिबालाभिरतिवृद्धाभिश्च न दोषः ॥ ८९ ॥

मृदुः ॥ ९० ॥

क्षमावान् ॥ ९० ॥

शान्तः ॥ ९१ ॥

इन्द्रियाणामसद्विषये प्रवृत्त्यभावः शमः । तद्वाञ्शान्तः ॥ ९१ ॥

दान्तः ॥ ९२ ॥

विहितेषु कर्मसु दमः । तद्वान् ॥ ९२ ॥

ह्रीमान् ॥ ९३ ॥

ह्रीर्लज्जा ॥ ९३ ॥

दृढसिद्धिर्धृतिः ॥ ९४ ॥

निश्चितफलः फले निश्चयवान् । अथवा फलद्व×यमात्रे दृढां सिद्धिं मन्यमानो न हृष्येन्न विषीदेत् ॥ ९४ ॥

× शुभकर्मणः फलं लाभः । अशुभकर्मणः फलं हानिः । एतत्फलद्वयमित्यर्थः । तत्फलद्वयमनिश्चितमपि बलादापतत्येवेति मत्वा लाभे न हृष्येत् , हानौ न विषीदेत् । किंतु धैर्यमेवावलम्ब्य स्थितः स्यादिति तात्पर्यम् ।

अग्लानिः ॥ ९५ ॥

उत्साहसंपन्नः ॥ ९५ ॥

अक्रोधनः ॥ ९६ ॥

न कस्मैचित्कुप्येत ॥ ९६ ॥

समाहितः ॥ ९७ ॥

स्वस्थान्तःकरणः ॥ ९७ ॥

ब्रह्मचारी ॥ ९८ ॥

गतम् ॥ ९८ ॥

अनसूयः ॥ ९९ ॥

पराभ्युदयानुसंतापोऽसूया । तच्छीलो न स्यात् ॥ ९९ ॥

सर्वं लाभमाहरन्गुरवे सायंप्रातरमत्रेण भिक्षाचर्यं चरेद्भिक्षमाणोऽन्यत्रापपात्रेभ्योऽभिशस्ताच्च ॥ १०० ॥

अपपात्राः प्रतिलोमजा रजकादयः । अवगतानि हि तेषां पात्राणि पाकाद्यर्थानि चातुर्वर्ण्यैः सह । अभिशस्तान्वक्ष्यति अथ पतनीयानीत्यादिना । तानुभयान्वर्जयित्वाऽन्यत्र भिक्षेत । तत्र च भिक्षमाणः सर्वं लाभं यच्च यावच्च लब्धं गोहिरण्यादि तत्सर्वममायया गुरव आहरेत् । एवमहरहः कुर्वन्सायंप्रातरमत्रेण न हस्तादिना भिक्षाचर्यं भिक्षाचरणं चरेत् कुर्यात् । सायंप्रातरिति वचनान्न सायंगृहीतेन प्रातराशो नापि प्रातर्गृहीतेन सायमाशः ॥ १०० ॥

अथ भिक्षाप्रत्याख्यानं निन्दितुं ब्राह्मणमाकृष्यते--

स्त्रीणां प्रत्याचक्षाणानां समाहितो ब्रह्मचारीष्टं दत्तँ हुतं प्रजां पशून्ब्रह्मवर्चसमन्नाद्यमिति वृङ्क्ते तस्मादु ह वै ब्रह्मचारिसंघं चरन्तं न प्रत्याचक्षीतापि हैष्वेवंविध एवंव्रतः स्यादिति हि ब्राह्मणम् ॥ १०१ ॥

व्याख्यातः समाहितः । समाहितो ब्रह्मचारी । याभिः स्त्रीभिर्भिक्षा प्रत्याख्यायते तासां प्रत्याचक्षाणानां स्त्रीणामिष्टं यागैरर्जितं धर्मदत्तं च दानैरर्जितं हुतं दर्विहोमैश्च गार्ह्यैरर्जितं सर्वमेव धर्मं वृङ्क्ते आच्छिनत्ति । यस्मादेवं तस्माद्ब्रह्मचारिसंघं भर्मं चरन्तं न प्रत्याचक्षीत । उहवै इति निपातो वाक्यालंकारार्थः । अपिहि शब्दौ

१ ख. °धं न ।

कदाचिदित्येवमर्थं द्योतयतः । एषु संघीभूतेषु ब्रह्मचारिषु कदाचिदेवंविधः समाहित एवंव्रतः स्यात् । अथ ब्रह्मचर्यविधिरित्यारभ्य यानि व्रतान्युक्तानि तैस्तद्वान्ब्रह्मचारी स्यात् । संभावने लिङ् । संभवेत् । तस्मान्न प्रत्याचक्षीतेत्येवं पैङ्ग्यब्राह्मणं भवति ॥ १०१ ॥

नानुमानेन भैक्षमुच्छिष्टं दृष्टश्रुताभ्यां तु ॥ १०२ ॥

भिक्षाणां समूहो भैक्षम् । न तल्लिङ्गाभासेनोच्छिष्टं मन्तव्यं किंतु दृष्टश्रुताभ्यामेव । दृष्टमात्मन प्रत्यक्षम् । श्रुतमाप्तोपदेशः । ताभ्यामेव [न] तदुच्छिष्टमवगन्तव्यम् ॥१०२॥

भवत्पूर्वया ब्राह्मणो भिक्षेत ॥ १०३ ॥

ब्राह्मणो ब्रह्मचारी भवत्पूर्वया वाचा भिक्षेत । भवति भिक्षां देहीति ॥ १०३ ।

भवन्मध्यया राजन्यः ॥ १०४ ॥

भिक्षां भवति देहीति राजन्यो भिक्षेत ॥ १०४ ॥

भवदन्त्यया वैश्यः ॥ १०५ ॥

भिक्षां देहि भव+तीति ॥ १०५ ॥

सर्वं लाभमाहरन्गुरव इत्युक्तम् । अथाऽऽहृत्य किं कर्तव्यमित्यत आह—

तत्समाहृत्योपनिधाय गुरवे प्रब्रूयाद्भैक्षमिदं भो इति ॥ १०६ ॥

तद्भैक्षं समाहृत्य समीपे निधायाऽऽचार्याय प्रब्रूयाद्भैक्षमिदं भो इति ॥ १०६ ॥

तेन प्रदिष्टं भुञ्जीत ॥ १०७ ॥

तेनाऽऽचार्येण प्रदिष्टं सौम्य त्वमेवं भुङ्क्ष्वेत्युक्तं भुञ्जीत ॥ १०७ ॥

विप्रवासे गुरोराचार्यकुलाय ॥ १०८ ॥

यदि गुरुर्विप्रोषितोऽसंनिहितः स्यात् तत आचार्यकुलायाऽऽचार्यस्य यत्कुलं भार्यापुत्रादि तस्मै प्रब्रूयात् । तेन प्रदिष्टं भुञ्जीत ॥ १०८ ॥

तैर्विप्रवासेऽन्येभ्योऽपि श्रोत्रियेभ्यः ॥ १०९ ॥

तैः सकुल्यैः सह गुरोर्विप्रवासेऽन्येभ्योऽपि श्रोत्रियेभ्यः प्रब्रूयात् । तैः प्रदिष्टं भुञ्जीतेति विपरिणामेनान्वयः । गौतमोऽप्याह—असंनिधौ तद्भार्यापुत्रसब्रह्मचारिभ्य इति ॥ १०९ ॥

+ ब्राह्मणादिना ब्रह्मचारिणा स्वसजातीयगृहेष्वेव भिक्षितव्यम् । तदुक्तं व्यासेन—ब्राह्मणक्षत्रियविशश्वरेषु भैक्षमन्वहम् । सजातीयगृहेष्वेव सार्ववर्णिकमेव वा ॥ इति सा च भिक्षा पक्वान्नस्य सजातीयगृहेषु इत्यर्थः । कलौ क्षत्रविशोरभावात्च पक्वान्नभिक्षायाः सार्ववर्णिकत्वप्रसक्तिः । सार्ववर्णिकभिक्षाया युगान्तरपरत्वमामान्नपरत्वं वा बोध्यम् ।

नाऽऽत्मप्रयोजनश्चरेत् ॥ ११० ॥

आत्मा प्रयोजनं प्रयोजको यस्य स आत्मप्रयोजनः । एवंभूतो भिक्षां न चरेत् । आत्मार्थं न चरेदित्यर्थः । अस्य प्रयोजनं यदा श्रोत्रिया अपि न लभ्यन्ते तदा प्रोषितो भैक्षादग्नौ कृत्वा भुञ्जीतेति वक्ष्यमाणप्रोषितविधिरप्रोषितेऽपि यथा स्यादिति ॥ ११० ॥

प्रोषितो भैक्षादग्नौ कृत्वा भुञ्जीत ॥ १११ ॥

प्रोषितशिष्य आचार्यप्रयोजनः स्वप्रयो*जनो वाऽऽचार्यकुलश्रोत्रियाभावे भिक्षातः किंचिदादायाग्नौ +प्रक्षिप्य भुञ्जीत ॥ १११ ॥

भुक्त्वा स्वयममत्रं प्रक्षालयेत् ॥ ११२ ॥

अमत्रं भोजनपात्रं भुक्त्वेति संनिधानात् । स्वयमेव प्रक्षालयेत् । भिक्षापात्रस्य त्वन्येनापि प्रक्षालने न दोषः । उभयोरपि पात्रयोर्ग्रहणमित्यन्ये ॥ ११२ ॥

न चोच्छिष्टं कुर्यात् ॥ ११३ ॥

यावच्छक्नोति भोक्तुं तावदेव भोजनपात्रे कृत्वा भुञ्जीत ॥ ११३ ॥

अशक्तौ भूमौ निखनेत् ॥ ११४ ॥

भोजने प्रवृत्तो यदि भोक्तुं न शक्नुयात्तदा तदन्नं भूमौ निखनेत् ॥ ११४ ॥

अप्सु वा प्रवेशयेत् ॥ ११५ ॥

प्रक्षिपेत् ॥ ११९ ॥

आर्याय पर्यवदध्याद्वा ॥ ११६ ॥

आर्यस्त्रैवर्णिकः । तस्मा अनुपनीताय पर्यवदध्यात् । सर्वमेकस्मिन्पात्रेऽवधाय तत्समीपे भूमौ स्थापयेत् ॥ ११६ ॥

अन्तर्धिने वा शूद्राय ॥ ११७ ॥

अन्तर्धानमन्तर्धिः । सोऽस्यास्तीत्यन्तर्धी । व्रीह्यादित्वादिनिः । अन्तर्धी दासः । अन्तर्हितं हि तस्य शूद्रत्वम् । आशौचेषु तु स्वामितुल्यत्वात् । प्रकरणादाचार्यस्येति गम्यते । आचार्यदासाय वा शूद्राय पर्यवदध्यात् ॥ ११७ ॥

अथ ब्रह्मचारिणो यज्ञं विधातुं हविरादीनि संपादयति—

* आत्मार्थमाचार्यार्थं वा प्रोषितः शिष्य इत्यर्थः । + श्रोत्रियाणां सद्भावेऽसद्भावे चेत्यादिः । अन्येभ्योऽपि श्रोत्रियेभ्य इत्येतदत्र न भवति । यदि स्यात्तत्रैवायं ब्रूयात्—तदभावेऽग्नौ कृत्वा भुञ्जीतेति । यद्यपि तत्राऽऽचार्यस्य विप्रवासः प्रकृतस्तथाऽपि न्यायसाम्याच्छिष्यप्रवासोऽपि भविष्यति ।

भैक्षं हविषा संस्तुतं तत्राऽऽचार्यो देवतार्थे ॥ ११८ ॥

भैक्षं हविष्ट्वेन संस्तुतं कीर्तितं तत्र तस्मिन्हविषि आचार्यो देवतार्थे देवकार्ये, तत्प्रीत्यर्थत्वात्तस्य ॥ ११८ ॥

आहवनीयार्थे च ॥ ११९ ॥

तस्य जठराग्नावाहूयमानत्वात् ॥ ११९ ॥

तं भोजयित्वा यदुच्छिष्टं प्राश्नाति ॥ १२० ॥

अनुवादेषु सर्वत्र विधिः प्रकल्प्यते । तं भोजयित्वा तस्योच्छिष्टं प्राश्नीयात् ॥ १२० ॥

हविरुच्छिष्टमेव तत् ॥ १२१ ॥

इडाभक्षणादिस्थानीयमित्यर्थः ॥ १२१ ॥

यदन्यानि द्रव्याणि यथालाभमाहरति दक्षिणा एव ताः ॥ १२२ ॥

यदन्यानि द्रव्याणि गवादीनि भिक्षाचरणे लब्धानि समिदादीनि च स्वयमाहृतानि यथालाभमाहरति ता दक्षिणा एव । दक्षिणासामानाधिकरण्यात्ता इत्युक्तम् ॥१२२॥

स वा एष ब्रह्मचारिणो यज्ञो नित्यं प्रततः ॥ १२३ ॥

स एष एवंभूतो यज्ञो ब्रह्मचारिणो नित्यं प्रतायते । एवंकुर्वता ब्रह्मचारिणा यज्ञा एव नित्यं क्रियन्त इत्यर्थः ॥ १२३ ॥

न चास्मै श्रुतिविप्रतिषिद्धमुच्छिष्टं दद्यात् ॥ १२४ ॥

अस्मै शिष्यायाऽऽचार्यः श्रुतिविप्रतिषिद्धं शास्त्रविप्रतिषिद्धमुच्छिष्टं न दद्यात् ॥१२४॥

किं पुनस्तत्—

यथा क्षारलवणमधुमांसानीति ॥ १२५ ॥ (ख. ३)

यथेति वचनाच्छ्रुतिविप्रतिषिद्धमिति लक्षणतः प्रतिषेधाच्च क्षारादिग्रहणमेवंविधस्योपलक्षणम् ॥ १२५ ॥ (ख. ३) ।

एतेनान्ये नियमा व्याख्याताः ॥ १२६ ॥

अभ्यङ्गशेषो गन्धशेषो माल्यशेष इत्यादयस्तु प्रतिषिद्धा आचार्येण देया इत्युक्तमेवेति ॥ १२६ ॥

केचित्तु श्रुतिविप्रतिषिद्धमपि आचार्यशेषमुपयुञ्जाना दृश्यन्ते पूर्वः पूर्व आचारः प्रमाणमिति वदन्ति तन्निराकरोति—

श्रुतिर्हि बलीयस्यानुमानिकादाचारात् ॥ १२७ ॥

अनुमानाय प्रभवतीति आनुमानिकः । आचाराद्धि श्रुतिः स्मृतिर्वाऽनुमीयते । तस्मादानुमानिकादाचारात्प्रत्यक्षा श्रुतिर्बलीयसी तद्विरोधे नानुमातुं शक्यते । अनुमानमबाधित इति न्यायात् । एवं च ब्रुवता ब्रह्मचारिणः क्षारलवणादिप्रतिषेधः प्रत्यक्षब्राह्मणमूल इति दर्शितं भवति । यद्यपि क्षारलवणादिप्रतिषेधश्रुतेरुच्छिष्टव्यतिरेको विषयः संभवति तथाऽपि संकोचोऽपि तस्या अविशेषप्रवृत्ताया आनुमानिकादाचारादयुक्तः ॥ १२७ ॥

ननु परस्परविरुद्धा अपि श्रुतय उपलभ्यन्ते गृह्णाति न गृह्णातीति । तत्किमाचारात्संकोचिका श्रुतिर्नानुमीयते । अत आह—

दृश्यते चापि प्रवृत्तिकारणम् ॥ १२८ ॥

स्यादेवं यद्ययमाचारोऽगृह्यमाणकारणः स्यात् । गृह्यते तु कारणम् ॥ १२८ ॥

किं तत्—

प्रीतिर्ह्युपलभ्यते ॥ १२९ ॥

क्षारादिभोजने भुञ्जानस्य प्रीतिर्भवति । ततश्च यत्र प्रीत्युपलम्भितः प्रवृत्तिर्न तत्र शास्त्रमस्तीति न्यायान्न संकोचिका श्रुतिरनुमीयत इति ॥ १२९ ॥

पितुर्ज्येष्ठस्य च भ्रातुरुच्छिष्टं भोक्तव्यम्+ ॥ १३० ॥

स्पष्टम् ॥ १३० ॥

धर्मविप्रतिपत्तावभोज्यम् ॥ १३१ ॥

यदि तयोर्धर्माद्विप्रतिपत्तिरपायो भवति ततो न भोज्यम् । यद्वा भुञ्जानस्य ब्रह्मचारिणो यदि धर्मो विप्रतिषिद्धो भवति मधुमांसादिमिश्रत्वेन ततो न भोज्यमिति ॥ १३१ ॥

सायंप्रातरुदकुम्भमाहरेत् ॥ १३२ ॥

आचार्यस्य स्नानपानाद्यर्थम् ॥ १३२ ॥

सदाऽरण्यादेधानाहृत्याधो निदध्यात् ॥ १३३ ॥

सदा प्रत्यहमरण्यान्न पित्रादिगृहादेधान् काष्ठानि आचार्यगृहे पाकाद्यर्थमाहरेत् । गतमेतद्गृह्ये । आहृत्याधो निदध्यात् । इदमपूर्वमधोनिधानमाचार्यस्य पुत्रादिषु बालेषु पतनशङ्कया । अपर आह—आत्मनः समिदाधानार्थमाहरणमिति तदनुवादेनाधोनिधानमभिधीयते दृष्टार्थमदृष्टार्थं चेति ॥ १३३ ॥

+ ब्रह्मचारिप्रकरणे नियमादित्यर्थः ।

नास्तमिते समिद्धारो गच्छेत् ॥ १३४ ॥

अस्तमित आदित्ये समिध आहर्तुं न गच्छेत् । चोरव्याघ्रादिसंभवात् । समिद्धार इत्यण् कर्मणि चेति तुमर्थेऽण् प्रत्ययः ॥ १३४ ॥

अग्निमिद्ध्वा परिसमुह्य समिध आदध्यात्सायं प्रातः यथोपदेशम् । १३५ ॥

परिसमूहनं परितो मार्जनम् । विप्रकीर्णस्याग्ने राशीकरणमित्यन्ये । यथोपदेशं यथा गृह्य उक्तं तथा समिध आदध्यात् । गृह्ये विहितमपि समिदाधानं विधीयते । सर्वधर्माचरणार्थं सायंप्रातरादिकान्विशेषान्वक्ष्यामीति च ॥ १३५ ॥

सायमेवाग्निपूजेत्येके ॥ १३६ ॥

एक आचार्याः सायमेवाग्निपूजा कार्या न प्रातरिति मन्यन्ते ॥ १३६ ॥

समिद्धमग्निं पाणिना समूहेन्न समूहन्या ॥ १३७ ॥

समिदाधानेन समिद्धमग्निं पाणिनैव समूहेन्न समूहन्या । समूहनी संमार्जनी दर्भनिर्मिता वेदाकृतिराचारात् ॥ १३७ ॥

प्राक्तु यथाकामी ॥ १३८ ॥

प्राक्तु समिदाधानात्परिसमूहने यथाकामी भवति । यथाकामस्य भावो यथाकामी । ष्यञ् । षित्त्वान्ङीष् ॥ १३८ ॥

नाग्न्युदकशेषेण वृथाकर्माणि कुर्यादाचामेद्वा ॥१३९॥

अग्निपरिचर्यायां परिसमूहने परिषेचने च यदुपयुक्तमुदकं तच्छेषेण वृथा कर्माणि अदृष्टप्रयोजनरहितानि पादप्रक्षालनादीनि न कुर्वीत नाप्याचामेत् ॥ १३९ ॥

अवृथाकर्मत्वादस्य पुनः प्रतिषेधः—

पाणिसंक्षुब्धेनोदकेनैकपाण्यावर्जितेन च नाऽऽचामेत् ॥ १४० ॥

पाणिसंक्षुब्धं कुम्भादिगतं यत्पाणिना संक्षोभितं तेनोदकेन नाऽऽचामेत्* । अलाबुपात्रेण नालिकेरेण वा वैणवेन च मृन्मयेन वा ताम्रमयेण वा पात्रेण स्वयमाचमनमाचरन्ति शिष्टाः ॥ १४० ॥

---

* नेदं तटाकादिषु स्वयमाचमने । यदा चापर आचामयति तदैकेन पाणिना यदावर्जितमुदकं तेन नाऽऽचामेत् । किंतूभाभ्यां हस्ताभ्यां करकादि गृहीत्वा यदावर्जितमुदकं तेनाऽऽचामेत् । एव च स्वयं वामहस्तेनाऽऽवर्जितेनापि नाऽऽचामेदिति तात्पर्यम् ।

स्वप्नं च वर्जयेत् ॥ १४१ ॥

पूर्वमदिवास्वापीत्यनेन दिवास्वापः प्रतिषिद्धः । अनेन तु रात्रावपि यावदाचार्यो न स्वपिति तावन्तं कालं स्वापः प्रतिषिध्यते । स्वप्नकथनं न कीर्तयेदित्यन्ये ॥ १४१ ॥

अथाहरहराचार्यं गोपायेद्धर्मार्थयुक्तैः कर्मभिः ॥ १४२ ॥

अथ स्वप्नस्य प्रकृतत्वात् । स्वप्नानन्तरं ब्राह्मे मुहूर्ते उत्थायेत्यर्थः । अहरहर्नित्यमाचार्यं गोपायेत् । किं दण्डादि गृहीत्वा नेत्याह—धर्मार्थयुक्तैः कर्मभिः । धर्मयुक्तानि कर्माणि समित्कुशपुष्पाहरणादीनि । अर्थयुक्तानि युग्यघासाहरणादीनि ॥ १४२ ॥

स गुप्तात्संविशन्ब्रूयाद्धर्मगोपायमाजूगुपमहामिति ॥ १४३ ॥

स ब्रह्मचारी यावदुत्थानाद्यावच्च संवेशनादेवमाचार्यं गुप्तात् । संविशञ्शयनं भजन् धर्मगोपायमाजूगुपमहामिति मन्त्रं ब्रूयात् । धर्मं गोपायतीति धर्मगोपाय आचार्यस्तमहमाजूगुपमाभिमुख्येन रहि(क्षि)तवानास्मि । इदानीं संविशानीति मन्त्रस्यार्थः । अपर आह—हे धर्म गोपाय रक्ष माम् । यस्मादहमाजूगुपमाचार्यमेतावन्तं कालमिति ॥ १४३ ॥

प्रमादादाचार्यस्य बुद्धिपूर्वं वा नियमातिक्रमं रहसि बोधयेत् ॥ १४४ ॥

प्रमादोऽनवधानम् । प्रमादाद्बुद्धिपूर्वं वाऽऽचार्यस्य यो नियमातिक्रमस्तं रहसि बोधयेत् । इत्थमयं नियम आचार्यपादेनातिक्रम्यत इति ॥ १४४ ॥

अनिवृत्तौ स्वयं कर्माण्यारभेत् ॥ १४५ ॥

यदि बोधितोऽप्याचार्यो न निवर्तेत ततः स्वयमेतस्य कर्तव्यानि ब्रह्मयज्ञादीनि कर्माण्यारभेत कुर्यात् ॥ १४५ ॥

निवर्तयेद्वा ॥ १४६ ॥

प्रसह्य वा *स्वयं निवर्तयेत् ॥ १४६ ॥

अथ यः पूर्वोत्थायी जघन्यसंवेशी भवति तमाहुर्न स्वपितीति ॥ १४७ ॥

यः पूर्वमाचार्यादुत्तिष्ठति प्रतिबुध्यते । जघन्यशब्दः पश्चादर्थे । जघन्यश्च संविशति तं ब्रह्मचारिणं न स्वपितीति धर्मज्ञा आहुः । प्रयोजनं स्वप्नं वर्जयेदिति यदुक्तं तस्यायमर्थः । न स्वापस्यात्यन्ताभाव इति । अथशब्दश्च वाक्योपक्रमे ॥ १४७ ॥

स य एवं प्रणिहितात्मा ब्रह्मचारी भवत्यत्रैवास्य सर्वाणि फलवन्ति कर्माण्यवाप्तानि भवन्ति यान्यपि गृहमेधे ॥ १४८ ॥

---

* स्वयमित्युपलक्षणम् । स्वसामर्थ्याभावे पित्रादिभिर्वा निवर्तयेदित्यर्थः ।

इति सत्याषाढहिरण्यकेशिश्रौतसूत्रे (धर्मसूत्रापरपर्याये) षड्विंशप्रश्ने प्रथमः पटलः ॥ १ ॥ (ख० ४) ॥

आचार्याधीनः स्यादित्यारभ्य यस्य नियमा उक्ताः स ब्रह्मचारी एवमुक्तेन प्रकारेण प्रणिहितात्मा प्रकर्षेण निहित आचार्यकुले स्थापित आत्मा येन स तथोक्तः । प्रकर्षश्चाऽऽन्तात्तत्रैव शरीरन्यासः । वक्ष्यति चाऽऽचार्यकुले शरीरन्यास इति । अस्यैवंविधस्य ब्रह्मचारिणोऽत्रैव ब्रह्मचर्याश्रमे सर्वाणि फलवन्ति ज्योतिष्टोमादीनि कर्माणि अवाप्तानि भवन्ति तत्फलावाप्तिरेवैतदवाप्तिः । यान्यपि कर्माणि गृहमेधे गृह्यशास्त्रे विवाहादीनि अष्टकान्तानि तान्यप्यवाप्तानि भवन्ति । तदेवं नैष्ठिकब्रह्मचारिविषयमिदं सूत्रम् ॥ १४८ ॥ (ख० ४) ॥

इति श्रीमन्महादेवदीक्षितविरचितायां सत्याषाढहिरण्यकेशिश्रौतसूत्रे धर्मसूत्रव्याख्यायामुज्ज्वलायां वृत्तौ षड्विंशप्रश्ने प्रथमः पटलः ।

अथ द्वितीयः पटलः ।

नियमेषु तपःशब्दः ॥ १ ॥

आचार्याधीनः स्यादित्यादयो नियमा उक्ता अस्मिन्ब्रह्मचारिप्रकरणे तपःशब्दस्तेषु द्रष्टव्यो न कृच्छ्रादिषु ॥ १ ॥

तदतिक्रमे विद्याकर्म निःस्रवति ब्रह्म सहापत्यादेतस्मात् ॥ २ ॥

तेषां नियमानामतिक्रमे विद्याकर्म विद्याग्रहणं ब्रह्म निःस्रवति गृहीतं वेदं निःसारयति । एतस्मान्नियमातिक्रमेणाध्येतुः पुरुषान्न केवलादेवैतस्मात् । किं तर्हि सहापत्यादपत्येन सह वर्तत इति सहापत्यः । वोपसर्जनस्येति सभावाभावे रूपम् । अपत्यादपि ब्रह्म निःसारयति । यद्यप्यपत्यं नियमातिक्रमकारि न भवति तथाऽपि पितृदोषादेव ततोऽपि ब्रह्म निःसरति नियमातिक्रमेण विद्याग्रहणं कुर्वतः पुरुषात्सहापत्याद्गृहीतं ब्रह्म निःसरति । ब्रह्मयज्ञादिषु प्रयुज्यमानमपि अकिंचित्करं भवतीत्यर्थो विवक्षितः । स्रवतेश्च सकर्मकस्य प्रयोगो भाष्ये दृष्टः स्रवत्युदकं कुण्डिकेति । अपर आह तदतिक्रमेऽविद्याकर्मनियमातिक्रमेण विद्याग्रहणं न कर्तव्यम् । कुतः । यतो निःस्रवति ब्रह्म निःसरतीत्यर्थः । शेषं समानमिति । विद्याकर्म पतिस(रिस्र)वति ब्रह्म च निःस्रवतीत्यन्ये । कुर्वत इति चाध्याहार्यं तदतिक्रमेण विद्याकर्म कुर्वतो ब्रह्म निःस्रवतीति ॥ २ ॥

न केवलमकिंचित्करं नियमातिक्रमेण विद्याग्रहणं प्रत्युतानर्थकमित्याह—

कर्तृपत्यमनायुष्यं च ॥ ३ ॥

कर्तृशब्देन खड्गाभिधायिना नरको लक्ष्यते । पतत्यनेनेति पत्यम् । एवंभूतं विद्याग्रहणं नरकहेतुर्भवति । अनायुष्यं चानायुष्करं च ॥ ३ ॥

तस्मादृषयोऽवरेषु न जायन्ते नियमातिक्रमात् ॥ ४ ॥

अत एवावरेषु अर्वाचीनेषु कलियुगवर्तिषु योनिषु न जायन्ते मन्त्रदृशो न भवन्ति । नियमातिक्रमस्येदानीमवर्जनीयत्वात् ॥ ४ ॥

कथं तर्ह्यद्यतना अतिक्रामन्तोऽपि नियमानल्पेनैव यत्नेन चतुरो वेदान् गृह्णन्ति । युगान्तरे सम्यगनुष्ठितस्य नियतकर्मणः फलशेषेणेत्याह—

***श्रुतर्षयस्तु भवन्ति केचित्कर्मफलशेषेण पुनःसंभवेऽपि ॥ ५ ॥**

पुनःसंभवः पुनर्जन्म ॥ ५ ॥

अत्रोदाहरणम्—

अथ यथा श्वेतकेतुः ॥ ६ ॥

श्वेतकेतुरल्पेनैव कालेन चतुरो वेदाञ्जग्राह । तथा च च्छान्दोग्यम्—श्वेतकेतुर्हाऽऽरुणेय आस तँ ह पितोवाच श्वेतकेतो वस ब्रह्मचर्यं न वै सोम्यास्मत्कुलीनोऽननूच्य ब्रह्मबन्धुरिव भवति । स ह द्वादशवर्ष उपेत्य चतुर्विंशतिवर्षः सर्वान्वेदानधीत्य महामना अनूचानमानी स्तब्ध एयायेति ॥ ६ ॥

एवं नियमातिक्रमे दोषमुक्त्वा तदनुष्ठाने सिद्धिमाह—

यत्किंच समाहितोऽब्रह्माऽ×प्याचार्यादुपयुङ्क्ते ब्रह्मवदेव तस्मिन्फलं भवति ॥ ७ ॥

अब्रह्मापि पररूपं कतन्तवत् । अपेर्वाऽकारलोपः । पिहितपिनद्धादिवत् । वेदव्यतिरिक्तमपि यत्किंचिद्विषमन्त्रादिकं समाहितो नियमवान्भूत्वाऽऽचार्यादुपयुङ्क्ते गृह्णाति तस्मिन्ब्रह्मवदेव फलं भवति ॥ ७ ॥

निग्रहानुग्रहशक्तिरप्यस्य भवतीत्याह—

अथो यत्किंच मनसा वाचा चक्षुषा वा संकल्पयन्ध्यायत्याहाभिविपश्यति वा तथैव तद्भवतीत्युपदिशन्ति ॥ ८ ॥

---

* [illegible]तस्याविस्मर्तारः श्रुतर्षय उच्यन्ते । × पररूपं कतन्तवदपेर्वाऽकारलोपः । पिहितपिनद्धादिव[illegible]ब्रह्मण्याचार्यादिति पाठ उज्ज्वलाकृतोऽग्र आसीदित्यनुमीयते । युक्तायुक्तं सद्सद्भिर्विचारणीयम ।

अथो अपि च यत्किंच निग्रहात्मकमनुग्रहात्मकं वा संकल्पयंश्चिकीर्षन्मनसा निन्दितेन शिवेन वा ध्यायतीत्थमिदमस्यास्त्विति तथैव तद्भवति। एवं यत्किंच संकल्पयंश्चक्षुषा पौरा(घोरे)ण मैत्रेण वाऽभिविपश्यति तथैव तद्भवतीत्युपदिशन्ति धर्मज्ञाः ॥८॥

अवश्यं धर्मयुक्तेनाध्येतव्यमित्युक्तम्। इदानीं धर्मो लक्षणतस्त्रिवेत्याह—

गुरुप्रसादनीयानि कर्माणि स्वस्त्ययनमध्ययनसंवृत्तिरिति ॥ ९ ॥

यैरनुष्ठितैर्गुरुः प्रसीदति तानि गुरुप्रसादनीयानि पादप्रक्षालनादीनि। स्वस्तीत्यविनाशनाम तत्प्राप्तिसाधनं स्वस्त्ययनम्। तच्च त्रिविधम्। दृष्टार्थमदृष्टार्थमुभयार्थं चेति। दृष्टार्थं बाहुनदीतरणादिनिषेधः। अदृष्टार्थं क्षारादिनिषेधः। उभयार्थं भिक्षाचरणादीनि। अध्ययनसंवृत्तिरधीतस्य वेदस्याभ्यासः ॥ ९ ॥

अतोऽन्यानि निवर्तन्ते ब्रह्मचारिणि ॥ १० ॥

कर्माणीति शेषः। एतेभ्योऽन्यानि कर्माणि निवर्तन्ते। ब्रह्मचारिणा न कर्तव्यानीत्यर्थः ॥ १० ॥

स्वाध्यायधृग्धर्मरुचिस्तपस्व्यृजुर्मृदुः सिध्यति ब्रह्मचारी ॥११॥

स्वाध्यायधृक्। अधीतस्य स्वाध्यायस्य धारयिताऽविस्मर्ता। धर्मे रुचिर्यस्यासौ धर्मरुचिः। तपस्वी नियमेषु तपःशब्द इति तद्वान्। ऋजुरमायावी। मृदुः क्षमावान्। एवंभूतो ब्रह्मचारी सिध्यति सिद्धिं प्राप्नोति। उक्ता सिद्धिः। अथो यत्किंच मनसेत्यत्रोक्तानां पुनर्वचनमादराय। तदनुष्ठाने फलभूमाऽतिक्रमे च दोषभूमेति ॥११॥

सदा महान्तमपररात्रमुत्थाय गुरोस्तिष्ठन्प्रातरभिवादयी(ये)तासावहं भो इति ॥ १२ ॥

सदा प्रतिदिनं महान्तमपररात्रेः पश्चिमयाममुत्तिष्ठन्नुत्थाय च समीपे तिष्ठन्गुरोः प्रातरभिवादयी(ये)ताभिवादयेऽसावहं भो इति ब्रुवन्। असावित्यात्मनो नामनिर्देशः। यथाऽभिवादये यज्ञशर्माऽहं भो इति ॥ १२ ॥

समानग्रामे च वसतामन्येषामपि वृद्धतराणां प्राक्प्रातराशात् ॥ १३ ॥

अन्येषामपि वृद्धतराणां प्राक्प्रातराशात्प्रातर्भोजनात्प्राङ्मानाभिवादनमभिवादयी(य)त ते चेत्समानग्रामे वसन्ति ॥ १३ ॥

---

१ ख. °दमभिवादयी°।

प्रोष्य च समागमे ॥ १४ ॥

यदा स्वयं प्रोष्य चाऽऽगत आचार्यादयो वा तदाऽप्यभिवादयी(ये)त। इदं नैमित्तिकं पूर्वं नित्यम् ॥ १४ ॥

अथ काम्यम्—

स्वर्गमायुश्चेप्सन् ॥ १५ ॥

अभिवादयी(ये)तेत्येव ॥ १९ ॥

अभिवादनप्रकारं वर्णानुपूर्व्येणाऽऽह—

दक्षिणं बाहुं श्रोत्रसमं प्रसार्य ब्राह्मणोऽभिवादयीतोरःसमं राजन्यो मध्यसमं वैश्यो नीचैः शूद्रः ॥ १६ ॥

ब्राह्मणोऽभिवादयमान आत्मनो दक्षिणं बाहुं श्रोत्रसमं प्रसार्याभिवादयी(ये)तोरःसमं राजन्यो दक्षिणं बाहुं प्रसार्याभिवादयी(ये)तेति गम्यते। एवमुत्तरयोरपि । मध्यसममुदरसमं वैश्यः । ऊरुसममित्यन्ये । नीचैः पादसमं शूद्रोऽभिवादयी(ये)त ॥ १६ ॥

प्राञ्जलिः ॥ १७ ॥

प्राञ्जलिर्यथा भवति तथाऽभिवादयी(ये)त । अञ्जलिं कृत्वेत्यर्थः। प्रा(सा)ञ्जलिरिति तु युक्तः पाठः ॥ १७ ॥

प्लावनं च नाम्नोऽभिवादने पूर्वेषां वर्णानाम् ॥ १८ ॥

अभिवादनस्य यत्प्रत्यभिवादनं तत्राभिवादयितुर्नाम्नः प्लावनं कर्तव्यम्। प्लुतः कर्तव्य इत्यर्थः। पूर्वेषां वर्णानां शूद्रवर्जितानाम् । प्रत्यभिवादेऽशूद्र इति पाणिनिस्मृतिः। तत्र वाक्यस्य टेरनुवृत्तेः। प्रत्यभिवादवाक्यस्यान्ते नामयोगः । तस्य टेः प्लुतः। आयुष्मान्भव सौम्य ३ इति प्रयोक्तव्यम् । स्मृत्यन्तरवचनान्नाम्नश्च पश्चादकारः । तथा च मनुः—

आयुष्मान्भव सौम्येति वाच्यो विप्रोऽभिवादने ।
अकारश्चास्य नाम्नोऽन्ते वाच्यः पूर्वाक्षरः प्लुतः ॥ इति ।

आयुष्मान्भव सौम्य देवदत्त३ अ इति प्रयोगः। शंभुर्विष्णुश्चक्रपाणिरित्येवमादीनां नाम्नां संबुद्धौ गुणे कृते 'एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ' इत्ययमपि विधिर्भवति । अन्ते अकारः । तयोर्य्वावचि संहितायामिति यकारवकारौ च भवतः । शंभा३व विष्णा३व चक्रपाणा३य इति । प्रत्यभिवादने चेति चकारस्यार्थं न पश्यामः । तस्मादनर्थक एव चकारः । अनर्था अपि निपाताः प्रयुज्यन्ते ॥ १८ ॥

उदित आदित्य आचार्येण समेत्योपसंग्रहणम् ॥ १९ ॥

उदिते त्वादित्य आचार्येणाध्ययनार्थं समेत्य वक्ष्यमाणविधिनोपसंग्रहणं कुर्यात् ॥ १९ ॥

सदैवाभिवादनम् ॥ २० ॥

अन्यदा सर्वदा पूर्वोक्तप्रकरेणाभिवादनमेव । अयमनुवाद उत्तरया विवक्षया ॥ २० ॥

उपसंग्राह्य आचार्य इत्येके ॥ २१ ॥

अभिवादनप्रसङ्गे सदैवोपसंग्राह्य आचार्य इत्येके ॥ २१ ॥

किमिदमुपसंग्रहणं तदाह—

दक्षिणेन पाणिना दक्षिणं पादमधस्तादभिमृश्य सकुष्ठिकमुपसंगृह्णीयात् ॥ २२ ॥

आत्मनो दक्षिणेन पाणिनाऽऽचार्यस्य दक्षिणं पादमधस्तादभिमृश्य । अधःशब्द उपरिभावे । अधस्ताच्चोपरिष्टाच्चाभिमृश्य सकुष्ठिकं सगुल्फम् । साङ्गुष्ठमित्यन्ये । उपसंगृह्णीयात् । इदमुपसंग्रहणम् । एतत्कुर्यात् । ॥ २२ ॥

उभाभ्यामेवोभावभिपीडयत उपसंग्राह्यावित्येके ॥ २३ ॥

उभाभ्यामेव पाणिभ्यामुभावेवाऽऽचार्यस्य पादावभिपीडयतो माणवकस्योपसंग्राह्यावित्येके मन्यन्ते । अभिपीडयत इति कृत्यानां कर्तरि वेति षष्ठी । अत्र मनुः—

व्यत्यस्तपाणिना कार्यमुपसंग्रहणं गुरोः ।
सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन तु दक्षिणः ॥

इति ॥ २३ ॥

सर्वाह्णं सुयुक्तोऽध्ययनादनन्तरोऽध्याये ॥ २४ ॥

सर्वं च तदहश्चेति सर्वाह्णम् । राजाहः सखिभ्यष्टच् । अह्नोऽह्न एतेभ्य इत्यह्नादेशः । अह्नोऽदन्तादिति णत्वम् । अत्यन्तसंयोगे द्वितीया । सर्वाह्णं तदा सुयुक्तः सुसमाहितोऽनन्यचित्तः । अध्ययनादनन्तरः । नान्तरयतीत्यनन्तरः । अध्ययनाद्यथा नाऽऽत्मानमन्तरयति यथाऽध्ययनान्न विच्छिद्यते तथा स्यात् अध्याये स्वाध्यायकाले । अध्याय इत्यनुवादः ॥ २४ ॥

तथा गुरुकर्मसु मनसा चानध्याये ॥ २५ ॥

मनसा चानध्याय इति विशेषाभिधानादनध्याय इति प्रायेण पठन्ति । तत्र नकारश्छान्दसोऽपपाठो वा । गुरुकर्मसु तथा स्यात् सुयुक्तोऽनन्तर एव स्यादनध्याये ॥ २५ ॥

आहूताध्यायी च स्यात् ॥ २६ ॥ (ख० ५) ।

आचार्येणाऽऽहूतोऽधीयीत । नाध्ययने स्वयं प्रवर्तयेत् ॥ २६ ॥ (ख० ५) ।

सदा निशायां गुरुꣳ संवेशयेत्तस्य पादौ प्रक्षाल्य संवाह्यानुज्ञातः संविशेत् ॥ २७ ॥

सदा प्रत्यहं निशायामतिक्रान्ते प्रदोषे संवेशयेत् । कथम् । गुरोः पादौ प्रक्षाल्य संवाह्य च । संवाहनं पादतले हस्तेन मर्दनम् । अनुज्ञातः संविशेत् । गुरुणाऽनुज्ञातः स्वयं संविशेत् । शयीत ॥ २७ ॥

न चैनमभिप्रसारयीत ॥ २८ ॥

एनमाचार्यं प्रति पादौ न प्रसारयेत् ॥ २८ ॥

न खट्वायाꣳ सतोऽभिप्रसारणमस्तीत्येके ॥ २९ ॥

यदा तु गुरुः खट्वायां निशि शेते तदा तं प्रति पादयोः प्रसारणं न दोषायेत्येके मन्यन्ते । स्वपक्षस्तु तत्रापि दोष इति ॥ २९ ॥

न चास्य सकाशे संविष्टो भाषेत ॥ ३० ॥

तस्याऽऽचार्यस्य सकाशे स्वयं संविष्टः शयानो नाभिभाषेत । कार्यावेदनादावुत्थायैव भाषेत ॥ ३० ॥

अभिभाषितस्त्वासीनः प्रतिब्रूयात् ॥ ३१ ॥

आचार्येणाभिभाषित आसीनस्तु प्रतिब्रूयात् । एतदाचार्य आसीने शयाने वा ॥ ३१ ॥

अनूत्थाय तिष्ठन्तम् ॥ ३२ ॥

यदा त्वाचार्यस्तिष्ठन् ब्रूते तदा तमनूत्थाय प्रतिब्रूयात् ॥ ३२ ॥

गच्छन्तमनुगच्छेद्धावन्तमनुधावेन्न सोपानद्वेष्टितशिरा अवहितपाणिर्वाऽऽसीदेत् ॥ ३३ ॥

अनुधावेदित्यन्तं स्पष्टार्थम् । उत्तरत्रोपानत्प्रतिषेधान्न सोपानदित्यनुवादोऽध्वापन्नास्त्विति प्रतिवेदितुम् । आचार्यसमीपे न सोपानत्क आसीदेत् । अपि वा वेष्टितशिरा अवहितपाणिर्दात्रादिहस्त एवंभूतोऽपि नाऽऽसीदेत् ॥ ३३ ॥

अध्वापन्नस्तु कर्मयुक्तो वाऽऽसीदेत् ॥ ३४ ॥

अध्वानं प्राप्तोऽध्वापन्नः । कर्मणि दात्रादिसाध्ये प्रवृत्तः कर्मयुक्तः । एवंभूतस्तु सोपानत्कादिकोऽप्यासीदेत् ॥ ३४ ॥

न चेदुपसीदेत् ॥ ३५ ॥

न चेदाचार्यसमीप उपसीदेदुपविशेत् । यदि तूपविशेदध्वापन्नः कर्मयुक्तो वा तदोपानत्प्रभृतीनि विहायोपविशेत् ॥ ३५ ॥

देवमिवाऽऽचार्यमुपासीताविकथयन्नविमना वाचꣳ शुश्रूषमाणोऽस्य ॥ ३६ ॥

योऽयं देवं भजते स तद्भावनयाऽऽचार्यमुपासीत । अविकथयन् । व्यर्थाः कथा विकथाः । ता अकुर्वन् । अविमनाः । अविक्षिप्तमनाः । वाचमस्याऽऽचार्यस्य शुश्रूषमाणः ॥ ३६ ॥

अनुपस्थकृतः ॥ ३७ ॥

*उपस्थकरणं प्रसिद्धं तत्कृत्वा नोपासीत ॥ ३७ ॥

अनुवाति वीतः ॥ ३८ ॥

वातेऽनुवाति वीतो विपर्ययेण इत उपासीत । प्रतिवातं तु वक्ष्यमाणेन प्रतिषिध्यते । मनुरप्याह–प्रतिवातेऽनुवाते च नाऽऽसीत गुरुणा सह । इति ॥ ३८ ॥

अप्रतिष्टब्धः पाणिना ॥ ३९ ॥

पाणिना प्रतिष्टब्धो न स्यात् । पाणितलं भूमौ कृत्वा पाण्यालम्बनो नाऽऽसीत ॥ ३९ ॥

अनपश्रितोऽन्यत्र ॥ ४० ॥

अन्यत्र कुड्यादावाश्रितो न स्यात् । कुड्याद्यपश्रितो नाऽऽसीत ॥ ४० ॥

यज्ञोपवीती द्विवस्त्रः ॥ ४१ ॥

यदा द्विवस्त्रस्तदाऽन्यतरेण वाससा यज्ञोपवीती स्यात् । अथवा सूत्रमेवोपवीतार्थमित्येष विधिस्तदा न भवति ॥ ४१ ॥

अधोऽनिवीतस्त्वेकवस्त्रः ॥ ४२ ॥

यदा त्वेष एकवस्त्रो भवति तदाऽनिवीतः स्यात् । न तस्य दीर्घस्याप्येकदेशेनोत्तरीयम् ॥ ४२ ॥

---

* उपस्थ शब्द आसनाविशेषं ब्रूते । आकुञ्चितस्य सव्यजानुन उपरि दक्षिणपादप्रक्षेपं कृत्वा न सुखेनावस्थानं तदुपस्थकरणमिति । उपस्थं कृत्वा (तै. आ० २।११) इत्यत्र स्पष्टमित्यर्थः ।

अभिमुखोऽनभिमुखम् ॥ ४३ ॥

स्वयमाचार्याभिमुख आत्मानं प्रत्यनभिमुखमाचार्यमुपासीत । स्वयमाचार्यमेव पश्येत् । आचार्यस्य पुर आर्जवेनाऽऽसीत ॥ ४३ ॥

अनासन्नोऽनतिदूरे ॥ ४४ ॥

अनासन्नश्च स्यात् । अतिदूरे वा न स्यात् ॥ ४४ ॥

यावदासीनो बाहुभ्यां प्राप्नुयात् ॥ ४५ ॥

यावदन्तराल आसीन आचार्यो बाहुभ्यां प्राप्तुं शक्नुयात् तावत्यासीत ॥ ४५ ॥

अप्रतिवातम् ॥ ४६ ॥

आचार्यस्य प्रतिवातं नाऽऽसीत ॥ ४६ ॥

एकाध्यायी दक्षिणं बाहुं प्रत्युपसीदेत् ॥ ४७ ॥

यदैक एवाधीत आचार्यस्य दक्षिणं बाहुं प्रति दक्षिणपार्श्वे उपसीदेदुपविशेत् ॥४७॥

यथावकाशं बहवः ॥ ४८ ॥

बहवस्तु शिष्या यथावकाशमुपविशेयुः ॥ ४८ ॥

तिष्ठति च नान्वासीत नासनयोगविहिते ॥ ४९ ॥

आसनयोग आसनकल्पना । आसनयोगेन विहितः संभावित आसनयोगविहितः । नाऽऽसनयोगविहितो नासनयोगविहितः । आसनयोगेनासंभावित आचार्ये तिष्ठति च न स्वयमासीत ॥ ४९ ॥

आसीने च न संविशेत् ॥ ५० ॥

शयनयोगाविहित इति पूर्वानुसारेण गम्यते । शयनयोगेनासंभावित आचार्ये आसीने स्वयं न संविशेन्न शयीत ॥ ५० ॥

चेष्टति च चिकीर्षंस्तच्छक्तिविषये ॥ ५१ ॥

व्यत्ययेन परस्मैपदम् । आचार्ये चेष्टति स्वयमपि चिकीर्षन्स्यात् । किमविशेषेण । तच्छक्तिविषये शक्तितः शक्ते विषये । यद्याचार्येण क्रियमाणमात्मनः शक्तेर्विषयो भवति । चिकीर्षन्निति सन्प्रत्यययोगादिच्छामेव प्रदर्शयेत् । नाऽऽच्छिद्य कुर्यात् । प्रदर्शितायामिच्छा, यामाचार्यो यदनुजानीयात्तत्कुर्यात् । अशक्तविषये तु नेच्छाऽपि प्रदर्शयितव्या । चिकीर्षेदिति युक्तः पाठः ॥ ५१ ॥

न चास्य सकाशेऽन्ववस्थानिनमुपसंगृह्णीयात् ॥ ५२ ॥

आचार्यव्यतिरिक्ता गुरवोऽन्ववस्थानिन इति स्मार्तो व्यवहारः । आचार्यः श्रेष्ठो गुरूणामिति तमवेक्ष्यान्ववस्थानपदमेषामिति कृत्वाऽऽचार्यस्य संनिधावन्ववस्थानिनं नोपसंगृह्णीयात् ॥ ५२ ॥

गोत्रेण वा कीर्तयेत् ॥ ५३ ॥

न चैनमन्ववस्थानिनं गोत्रेणाभिजनकुलादिना कीर्तयेत्स्तुवीत । भार्गवोऽयं महाकुलप्रसूत इति ॥ ५३ ॥

न चैनं प्रत्युत्तिष्ठेदनूत्तिष्ठेद्वाऽपि चेदस्य गुरुः स्यात् ॥ ५४ ॥

प्रत्युत्थानमपि स्वयं न कर्तव्यमाचार्यस्य सकाशे । यदा पुनरसावाचार्यसकाश आसित्वा गमनायोत्तिष्ठति तदाऽनूत्थानमपि न कर्तव्यम् । यद्यप्यसावाचार्यस्य मातुलादिर्गुरुः स्यात्तदाऽऽचार्यस्य प्राचार्यसंनिपात इति पूजां वक्ष्यति तेनैव न्यायेन मातुलादिष्वपि प्रसङ्ग इदमुक्तम् ॥ ५४ ॥

देशात्त्वासनाच्च संसर्पेत् ॥ ५५ ॥

किंतु देशात्त्वासनाच्च संसर्पेत् । तस्य संमानार्थम् ॥ ५५ ॥

नाम्ना तदन्तेवासिनं गुरुमप्यात्मन इत्येके ॥ ५६ ॥

तस्याऽऽचार्यस्यान्तेवासिनं नाम्नैव कीर्तयेद्यज्ञशर्मन्निति । यद्यप्यसावात्मनो गुरुर्भवतीत्येवमेके मन्यन्ते । स्वपक्षस्तु गुरोर्नामग्रहणं न कर्तव्यमिति ॥ ५६ ॥

यस्मिँस्त्वनाचार्यसंबन्धाद्गौरवं वृत्तिरेव तस्मिन्नन्ववस्थानीयेऽप्याचार्यस्य ॥ ५७ ॥

यस्मिंस्तु पुरुषे शिष्याचार्यभावमन्तरेणापि विद्याचारित्रादिना लौकिकानां गौरवं तस्मिन्नन्ववस्थानीयेऽपि आचार्ये या वृत्तिः सा कर्तव्या । अन्ववस्थानीयेऽप्यन्ववस्थानिन्येव ॥ ५७ ॥

भुक्त्वा चास्य सकाशे नानुत्थायोच्छिष्टं प्रयच्छेत् ॥ ५८ ॥

अस्याऽऽचार्यस्य भुञ्जानस्याभुञ्जानस्य वा सकाशे भुक्त्वाऽनुत्थायोत्थापनमकृत्वोच्छिष्टं न प्रयच्छेत् । आचार्याय वा पर्यवदध्यादिति यद्विहितम् ॥ ५८ ॥

आचामेद्वा ॥ ५९ ॥

न प्रत्युत्थं आचमनमप्यनुत्थाय न कुर्यात् ॥ ५९ ॥

किं करवाणीत्यामन्त्र्य ॥ ६० ॥ (ख० ६) ।

आचम्य किं करवाणीति गुरुमामन्त्र्य ॥ ६० ॥ (ख० ६) ।

उत्तिष्ठेत्तूष्णीं वा ॥ ६१ ॥

विकल्पः । आमन्त्र्येति लिङ्गादुत्थायाप्याचमनं न कुर्यात् । आचार्यसकाश एव वाऽऽचामेत् ॥ ६१ ॥

नापपर्यावर्तेत गुरोः प्रदक्षिणीकृत्यापेयान्न प्रेक्षेत नग्नां स्त्रियम् ॥ ६२ ॥

उत्थाय कार्यवत्तया गन्तुमिच्छन्गुरोरपसव्यं न पर्यावर्तेत किंतु प्रदक्षिणीकृत्यापेयात् । स्त्रियं प्रेक्षमाणस्य मनसो विकारो भवति । तन्नग्नां नेक्षेत ॥ ६२ ॥

ओषधिवनस्पतीनाच्छिद्य नोपजिघ्रेत ॥ ६३ ॥

ओषधयः फलपाकान्ताः । वनस्पतयो ये पुष्पैर्विना फलन्ति । वीरुद्वृक्षाणामप्युपलक्षणम् । तेषां पत्रपुष्पे आच्छिद्य नोपजिघ्रेत् । आच्छिद्येति वचनाद्यादृच्छिके गन्धग्रहणे न दोषः ॥ ६३ ॥

उपानहौ छत्रं यानमिति वर्जयेत् ॥ ६४ ॥

यानं शकटादि । इतिशब्द एवंप्रकाराणामुपलक्षणार्थः । तत्र गौतमः—वर्जयेन्मधुमांसगन्धमाल्यदिवास्वापाञ्जनाभ्यञ्जनोपानच्छत्रकामक्रोधलोभमोहवादवादनस्नानदन्तधावनहर्षनृत्यगीतपरिवादभयानीति ॥ ६४ ॥

नोपजिघ्रेत्स्त्रियं मुखेन ॥ ६५ ॥

स्नातामनुलिप्तां वा स्त्रियं बालामपि मुखेन नोपजिघ्रेत् । मुखेनेति वचनाद्यादृच्छिकगन्धग्रहणे न दोषः ॥ ६५ ॥

न हृदयेन प्रार्थयेत ॥ ६६ ॥

हृदयेन मनसा स्त्रियं न प्रार्थयेत् । अपीयं मे स्यादिति ॥ ६६ ॥

नाकारणादुपस्पृशेत् ॥ ६७ ॥

कारणं विना स्त्रियं नोपस्पृशेत् । कारणं योक्त्रसंनहनविस्रंसनपतनधारणादि ॥ ६७ ॥

***रजस्वलो रक्तदन्सत्यवादी स्यादिति हि ब्राह्मणम् ॥ ६८ ॥**

---

* न स्मयेत यदि स्मयेतापिगृह्य स्मयेतेति हि ब्राह्मणम् । स्मितं न कुर्यात् । यदि तु हर्षातिरेकाद्धारयितुं न शक्नोति तदा हस्तेन मुखमपिगृह्य पिधाय स्मितं कुर्यादिति ब्राह्मणग्रन्थे स्थितमित्यधिकं क्वचित् ।

रजस्वलो मलिनगात्रः। रक्ता दन्ता यस्य स रक्तदन् । छान्दसो दत्रादेशः। पङ्किलदन्त इत्यर्थः। एतदुभयमपि उत्सन्नश्लाघ इत्यनेन गतमपि पुनरुच्यते, अतिक्रमे श्रौतप्रायश्चित्तप्राप्त्यर्थम् । अनृतं चोक्त्वेति प्रायश्चित्तं वक्ष्यति । सत्यवादी स्यादिति हि ब्राह्मणम् ॥ ६८ ॥

यां विद्यां गुरौ कुरुते तेऽप्यस्याऽऽचार्या ये तस्यां गुरोर्वंश्याः ॥ ६९ ॥

आत्मनो गुरौ यां विद्यां कुरुतेऽधीते तस्यां विद्यायां गुरोर्ये वंश्या आचार्यास्तेऽप्यस्य माणवकस्याऽऽचार्याः। यद्यपि साक्षात्तेभ्यो न गृह्यते विद्या तथाऽपि त आचार्यवदुपचरितव्याः । तस्यामिति वचनाद्विद्यान्तरे ये वंश्यास्तेषु नायं विधिः ॥ ६९ ॥

यानन्यान्पश्यतोऽस्याऽऽचार्य उपसंगृह्णीयात् तदात्वे त उपसंग्राह्याः ॥ ७० ॥

अस्य माणवकस्य पश्यतोऽस्मिन्माणवके पश्यति यानन्यानाचार्य उपसंगृह्णीयात् ते तस्य माणवकस्याप्युपसंग्राह्याः। किं सदा नेत्याह—तदात्वे तस्यां दशायाम् । अपर आह—तदाप्रभृति उपसंग्राह्याः। तु शब्दात्समावृत्तेनापीति ॥ ७० ॥

गुरुसमवाये भिक्षायामुत्पन्नायां यमनुबन्ध(द्ध)-स्तदधीना भिक्षा ॥ ७१ ॥

यदा द्वितीयं तृतीयं वा वेदमधीयानस्य माणवकस्य गुरुसमवायो भवति गुरवः समवेता भवन्ति तदा भिक्षायामुत्पन्नायां यं गुरुमिदानीमनुबन्धो(द्धो) यतोऽधीते तदधीना भिक्षा। यच्च यावच्च लब्धं तत्तस्मै निवेदयेत्। तदुक्तश्च विनियोगः ॥७१॥

समावृत्तो मात्रे दद्यात् ॥ ७२ ॥

कृतसमावर्तनो विवाहात्प्रागर्जितं मात्रे दद्यात् ॥ ७२ ॥

माता भर्तारं गमयेत् ॥ ७३ ॥

माता पतिं प्रापयेत् ॥ ७३ ॥

भर्ता गुरुम् ॥ ७४ ॥

सोऽपि भर्ता गुरुं प्रापयेत्। माणवकस्य गुरुम्। माणवकार्जितं द्रव्यं माणवकगुरुगामि युक्तम् ॥ ७४ ॥

धर्मकृत्येषूपयोजयेत् ॥ ७५ ॥

धर्मकृत्यानि विवाहादीनि तेषु चोपयोजयेत् । गुरोरभावे भर्ता तदभावे माता सर्वेषामभावे समावृत्तः स्वयमेव ॥ ७५ ॥

कृत्वा विद्यां यावतीं शक्नुयाद्वेददक्षिणामाहरेद्धर्मतो यथाशक्ति ॥ ७६॥

यावतीं विद्यां कर्तुं शक्नुयाद्वेदं वेदौ वेदान्वा तावतीं कृत्वाऽधीत्य गुरवे वेददक्षिणामाहरेद्दद्याद्यथाशक्ति धर्मतो लब्धां न्यायार्जिताम् ॥ ७६ ॥

धर्मत इत्यस्यापवादः—

विषमगते त्वाचार्य उग्रतः शूद्रतो वा ॥ ७७ ॥

यदा त्वाचार्यो विषमगत आपद्गतस्तदोग्रतः शूद्रतो वा प्रतिगृह्य दक्षिणामाहरेत् । वैश्याच्छूद्रायां जात उग्रः । उग्रकर्मा वा द्विजातिः ॥ ७७ ॥

सर्वदा शूद्रत उग्रतो वाऽऽचार्यार्थस्याऽऽहरणं धर्म्यमित्येके ॥ ७८ ॥

सर्वदाऽऽपद्यनापदि वाऽऽचार्यार्थस्याऽऽचार्याय योऽर्थो देयस्तस्योग्रतः शूद्रतो वाऽऽहरणं धर्म्यं धर्मादनपेतमित्येक आचार्या मन्यन्ते । धार्म्यमिति पाठे स्वार्थे ष्यञ् ॥७८॥

दत्त्वा च नानुकथयेत् ॥ ७९ ॥

आचार्यायैवमाहृत्य दत्त्वा न कीर्तयेदेवं मया दत्तमिति ॥ ७९ ॥

कृत्वा च नानुस्मरेत् ॥ ८० ॥

गुरवे प्राणसंशयादौ महान्तमुपकारं कृत्वा नानुस्मरेन्नानुचिन्तयेदहो मया तत्कृतमिति ॥ ८० ॥

आत्मप्रशंसां परगर्हामिति च वर्जयेत् ॥ ८१ ॥

इतिकरणादेवंप्रकाराणामात्मनिन्दादीनामपि प्रतिषेधः ॥ ८१ ॥

प्रेषितस्तदेव प्रतिपद्येत ॥ ८२ ॥

इदं कुर्वित्याचार्येण प्रेषितस्तदेव प्रतिपद्येत कुर्यात् । क्रियमाणमपि कर्म विहाय, यद्यपि तदाचार्यस्य भवति ॥ ८२ ॥

शास्तुश्चानागमाद्वृत्तिरन्यत्र ॥ ८३ ॥

तस्मिंश्चैव विद्याकर्मान्तमित्यस्यापवादः । यद्यधिगन्तुमिष्टा विद्या शास्तुः शासितुराचार्यस्य सम्यङ्नाऽऽगच्छति तदा तस्यानागमादन्यत्र पुरुषान्तरेऽपि प्रवृत्तिर्भवति । यस्य सम्यगागच्छति । येषामाचार्यकरणाविधिप्रयुक्तमध्ययनं तेषामेतन्नोपपद्यत इत्यवोचाम ॥८३॥

अन्यत्रोपसंग्रहणादुच्छिष्टाशनात्पादप्रक्षालनादित्याचार्यवदाचार्यदारे वृत्तिः ॥ ८४ ॥

अन्यत्रेत्युभयोरिति विशेषः । आचार्यवदाचार्यदारे वृत्तिः कर्तव्या । किमविशेषेण । न । अन्यत्रोपसंग्रहणमुच्छिष्टाशनपादप्रक्षालने । इतिकरणात्पादसंवाहनादिकं वर्जयित्वा । अत्र मनुः—गुरुपत्नी तु युवतिर्नाभिवाद्येह पादयोरिति । गौतमस्तु—तद्भार्यापुत्रशिष्येषु चैव नोच्छिष्टाशनः स्नानप्रसाधनपादप्रक्षालनोन्मर्दनोपसंग्रहणानीति । दार इत्येकवचनं छान्दसम् ॥ ८४ ॥

तथा समादिष्टो(ष्टे)ऽध्यापयति ॥ ८५ ॥

आचार्येण समादिष्टो यथा नियुक्तोऽध्यापयति । तस्मिन्नाचार्यवद्वृत्तिः । अध्यापयतीति वर्तमाननिर्देशाद्यावदध्यापनमेवातिदेशः ॥ ८५ ॥

वृद्धतरे च सब्रह्मचारिणि ॥ ८६ ॥

अध्यापयतीति नानुवर्तते । तरनिर्देशाज्ज्ञानवयोभ्यामधिको गृह्यते । सब्रह्मचारी सहाध्यायी । समाने ब्रह्मणि व्रतं चरति तस्मिन्नप्याचार्यवद्वृत्तिः ।

आचार्यात्पादमादत्ते पादं शिष्यः स्वमेधया ।
पादं सब्रह्मचारिभ्यः पादः कालेन पठ्यते ॥

इत्यध्ययने तदुपयोगसंभवात् ॥ ८६ ॥

उच्छिष्टाशनवर्जमाचार्यवदाचार्यपुत्रे वृत्तिः ॥ ८७ ॥

उच्छिष्टाशनवर्जमिति वचनादुपसंग्रहणं भवति । एतच्च ज्ञानवयोभ्यां वृद्धे । तदर्थं वृद्धतर इत्यनुवर्तयन्ति । गौतमे तूपसंग्रहणप्रतिषेधो वृद्धतरादन्यविषयः ॥ ८७ ॥

समावृत्तस्याप्येतदेव सामयाचारिकमेतेषु ॥ ८८ ॥ (ख० ७) ।

समावृत्तस्य कृतसमावर्तनस्याप्येतदेवानन्तरोक्तम् । एतेष्वाचार्यादिषु पुत्रान्तेषु सामयाचारिकं समयाचारप्रवृत्तिः स्यात् । समादिष्टे त्वध्यापयतीति विशेष उक्तः ॥ ८८ ॥ (ख० ७) ।

यथा ब्रह्मचारिणो वृत्तम् ॥ ८९ ॥

समावृत्तस्येति वर्तते । समावृत्तस्य ब्रह्मचारिणोऽकृतविवाहस्य यथा वृत्तं वर्तनं तथा वक्ष्यामः ॥ ८९ ॥

माल्यालिप्तमुख उपलिप्तकेशश्मश्रुरक्तोऽभ्यक्तो वेष्टिन्युपवेष्टिनी काञ्चुक्युपानही पादुकी ॥ ९० ॥

माली माल्यवान् । आलिप्तमुखश्चन्दनादिना । मुखग्रहणमुपलक्षणम् । मुखमग्रे ब्राह्मणो लिम्पेदित्याश्वलायनः । सुगन्धिभिरामलकादिभिर्द्रव्यैरुपलिप्तं संस्कृतं केशश्मश्रु यस्य

स उपलिप्तकेशश्मश्रुः । अक्तोऽञ्जनेनाक्ष्णोः । अभ्यक्तस्तैलेन । वेष्टिनी वेष्टितशिराः । कटिप्रदेशो द्वितीयेन वाससा वेष्टितो यस्य सोऽपवेष्टिनी । कञ्चुकमेव काञ्चुकम् ; तद्वान्काञ्चुकी । उपानही । व्रीह्यादित्वादिनिः । पादुके दारुमये पादरक्षणे तद्वान्पादुकी ॥ ९० ॥

उदाचारेषु चास्यैतानि न कुर्यात्कारयेत वा ॥ ९१ ॥

अस्याऽऽचार्यादेः पुत्रान्तस्योदाचारेषु दृष्टिगोचरेषु देशेष्वेतानि न कुर्यात्कारयेद्वा ॥ ९१ ॥

स्वैरिकर्मसु च ॥ ९२ ॥

एतानि न कुर्यात्कारयेद्वा ॥ ९२ ॥

तत्रोदाहरणम्—

यथा पादप्रक्षालनोत्सादनावलेखनानुलेपनानीति ॥ ९३ ॥

पादप्रक्षालनं पादधावनम् । उत्सादनमुद्वर्तनम् । अवलेखनं कङ्कतादिना केशानां विभागेनावस्थापनम् । अनुलेपनं चन्दनादिना । इतिशब्दः प्रदर्शनार्थः । तेन स्नानभोजनमूत्रोच्चारणादिष्वपि प्रतिषेधः ॥ ९३ ॥

तद्द्रव्याणां च न कथयेदात्मसंयोग आचार्यः ॥ ९४ ॥

तस्य शिष्यस्य गृहस्थीभूतस्य यानि द्रव्याण्युपस्थापितानि तेषां मध्य एकेनापि द्रव्येण यथाऽऽत्मा संयुज्यते तथा न कथयेत् । आचार्यः शिष्यगृहं प्रति आगतो, यथा अहो दर्शनीयं भोजनपात्रमित्यादिना परं लिप्सा यथा गम्यते तथा न कथयेदिति ॥ ९४ ॥

स्नातस्तु काले यथाविध्यभिहृतमाहूतोऽभ्येतो वा न प्रतिसंहरेदित्येके ॥ ९५ ॥

अधीत्य वेदं स्नानमितीत्यनेन विधिना स्नातस्तस्मिन्काले यथाविध्यभिहृत आबद्धस्रगादिराचार्येणाऽऽहूतः स्वयमेव वा तत्समीपमभ्येतो न प्रतिसंहरेन्न विमुञ्चेदित्येके मन्यन्ते । स्वपक्षस्तु तदपि प्रतिमुञ्चति । काले यथाविध्यभिहृतमिति वचनादपरेद्युरारभ्य प्रतिसंहरेदेव ॥ ९५ ॥

उच्चैस्तरां नाऽऽसीत ॥ ९६ ॥

स्वार्थे तरप् । आचार्यस्याऽऽसनादुच्चासने नाऽऽसीत ॥ ९६ ॥

तथा बहुपादे ॥ ९७ ॥

नीचेऽप्यासने बहुपादे नाऽऽसीत तथा ॥ ९७ ॥

सर्वतः प्रतिष्ठिते ॥ ९८ ॥

आसने त्वासीत । आचार्यं पीठादावुपवेश्य स्वयं वेत्रासनादावासीत । तद्धि भूमौ सर्वतः प्रतिष्ठितम् ॥ ९८ ॥

शय्यासने चाऽऽचरिते नाऽऽविशेत् ॥ ९९ ॥

आचार्येणाऽऽचरित उपभुक्ते शय्यासने नाऽऽविशेत् । शयने न शयीत । आसने नाऽऽसीत । वेत्रादिष्वपि समानम् । मनुरविशेषेणाऽऽह— शय्यासने वाऽध्युषिते श्रेयसां न समाचरेदिति । गतं समावृत्तस्य वैशेषिकम् ॥ ९९ ॥

अथ ब्रह्मचर्यविधेरेव शेषः—

यानमध्वन्युक्तोऽन्वारोहेत् ॥ १०० ॥

यानं शकटादि, आरोहेत्युक्तो गुरुणा पश्चादारोहेत् । छत्रं यानमिति वर्जयेदिति पूर्वोक्तस्य प्रतिषेधस्यापवादः । यानं च गुर्वारूढमन्यद्वा ॥ १०० ॥

सभानिकषकटस्वस्तरांश्च ॥ १०१ ॥

उक्तोऽन्वारोहेदित्येव । सभाः समाजांश्चेत्यस्यापवादार्थं सभाग्रहणम् । निकषो नाम कृषीवलानामुपकरणम् । कृष्टक्षेत्रं समीक्रियते येन तत् । तच्च कस्मिंश्चिदारूढे केनचिदाकृष्यते । तत्र गुरुणाऽऽकृष्यमाणे तेनोक्तः सन्नारोहेत् । न त्वनौचित्यभयान्नाऽऽरोहेदिति । कटो वीरणनिर्मिता शय्या । तत्र गुरुणोक्तः सन्नासीत । उत्सवादावेष आचारः । स्वस्तरो नाम पलालशय्या । नवस्वस्तरे संविशतीति दर्शनात् । तत्रापि गुरुणोक्तः सन् सहासनादि कुर्यात् ॥ १०१ ॥

नानभिभाषितो गुरुमभिभाषेत प्रियादन्यत् ॥ १०२ ॥

गुरुणाऽनभिभाषितो गुरुं प्रति न किंचिद्ब्रूयात् प्रियादन्यत् । प्रियं तु ब्रूयात् । यथा पुत्रो जात इति ॥ १०२ ॥

व्युपतोदव्युपजापव्यभिहासोदाभन्त्रणनामधेयग्रहणप्रैषणानीति गुरोर्वर्जयेत् ॥ १०३ ॥

व्युपतोदोऽङ्गुल्यादिना संघट्टनं यदाभिमुख्यार्थं क्रियते । व्युपजापः कर्णयोर्मुहुर्जल्पनम् । वकारश्छान्दसः । अपपाठो वा । व्यभिहास आभिमुख्येन हसनम् । उदामन्त्रणमुच्चैः संबोधनम् । यथा बधिरं प्रति । नामधेयग्रहणं द्वादश्यां(साहे) विहितस्य नाम्नो ग्रहणम् । न पूज्यनाम्नो भगवदादेः । प्रैषणमाज्ञापनम् । एतानि गुरुविषये न कर्तव्यानि । इतिकरणादेवंप्रकाराणामन्येषामपि प्रतिषेधः । यथा ऽऽह मनुः—

नोदाहरेदस्य नाम परोक्षमपि केवलम् । न चैवास्यानुकुर्वीत गतभाषितचेष्टितमिति ॥ १०३॥

आपद्यर्थे ज्ञापयेत् ॥ १०४ ॥

आपदि व्युपतोदादिभिरर्थमाभेप्रेतं ज्ञापयेत् । असति पुरुषान्तरे वचनेनापि बोद्धव्यो न साक्षात्प्रेषयेत् । यथा-शूलतोदो मे भवति। स चाग्निना शाम्यति। न चात्र कश्चित्संनिहितः । किं करोमि मन्दभाग्य इति ॥ १०४ ॥

उत्तरे सूत्रे समावृत्तविषये—

सह वसन्सायंप्रातरनाहूतो गुरुदर्शनार्थो गच्छेत् ॥ १०५ ॥

एकस्मिन्ग्रामे वसन् सायंप्रातरनाहूतोऽपि गुरुदर्शनार्थो नान्यप्रयोजनो गच्छेत् ॥

प्रोष्य च तदहरागतः ॥ १०६ ॥

यदा ग्रामान्तरं गतः प्रत्यागच्छति तदा तदहरेवाऽऽचार्यं गच्छेत् ॥ १०६ ॥

आचार्यप्राचार्यसंनिपाते प्राचार्यायोपसंगृह्योपसंजिघृक्षेदाचार्यम् ॥१०७॥

आचार्यस्याऽऽचार्यः प्राचार्यः । प्रपितामहवत् । यदाऽऽचार्यस्य प्राचार्यस्य च संनिपातो मेलनं भवति तदा प्राचार्याय । द्वितीयार्थे चतुर्थी । प्राचार्यं पूर्वमुपसंगृह्य स्वाचार्यमुपसंग्रहीतुमिच्छेत् । न केवलं मनसा किंतु यथाऽऽचार्यो जानाति तथाऽवेक्षेत । अन्यथाऽदृष्टार्थमुपदिष्टं स्यात् ॥ १०७ ॥

प्रतिषेधयेदितरः ॥ १०८ ॥

इतर आचार्यः प्रतिषेधयेत् । वत्स मोपसंग्रहीरिति ॥ १०८ ॥

लुप्यते पूजा चास्य सकाशे ॥ १०९ ॥

अन्यस्य प्राचार्यस्य संनिधावस्याऽऽचार्यस्य पूजा लुप्यते न कार्या । न केवलमुपसंग्रहणमेव ॥ १०९ ॥

उत्तरं समावृत्तविषयम्—

मुहुस्त्वाचार्यकुलदर्शनार्थो गच्छेद्यथाशक्त्यधिहस्त्यमादायापि दन्तप्रक्षालनानीति ॥ ११० ॥

वीप्सालोपश्चात्र द्रष्टव्यः । मुहुर्मुहुरिति विवक्षितम् । ग्रामान्तरे वसन्नपि मुहुर्मुहुराचार्यकुलदर्शनार्थो गच्छेत् । यथाशक्ति गोरसापूपादि अधिहस्त्यमादाय । हस्ते भवमादाय । स्वयमेव गृहीत्वेत्यर्थः । अपिशब्दोऽभावेऽपि विधिं द्योतयति । गोरसाद्यभावे +दन्तप्रक्षालनान्यपीति । इतिशब्दोऽन्तेवासिधर्माणां समाप्तिद्योतनार्थः ॥ ११० ॥

तस्मिन्गुरोर्वृत्तिः ॥ १११ ॥

तस्मिन्नन्तेवासिनि गुरोर्वृत्तिप्रकारो वक्ष्यते ॥ १११ ॥

+ मातरं पितरमाचार्यमग्निं गृहाणि च रिक्तपाणिर्नोपगच्छेत् । इत्यधिकमन्यत्र सूत्रे ।

पुत्रमिवैनमनुकाङ्क्षन्सर्वधर्मेष्वनपच्छादयमानः सुयुक्तो विद्यां ग्राहयेत् ॥ ११२ ॥

एनं शिष्यं पुत्रमिवास्याभ्युदयः स्यादित्यनुकाङ्क्षन्सर्वेषु धर्मेषु किंचिदप्यनपच्छादयन्नविगूहन् सुयुक्तः सुष्ठ्वहितस्तत्परो भूत्वा विद्यां ग्राहयेत् ॥ ११२ ॥

न चैनमध्ययनविघ्नेनाऽऽत्मकार्येष्वत्युपरुन्ध्यादनापत्सु ॥ ११३ ॥

न चैनं शिष्यमध्ययनविघ्नेनाऽऽत्मप्रयोजनेषूपरुन्ध्यादनापत्सु । उपरोधोऽस्वतन्त्रीकरणम् । अनापत्स्विति वचनादापद्यध्ययनविघातेनाप्युपरोधे न दोषः ॥ ११३ ॥

अन्तेवास्यनन्तेवासी भवति विनिहितात्मा गुरावनैपुण्यमापद्यमानः ॥ ११४ ॥

आपद्यमान इत्यन्तर्भावितण्यर्थः । योऽन्तेवासी विनिहितात्मा द्वयोराचार्ययोर्विविधं निहितात्मा गुरावनैपुण्यमापादयति नानेनायं प्रदेशः सम्यगुक्त इति सोऽन्तेवासी न भवति स त्याज्य इत्यर्थः । अपर आह—योऽन्तेवासी वाङ्मनकर्मकायैरनैपुण्यमापद्यमानो गुरोर्विलदृशा निहितात्मा भवत्यनुरूपं न शुश्रूषते सोऽन्तेवासी न भवति ॥ ११४ ॥

आचार्योऽप्यनाचार्यो भवति श्रुतात्परिहरमाणः ॥ ११५ ॥

आचार्योऽप्यनाचार्यो भवतीत्यर्थः । किं कुर्वन् । श्रुतात्परिहरमाणः । तेन तेन व्याजेन विद्याप्रदानमकुर्वन् ॥ ११५ ॥

अपराधेषु चैनꣳ सततमुपालभेत ॥ ११६ ॥

अपराधेषु कृतेष्वेनं शिष्यं सततमुपालभेत । इदमयुक्तं त्वया कृतमिति ॥ ११६ ॥

अभित्रासोपवासोदकोपस्पर्शनान्यदर्शनमिति दण्डा यथामात्रमा निवृत्तेः ॥ ११७ ॥

अभित्रासो भयोत्पादनम् । उपवासो भोजनलोपः । उदकोपस्पर्शनं शीतोदकेन स्नानम् । अदर्शनं यथाऽसावात्मानं न पश्यति तथा करणं गृहप्रवेशनिषेधः । सर्वत्र ण्यन्तात्प्रत्ययः । इत्येते दण्डाः शिष्यस्य यथामात्रं यथापराधं तदनुरूपं व्यस्ताः समस्ताश्चाऽऽनिवृत्तेर्यावदसौ ततोऽपराधान्निवर्तते तावदेते दण्डाः ॥ ११७ ॥

निवृत्तं चरितब्रह्मचर्यमन्येभ्यो धर्मेभ्योऽनन्तरो भवेत्यतिसृजेत् ॥ ११८ ॥

इति सत्याषाढहिरण्यकेशिश्रौतसूत्रे (धर्मसूत्रापरपर्याये) षड्विंशप्रश्ने द्वितीयः पटलः ।

एवं चरितब्रह्मचर्यं निवृत्तं गुरुकुलात् । कृतसमावर्तनमित्यर्थः । एवंभूतमेनमन्येभ्यो धर्मेभ्यो यमसावाश्रमं प्रविवत्साति तत्रस्थेभ्यो धर्मेभ्योऽनन्तरो भव तेभ्यो यथा त्वमन्तरितो न भवसि तथा भवेत्युक्त्वा विसृजेत् ॥ ११८ ॥

इति श्रीमन्महादेवदीक्षितविरचितायां हिरण्यकेशिधर्मसूत्रव्याख्यायामुज्ज्वलायां षड्विंशप्रश्ने द्वितीयः पटलः ॥ २ ॥

(अथ तृतीयः पटलः ।

श्रावण्यां पौर्णमास्यामध्यायमुपाकृत्य मासं प्रदोषे नाधीयीत ॥ १ ॥

एवमध्येतुरध्यापयितुश्च धर्मा उक्ताः । अथ देशकालकृता अध्ययनधर्मा उच्यन्ते ।

मेषादिस्थे सवितरि यो यो दर्शः प्रवर्तते ।
चान्द्रमासास्तदन्ताः स्युश्चैत्राद्या द्वादश स्मृताः ॥
तेषु या या पौर्णमासी सा सा चैत्र्यादिका स्मृता ।
कादाचित्केन योगेन नक्षत्रस्येति निर्णयः ॥

तदेवं सिंहस्थे सवितरि याऽमावास्या तदन्ते चान्द्रमासे या मध्यवर्तिनी पौर्णमासी सा श्रावणी । श्रवणयोगस्तु भवतु मा वा । तस्यां श्रावण्यां पौर्णमास्यामध्यायमुपाकृत्य गृह्योक्तेन विधिनोपाकर्म कृत्वा स्वाध्यायमधीयीत । अधीयानश्च मासमेकं प्रदोषे नाधीयीत । प्रथमे रात्रिभागे नाधीयीत । ग्रहणाध्ययनं धारणाध्ययनं च न कुर्यात् । प्रदोषग्रहणाद्रात्रावप्यूर्ध्वं न दोषः ॥ १ ॥

*** तैषीपक्षस्य रोहिण्यां विरमेत् ॥ २ ॥**

गृह्योक्तेन विकल्पः । अनयोः पक्षयोः पञ्च मासानधीते ॥ २ ॥

अर्धपञ्चमांश्चतुरो मासानित्येके ॥ ३ ॥

अर्धः पञ्चमो येषां तेऽर्धपञ्चमाः । अर्धाधिकांश्चतुरो मासानधीयीतेत्येवमेके मन्यन्ते । अस्मिन्पक्षे प्रोष्ठपद्यामुपाकरणम् । शास्त्रान्तरदर्शनात् । उत्सर्जनस्य चापकर्षः । उत्सर्जने च कृते श्रावण्याः प्राक्शुक्लपक्षेषु धारणाध्ययनं वेदस्य । कृष्णपक्षेषु व्याकरणाद्यङ्गाध्ययनम् । पुनः श्रावण्यामुपाकृत्यागृहीतस्य ग्रहणाध्ययनमिति ॥ ३ ॥

---

* तिष्यः पुष्यः । तेन युक्ता पौर्णमासी तैषी । श्रावणीवत् । तादृशपौर्णमास्युपलक्षितपौषमासीयशुक्लपक्षस्य पुष्यात्पूर्वभाविन्यां रोहिण्यां नक्षत्रे विरमेदुत्सर्जनं कुर्यादित्यर्थः । तत्प्रयोगोऽपि गृह्योक्त एवेति बोध्यम् ।

निगमेष्वध्ययनं वर्जयेत् ॥ ४ ॥

निगमा वणिक्पथाश्चत्वारो निर्गमनमार्गा वा । नियमेन गम्यते येष्विति । तेषु सर्वप्रकारमध्ययनं वर्जयेत् ॥ ४ ॥

आनडुहेन शकृत्पिण्डेनोपलिप्तेऽधीयीत ॥ ५ ॥

अनडुत्संबन्धिना शकृत्पिण्डेनोपलिप्य निगमेऽप्यधीयीत ॥ ५ ॥

श्मशाने सर्वतः शम्याप्रासात् ॥ ६ ॥

श्मशाने वाऽध्ययनं वर्जयेत्सर्वासु दिक्षु शम्याप्रासात् । पञ्चमीनिर्देशादर्वागिति गम्यते । शम्या क्षिप्ता यावति देशे पतति ततोऽर्वागिति ॥ ६ ॥

ग्रामेणाध्यवसिते क्षेत्रेण वा नानध्यायः ॥ ७ ॥

यदा श्मशानं ग्रामतया क्षेत्रतया वाऽध्यवसितं स्वीकृतं भवति तदानीं नानध्यायः । अध्येतव्यमेव ॥ ७ ॥

ज्ञायमाने तु तस्मिन्नेव देशे नाधीयीत ॥ ८ ॥

तथाऽध्यवसिते गृहे श्मशानं ज्ञायतेऽयं प्रदेश इति तदा तावत्येव प्रदेशे नाधीयीत । न शम्याप्रासादर्वाक् ॥ ८ ॥

श्मशानवच्छूद्रपतितौ ॥ ९ ॥

शूद्रपतितसकाशेऽपि शम्याप्रासादर्वाङ् नाध्येयम् ॥ ९ ॥

समानागार इत्येके ॥ १० ॥

एके मन्यन्ते समान एवागारे शूद्रपतितौ वर्ज्यौ न शम्याप्रासादिति ॥ १० ॥

शूद्रायां तु प्रेक्षणप्रतिप्रेक्षणयोरेवानध्यायः ॥ ११ ॥

शूद्रायां तु यदा परस्परं प्रेक्षणं भवति तदैवानध्यायो न समानागारे न शम्याप्रासादिति ॥ ११ ॥

तथाऽन्यस्याᳪ स्त्रियां वर्णव्यतिक्रान्तायां मैथुने ॥ १२ ॥

शूद्रव्यतिरिक्ताऽपि या स्त्री मैथुने वर्णव्यतिक्रान्ता नीचवर्णगामिनी तस्यामपि प्रेक्षणप्रतिप्रेक्षणयोरेवानध्यायः ॥ १२ ॥

ब्रह्माध्येष्यमाणो मलवद्वाससेच्छन्संभाषितुं ब्राह्मणेन संभाष्य

तया संभाषेत संभाष्य तु तया ब्राह्मणेनैव संभाष्याधीयीतैवं तस्याः प्रजानिःश्रेयसम् ॥ १३ ॥

यो वेदमध्येष्यमाणो मलवद्वाससा रजस्वलया सह संभाषितुमिच्छति स पूर्वं ब्राह्मणेन संभाष्य पश्चात्तया संभाषेत । संभाष्य च तया ब्राह्मणेनैव संभाष्याधीयीत । किमेवं सति भवति । एवं तस्या मलवद्वाससा आगामिनी या प्रजा तस्या निःश्रेयसमभ्युदयो भवति । प्रजारूपं वा निःश्रेयसं तस्या अपि भवति । प्रजानिःश्रेयसमिति वचनाद्द्विभवाभिः संभाषणे नैतत्कर्तव्यम् ॥ १३ ॥

अन्तःशवम् ॥ १४ ॥

अन्तःशवे ग्रामे नाध्येतव्यम् । एतेनान्तश्चाण्डालमिति व्याख्यातम् ॥ १४ ॥

अन्तश्चाण्डालम् ॥ १५ ॥

चण्डाल एव चाण्डालः । उभयत्र प्रथमा सप्तम्यर्थे । अव्ययीभावो वा विभक्त्यर्थे द्रष्टव्यः ॥ १५ ॥

अभिनिर्हृतानां च सीम्न्यनध्यायः ॥ १६ ॥

यदा तु शवाः सीम्न्यभिहृता भवन्ति तदा तत्रानध्यायः ॥ १६ ॥

संदर्शने चारण्ये ॥ १७ ॥

अरण्ये च यावति प्रदेशे शवश्चण्डालो वा दृश्यते तावत्यनध्यायः ॥ १७ ॥

तदहरागतेषु च ग्रामं बाह्येषु ॥ १८ ॥

बाह्या उग्रनिषादादयः परिपन्थिनः । तेषु च ग्राममागतेषु तदहरनध्यायः । तस्मिन्नहनि नाध्येतव्यम् ॥ १८ ॥

अपि सत्सु ॥ १९ ॥

विद्याचरित्रादिभिर्महान्तः सन्तः । तेष्वपि ग्राममागतेषु तदहरनध्यायः ॥ १९ ॥

संधावनुस्तनिते रात्रिम् ॥ २० ॥

संधिः संध्या । तस्मिन्संधावनुस्तनिते मेघगर्जिते सति सर्वां रात्रिं नाधीयीत ॥ २० ॥

वर्षर्ताविदम् ॥ २१ ॥

अन्यस्मिन्नधिकं वक्ष्यति ॥ २१ ॥

स्वप्नपर्यान्तं विद्युति ॥ २२ ॥

स्वप्नपर्योन्तम् । अन्त्यो दीर्घ उपान्त्यो ह्रस्वः । विपर्यासश्छान्दसः । अपपाठो वा । संधौ विद्युति सत्यां स्वप्नपर्यन्तां रात्रिमनध्यायः । न सर्वाम् । स्वप्नपर्यन्ता रात्रिः प्रहरावशिष्टा ॥ २२ ॥

एवं सायंसंध्यायामुक्तम् । प्रातःसंध्यायामाह—

उपव्युषं यावता वा कृष्णां रोहिणीमिति शम्याप्रासाद्विजानीयादेतास्मिन्काले विद्योतमाने सप्रदोषमहरनध्यायः ॥ २३ ॥

उषःसमीपमुपव्युषम् । तत्र विद्युति सत्यामपरेद्युः सप्रदोषमहरनध्यायः । प्रदोषादूर्ध्वमध्येयम् । यावता कालेन शम्याप्रासादवस्थितां गां कृष्णामिति वा रोहिणीमिति वा विजानीयात्तस्मिन्काल उपव्युषे वा विद्योतमान इत्यन्वयः । रोहिणी गौरवर्णा । इतिशब्दप्रयोगे द्वितीया प्रयुज्यते । तत्रान्वयप्रकारश्चिन्त्यः ॥ २३ ॥

दह्रे चापररात्रे स्तनयित्नुना ॥ २४ ॥

रात्रेस्तृतीयो भागः सर्वोऽपररात्रः । तस्य त्रेधा विभक्तस्याऽऽद्योंऽशो महारात्रः । तदन्त्यो दह्रः । तस्मिन्दह्रेऽपररात्रे स्तनयित्नुना निमित्तेन सप्रदोषमहरनध्यायः ॥२४॥

ऊर्ध्वमर्धरात्रादित्येके ॥ २५ ॥

अर्धरात्रादूर्ध्वमनन्तररात्रावधिरित्येके मन्यन्ते । स्वपक्षस्तु दह्र एवेति ॥ २५ ॥

गवां चावरोधे ॥ २६ ॥

दस्युप्रभृतिभिरवरुद्धासु गोषु तावन्तं कालमनध्यायः । अवरोधो ग्रामान्निर्गमननिरोधः ॥ २६ ॥

वध्यानां च यावता हन्यन्ते ॥ २७ ॥

वधार्हाणां चोरादीनामवरोधो यावता कालेन ते हन्यन्ते यावन्तं कालमनध्यायः ॥ २७ ॥

पृष्ठारूढः पशूनां नाधीयीत तावन्तं कालम् ॥ २८ ॥

हस्त्यश्वादीनां पशूनां पृष्ठमारूढस्तत्राऽऽसीनः सन्नाधीयीत तावन्तं कालम् ॥२८॥

अहोरात्रावमावास्यासु ॥ २९ ॥ (ख० ९) ।

अमावास्यासु द्वावहोरात्रौ नाधीयीत । तासु च पूर्वेद्युश्चतुर्दशीषु । तथा च मनुः— अमावास्याचतुर्दश्यौ पौर्णमास्यष्टकासु चेति ॥ २९ ॥ (ख० ९) ।

चातुर्मासीषु च ॥ ३० ॥

चतुर्षु चतुर्षु मासेषु भवाश्चातुर्मास्यः । संज्ञैषा तिसृणां पौर्णमासीनाम् । यासु चातुर्मास्यानि क्रियन्ते । काः पुनस्ताः । फाल्गुन्याषाढीकार्तिक्यः । चातुर्मास्याख्ये यज्ञे तत्र भवे च संज्ञायामण् । चातुर्मासीषु च पूर्ववद्द्वावहोरात्रावनध्यायः । गौतमस्तु स्वशब्देनाऽऽह—कार्तिकी फाल्गुन्याषाढी पौर्णमासीति । पौर्णमास्यन्तरे प्रतिपत्सु च शास्त्रान्तरादनध्यायः । यथाऽऽहोशना—पर्वणीतिहासवर्जितानां विद्यानामनध्यायः । प्रतिपत्सु न चिन्तयेदिति । एवं चतुर्दशीवर्जने शास्त्रान्तरं मूलम् । तत्र याज्ञवल्क्यः—पञ्चदश्यां चतुर्दश्यामष्टम्यां राहुसूतक इति ॥ ३० ॥

वैरमणे गुरुष्वष्टक्य औपाकरण इति त्र्यहाः ॥ ३१ ॥

विरमणमुत्सर्जनम् । तदेव वैरमणम् । तस्मिन्वैरमणे । प्रथमान्तपाठे सप्तम्यर्थे प्रथमा । गुरुषु श्वशुरादिषु संस्थितेष्विति प्रकरणाद्गम्यते । अष्टकैवाष्टक्यम् । स्वार्थे ष्यञ् । आदौ प्राप्ता वृद्धिर्मध्ये(र्ने) कृता । उपाकरणमेवौपाकरणः । एषु निमित्तेषु त्र्यहा अध्ययनरहिताः । तत्र गुरुमरणदिनादारभ्य त्र्यहाः । इतरेषु पूर्वेद्युरपरेद्युस्तस्मिंश्च दिने नाधीयीत । अत्र गौतमः—तिस्रोऽष्टकास्त्रिरात्रमभितो वार्षिकमिति । उपाकरणादूर्ध्वं प्रागुत्सर्जनाद्यदध्ययनं तद्वार्षिकम् । तदभितस्तस्याऽऽदावन्ते च यत्कर्म क्रियते तत्रापि त्रिरात्रमित्यर्थः । औशनसे च व्यक्तम्—उपाकरणे चोत्सर्जने च त्र्यहमनध्याय इति । मानवे च व्यक्तम्—उपाकर्मणि चोत्सर्गे त्रिरात्रं क्षपणं स्मृतमिति ॥ ३१ ॥

तथा संबन्धेषु ज्ञातिषु ॥ ३२ ॥

संनिकृष्टा ये ज्ञातयो भ्रात्रादयस्तेष्वपि मृतेषु त्र्यहमनध्यायः । ब्रह्मचारिणो विधिरयम् । आशौचवतां तु यावदाशौचमनध्यायः शास्त्रान्तरसिद्धः । तत्र मनुः—

> उभयत्र दशाहानि कुलेऽस्यान्नं न भुज्यते ।
> दानं प्रतिग्रहो यज्ञः स्वाध्यायश्च निवर्तते ॥ इति ।

उभयत्र जनने मरणे च ॥ ३२ ॥

मातरि पितर्याचार्य इति द्वादशाहाः ॥ ३३ ॥

मात्रादिषु मृतेषु द्वादशाहमनध्यायः । अयं विधिर्गृहस्थानामपि । केचिद्यावदाशौचं तावन्तं कालमितीच्छन्ति । नेति वयम् । अनध्यायप्रकरणात् ॥ ३३ ॥

तेषु चोदकोपस्पर्शनं तावन्तं कालम् ॥ ३४ ॥

मात्रादिष्वधिकं तावन्तं कालमहरहः स्नानमपि कार्यं न केवलमनध्यायः ॥ ३४ ॥

अनुभाविनां तु परिवापनम् ॥ ३५ ॥

अनु पश्चाद्भूता जाता अनुभाविनः । मृतापेक्षयाऽनुभाविनोऽवरवयसस्तेषां परिवापनमपि भवति । परिवापनं केशानां कृन्तनम् । कृन्तन इति प्राप्तस्य णत्वस्य णेर्विभाषेति विकल्पः । अन्ये तु शावदुःखमनुभाविनां सर्वेषां परिवापनमिच्छन्ति । अपर आह—अनुभाविन उदकार्हास्तेषां मरणे परिवापनमिति ॥ ३५ ॥

न समावृत्ता वपेरन्नन्यत्र विहारिण इत्येके ॥ ३६ ॥

विहारो यज्ञदीक्षा साऽस्यास्तीति विहारी । तस्मादन्ये ततोऽन्यत्र न समावृत्ता वपेरन्नित्येके मन्यन्ते । स्वपक्षस्तु वपेरन्नेवेति ॥ ३६ ॥

तत्र वपनस्यामङ्गलत्वं गुणविधिना परिहारं च वक्तुं ब्राह्मणमुदाहरति—

तथाऽप्युदाहरन्ति रिक्तो वा एषोऽनपिहितो यन्मुण्डस्तस्यैतदपिधानं यच्छिखेति ॥ ३७ ॥

रिक्तोऽन्तःशून्यो घटादिः । सोऽनपिहितः पिधानरहितो यादृशस्तादृश एष यन्मुण्डो नाम । तस्य रिक्तस्य पिधानमेतद्यच्छिखा नामेति । अनेन चैतद्दर्शितं निषेधशास्त्रं सह शिखया वपनप्रतिषेधपरमिति ॥ ३७ ॥

कथं तर्हि सत्रेषु तु शिखाया वपनं वचनसामर्थ्यादित्याह—

सत्रेषु तु वचनाद्वापनं शिखायाः ॥ ३८ ॥

गतः ॥ ३८ ॥

आचार्ये त्रीनहोरात्रानित्येके ॥ ३९ ॥

आचार्ये संस्थिते त्रीनहोरात्रानध्ययनं वर्जयेदित्येके मन्यन्ते । स्वपक्षस्तु द्वादशाहः पूर्वोक्तः ॥ ३९ ॥

श्रोत्रियसंस्थायामपरिवत्सरायामेकाम् ॥ ४० ॥

श्रोत्रियं वक्ष्यति । तस्य संस्थायामपरिपूर्णसंवत्सरायां श्रुतायामेकां रात्रिमेकाहोरात्रमध्ययनं वर्जयेत् । अत्र संस्थाश्रवणाद्दूर्वादिष्वपि सैव निमित्तम् ॥ ४० ॥

सब्रह्मचारिणीत्येके ॥ ४१ ॥

एके तु सब्रह्मचारिणो मरण एवमनन्तरोक्तमनध्यायमिच्छन्ति ॥ ४१ ॥

श्रोत्रियाभ्यागमेऽधिजिगाँसमानोऽधीयानो वाऽनुज्ञाप्याधीयीताध्यापयेद्वा ॥ ४२ ॥

श्रोत्रिय आगतेऽध्येतुकामे ऽधीयानश्च तमनुज्ञाप्याधीयीत । अध्यापनमपि श्रोत्रिये संनिहित एवमेव ॥ ४२ ॥

गुरुसंनिधौ चाधीहि भो इत्युक्त्वाऽधीयीताध्यापयेद्वा ॥ ४३ ॥

गुरुसंनिधौ विशेषो यदधीहि भो इत्येनमनुज्ञाप्याधीयीत । स्वयमाचार्यो गुरावाचार्येऽधीहि भो इत्यनुज्ञाप्याध्यापयेत् । गुरुशिष्ययोर्गुरावुभयोरप्यधीहि भो इति ॥ ४३ ॥

उभयत उपसंग्रहणमधिजिगाँसमानस्याधीत्य च ॥ ४४ ॥

उभयतोऽध्ययनस्याऽऽदावन्ते चोपसंग्रहणं कर्तव्यम् । अध्येतुकामस्याऽऽदावधीत्यान्ते ॥ ४४ ॥

अधीयानेषु वा यत्रान्यो व्यवेयादेतमेव शब्दमुत्सृज्याधीयीत ॥ ४५ ॥

बहुवचनमतन्त्रम् । अधीयानेषु वा यत्रान्यो व्यवेयादध्येतॄणामन्तरा गच्छेत्तत्राधीहि भो इत्येतमेव शब्दमुत्सृज्योच्चार्याधीयीत । प्रत्येकमुपदेशादेकवचनम् । अधीयीरन्नित्यर्थः ॥ ४५ ॥

श्वगर्दभनादाः सलावृक्येकसृकोलूकशब्दाः सर्वे वादितशब्दा रोदनगीतसामशब्दाश्च ॥ ४६ ॥

शुनां गर्दभानां बहूनां नादाः । बहुवचननिर्देशात् । सलावृकी वृकजात्यवान्तरभेदः । क्रोष्ट्रीत्यन्ये । लिङ्गस्याविवक्षितत्वात्पुंसोऽपि ग्रहणम् । इन्द्रो यतीन्सालावृकेभ्यः प्रायच्छदित्यादिनिर्देशात् । सर्वत्राऽऽदिस्वरो दीर्घः स एवायं विकृतः प्रयुक्तः । एकसृक इत्येकचरः सृगालः । उलूको दिवाभीतः । एषां च शब्दाः । वादितानि वादित्राणि वीणावेणुमृदङ्गादीनि । तेषां च सर्वे शब्दा रोदनशब्दा गीतशब्दाः सामशब्दाश्च । एते श्रूयमाणा अनध्यायहेतवः ॥ ४६ ॥

शाखान्तरे च साम्नामनध्यायः ॥ ४७ ॥

वेदान्तरसकाशे साम नाध्येयम् । गीतिषु सामाख्या तद्योगाद्वेदोऽपि सामोच्यते ॥ ४७ ॥

सर्वेषु च शब्दकर्मसु यावता वा संसृज्येरन् ॥ ४८ ॥

आक्रोशपरीवादेषु सर्वेषु च शब्दकर्मसु अनध्यायः । यावता वाऽध्ययनशब्दे संबन्धं गच्छेरन् ॥ ४८ ॥

छर्दयित्वा स्वप्नपर्यन्तम् ॥ ४९ ॥

वमनं कृत्वा स्वप्नान्तं यावत्तावन्नाधीयीत ॥ ४९ ॥

सर्पिर्वा प्राश्य ॥ ५० ॥

अथवा सर्पिः प्राश्याधीयीत ॥ ५० ॥

पूतीगन्धश्च ॥ ५१ ॥

पूतीगन्धो दुर्गन्धः । स चोपलभ्यमानोऽनध्यायहेतुः ॥ ५१ ॥

भुक्तं चाऽऽत्मसंयुक्तम् ॥ ५२ ॥

यत्पक्वं कालपाकेनाम्लं जातं शुक्तम् । तद्भुक्तं यावता कालेनाऽऽत्मसंयुक्तं स्वोदरस्थ-मजीर्णं यावद्यावत्तदनुगुण उद्गारो वा तावदनध्यायहेतुः ॥ ५२ ॥

प्रदोषे च भुक्त्वा नाधीयीत ॥ ५३ ॥

तेनाधीत्यैव भुञ्जीत ॥ ५३ ॥

प्रोदकयोश्च पाण्योः ॥ ५४ ॥

भुक्त्वेत्येव । भुक्त्वा यावत्प्रोदकौ पाणी आर्द्रौ, तावन्नाधीयीत । केचिद्भुक्त्वेति नानुवर्तयन्ति ॥ ५४ ॥

प्रेतसंक्लृप्तं चान्नं भुक्त्वा सप्रदोषमहरनध्यायः ॥ ५५ ॥

यो मृतोऽसपिण्डीकृतः स प्रेतः । तदुद्देशेन दत्तमन्नं भुक्त्वा सप्रदोषमहर्नाधीयीत। प्रदोषादूर्ध्वं न दोषः । अत्र मनुः—

यावदेकानुदिष्टस्य गन्धालेपश्च तिष्ठति ।
विप्रस्य विदुषो देहे तावद्ब्रह्म न कीर्तयेत् । इति ॥ ५५ ॥

आ च विपाकात् ॥ ५६ ॥

यदि तावता कालेन तदन्नं विपक्वं जीर्णं न भवति तदाऽऽविपाकाच्च नाधीयीत ॥ ५६ ॥

अश्राद्धेन तु पर्यवदध्यात् ॥ ५७ ॥

जीर्णेऽजीर्णे च तस्मिन्नश्राद्धेनान्नेन पर्यवदध्यात् । तस्योपर्यश्राद्धमन्नं भुञ्जीते-त्युक्तं भवति । केचिदत्राश्राद्धेति वचनात्पूर्वत्रापि प्रेतान्नमिति श्राद्धमात्रं विवक्षितं मन्यन्ते ॥ ५७ ॥

काण्डोपाकरणे चामातृकस्य ॥ ५८ ॥

काण्डोपाकरणं काण्डव्रतादेशनम् । तस्मिन्नहनि अमातृकस्यान्नं भुक्त्वा सप्रदोषमहरनध्यायः । अपर आह— भुक्त्वेति नानुवर्तते । तथा चोत्तरत्र भुक्त्वाग्रहणं काण्डोपाकरणेऽमातृकस्य माणवकस्य सप्रदोषमहरनध्याय इति । एतेनोत्तरं व्याख्यातम् ॥५८॥

काण्डसमापने चापितृकस्य ॥ ५९ ॥

काण्डसमापनं व्रतविसर्गः ॥ ५९ ॥

मनुष्यप्रकृतीनां च (ख० १०) । देवानां यज्ञे भुक्त्वेत्येके ॥ ६० ॥

मनुष्या भूत्वा प्रकृष्टेन तपसा ये देवाः संपन्नास्ते मनुष्यप्रकृतयो देवाः । ब्राह्मे पुराणे कुबेरनन्दीश्वरकुमारादयः । तेषां यज्ञे तत्प्रीत्यर्थे ब्राह्मणभोजने भुक्त्वा सप्रदोषमहरनध्याय इत्येके मन्यन्ते । मनुष्यमुखदेवेष्विज्यमानेष्वित्यन्ये ॥ ६० ॥

प्रेतसंक्लृप्तमित्यस्यापवादमाह—

पर्युषितैस्तण्डुलैराममांसेन च नानध्यायः ॥ ६१ ॥

पर्युषिता रात्र्यन्तरिताः प्रतिग्राह्याः । प्रतिगृहीतेषु तण्डुलेषु अद्य पक्त्वा भुज्यमानेषु नानध्यायः । तथाऽऽममांसेन तदहर्भक्षितेन नानध्यायः । पर्युषितेनेत्यन्ये । पर्युषितैरिति वचनात्तदहर्भुक्ताः सप्रदोषमहरनध्यायः ॥ ६१ ॥

तथौषधिवनस्पतिमूलफलैः ॥ ६२ ॥

ओषधिग्रहणेन व्रीहयो गृह्यन्ते । वनस्पतिग्रहणेनापि वृक्षग्रहणम् । तेषां मूलैः फलैः सूरणादिभिः पक्वैरपक्वैश्च तदहर्भक्षितैरपि नानध्यायः ॥ ६२ ॥

यत्काण्डमुपाकुर्वीत यस्य चानुवाक्यं कुर्वीत न तत्तदहरधीयीत ॥ ६३ ॥

यस्मिन्नहनि यत्काण्डमुपाकृतं न तत्तदहरधीयीत । अहरित्यहोरात्रोपलक्षणम् ॥ ६३ ॥

उपाकरणसमापनयोश्च पारायणस्य च तां विद्याम् ॥ ६४ ॥

अनेकवेदाध्यायी यदैकवेदस्य पारायणं कुरुते तदा तस्य पारायणस्य ये उपाकरणोत्सर्जने तयोः कृतयोस्तां विद्यां तदहर्नाधीयीत । उक्तं गृह्ये पारायणविधानातिदेशेन । तां विद्यामिति वचनाद्विद्यान्तराध्ययने न दोषः ॥ ६४ ॥

वायुर्घोषवान्भूमौ वा तृणसंवाहो वर्षति वा यत्र धाराः प्रवहेत् ॥ ६५ ॥

घोषवान् कर्णश्रावः । भूमाववस्थितानि तृणानि संवाहयति उत्क्षिप्य गमयतीति तृणसंवाहः । वर्षति वा देवे धाराः प्रवहेत् क्षिपेत् । यत्र देश एवंविधो वायुस्तत्र तावन्तं कालं नाधीयीत । अत्र मनुः—कर्णश्रावेऽनिले रात्रौ दिवा यां(पां)सुसमूहन इति ॥ ६५ ॥

उत्तरे द्वे सूत्रे निगदसिद्धे—

ग्रामारण्ययोश्च संधौ महापथे च गतो विप्रोष्य च समध्ययनं तदहः ॥ ६६ ॥

यदा सहाधीयानाः कारणवशात्प्रवसेयुः के(कदा)चिच्चाऽऽचार्येण संगतास्तदा समध्ययनं सहाधीयमानं तदहर्नाधीयीत । विप्रोषितानां पुनर्यदहर्मेलनं तदहर्नाधीयीतेत्यन्ये ॥ ६६ ॥

स्वैरिकर्मसु च ॥ ६७ ॥

नाधीयीतेत्येव ॥ ६७ ॥

तत्रोदाहरणम्—

यथा पादप्रक्षालनोत्सादनावलेखनानुलेपनानीति तावन्तं कालं नाधीयीताध्यापयेद्वा संध्योः ॥६८॥

स्वैरिकर्मसु तावन्तं कालमध्ययनमध्यापनं च वर्जयेत् । ज्योतिषोर्दर्शनादुभे संध्ये तयोः । तावन्तं कालं नाधीयीताध्यापयेद्वा । एवमुत्तरत्राप्यनुवृत्तिः ॥ ६८ ॥

उत्तरे द्वे सूत्रे निगदसिद्धे—

तथा वृक्षसमारूढोऽप्सु वाऽवगाढो नक्तं चापावृत्ते दिवा चापिहिते ॥ ६९ ॥

विवृतं द्वारमपावृत्तम् । तत्र नक्तं नाधीयीत । संवृतं द्वारमपिहितम् । तत्र दिवा नाधीयीत ॥ ६९ ॥

अविहितमनुवाकाध्ययनमाषाढवासन्तिकयोः ॥ ७० ॥

वासन्तिको वसन्तोत्सवः । स चैत्रे मासि शुक्लत्रयोदश्यां भवति । आषाढशब्देनापि तस्मिन्मासे क्रियमाणस्तादृशः कश्चिदिन्द्रोत्सवादिर्विवक्षितः । तयोस्तदहरनुवाका-

ध्ययनमविहितम् । अनुवाकग्रहणान्न्यूने न दोषः । अपर आह—अनुवाकग्रहणान्मन्त्रब्राह्मणयोरेव प्रतिषेधो नाङ्गानामिति ॥ ७० ॥

नित्यप्रश्नस्य चाविधिना ॥ ७१ ॥

नित्यं प्रश्नाध्ययनं यस्य स नित्यप्रश्नो ब्रह्मयज्ञः । तस्याविधिना । उक्तविधेरन्यो विधिरविधिः । तेनाविधिना । वक्ष्यमाणप्रकारेण विधिनाऽनुवाकाध्ययनं विहितम् । यद्यपि नित्यं ब्रह्मयज्ञाध्ययनं तथाऽपि केनचिदङ्गेन विना न कर्तव्यम् । तेन विस्मृत्य प्रातराशे कृते प्रायश्चित्तमेव न ब्रह्मयज्ञः । स्नातकव्रतलोपेऽपि प्रायश्चित्तमभोजनम् ॥ ७१ ॥

तस्य विधिः ॥ ७२ ॥

तस्य नित्यप्रश्नस्य विधिरुच्यते ॥ ७२ ॥

अकृतप्रातराश उदकान्तं गत्वा प्रयतः शुचौ देशे स्वाध्यायमधीयीत यथाध्यायमुत्सृजन्वाचा ॥ ७३ ॥

अकृतप्रातराशोऽकृतदिवाभोजनः । उदकान्तमुदकसमीपं गत्वा प्रयतः स्नानमार्जनादिना शुद्धः शुचौ देशे प्राच्यामुदीच्यां प्रागुदीच्यां दिश्यच्छदिर्देशेऽधीयीत यथाध्ययनमुत्सृजन् यथापाठमनुसङ्गमुत्सृजन्नादित आरभ्य प्रथमादिष्वहःसु अधीयीत । द्वितीयादिषूत्सृज्य ततः परमधीयीत । वाचोच्चैरित्यर्थः ॥ ७३ ॥

मनसा चानध्याये ॥ ७४ ॥

अनध्याये च मनसाऽधीयीत नित्यस्वाध्यायम् ॥ ७४ ॥

विद्युति चाभ्यग्रायां स्तनयित्नावप्रायत्ये प्रेतान्ने नीहारे च मानसं परिचक्षते ॥ ७५ ॥

विद्युति अभ्यग्रायामविरतायाम् । स्तनयित्नौ चाभ्यग्रे । अप्रायत्य आत्मनोऽशुचिभावे । प्रेतान्ने च भुक्ते । नीहारे नीहारो हिमानी तस्मिंश्च वर्तमाने । मानसमनन्तरोक्तमध्ययनं परिचक्षते वर्जयन्ति ॥ ७५ ॥

श्राद्धभोजन एवेत्येके ॥ ७६ ॥

एक आचार्याः श्राद्धभोजन एव मानसं परिचक्षते न विद्युदादिषु ॥ ७६ ॥

विद्युत्स्तनयित्नुर्वृष्टिश्चापर्तौ यत्र संनिपतेयुस्त्र्यहमनध्यायः ॥ ७७ ॥

अपर्तौ यथा—यस्मिन्देशे यो वर्षकालस्ततोऽन्यत्रापर्तुः। तत्र यदि विद्युदादयः संनिपतेयुः समुच्चिताः स्युस्तत्र त्र्यहमनध्यायः ॥ ७७ ॥

यावद्व्युदका भूमिरित्येके ॥ ७८ ॥

यावता कालेन भूमिर्विगतोदका भवति तावन्तं कालमनध्याय इत्येके मन्यन्ते ॥ ७८ ॥

एकेन द्वाभ्यां वै तेषामाकालम् ॥ ७९ ॥

विद्युदादीनां मध्य एकेन द्वाभ्यां वा योग आकालमनध्यायः। परेद्युरागतस्य कालस्य प्राप्तिपर्यन्तमित्यर्थः ॥ ७९ ॥

सूर्याचन्द्रमसोर्ग्रहणे भूमिचलनेऽवस्वान उल्कायामग्न्युत्पाते च सर्वासां विद्यानां सार्वकालिकमाकालम् ॥ ८० ॥

सूर्याचन्द्रमसोरिति वचनं बृहस्पत्यादिनिवृत्त्यर्थम्। भूमिचलने भूमिकम्पे। अवस्वाने निर्घाते। उल्कायामुल्कापाते। अग्न्युत्पाते ग्रामादिदाहे। एतेषु सर्वासां विद्यानां

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥

इत्युक्तानां सार्वकालिकमृतौ चापर्तौ चाऽऽकालमनध्यायः। अत्र सर्वासामिति वचनादन्यत्र वेदानामेव प्रतिषेधः। अङ्गानामपीत्यन्ये ॥ ८० ॥

अभ्रे चापर्तौ ॥ ८१ ॥

अपर्तावभ्रं दृश्यमानं यावद्दृश्यते तावत्कालमनध्यायः ॥ ८१ ॥

सूर्याचन्द्रमसोः परिवेष इन्द्रधनुषि प्रतिसूर्यमत्स्य[श्च] वाते पूतीगन्धे नीहारे च सर्वेष्वेतेषु तावन्तं कालम् ॥ ८२ ॥

एवं परिवेषादिष्वपि योज्यम्। अत्रापि बृहस्पत्यादिपरिवेषे न दोषः। इन्द्रधनुः प्रसिद्धम्। सूर्यसमीपे तदाकृतिः प्रतिसूर्यः। मत्स्यः पुच्छवन्नक्षत्रम्। समाहारद्वंद्वे छान्दसो लिङ्गव्यत्ययः। सर्वेष्वेतेषु वातादिषु च त्रिषु तावत्कालमनध्ययनम्। वाते घोषवति। पूतीगन्धे दुर्गन्धे। नीहारे हिमान्याम्। वातादिग्रहणं पूर्वोक्तानां श्वगर्दभादीनामुपलक्षणम्। पुनरिह विधानं तावत्कालमिति विधातुम्। अत्रैव गर्दभादिग्रहणे कर्तव्ये पूर्वत्र पाठस्य चिन्त्यं प्रयोजनम् ॥ ८२ ॥

मुहूर्तं विरते वाते ॥ ८३ ॥

वाते तु घोषवति विरते मुहूर्तमनध्यायः । द्वे नाडिके मुहूर्तः ॥ ८३ ॥

सलावृक्यामेकसृक इति स्वप्नपर्यन्तम् ॥ ८४ ॥

तावत्कालमित्यस्यापवादोऽयम् ॥ ८४ ॥

नक्तं चारण्येऽनग्नावहिरण्ये वा ॥ ८५ ॥

रात्रावग्निवर्जिते हिरण्यवर्जिते वाऽरण्ये नाधीयीत ॥ ८५ ॥

अननूक्तं चापर्तौ छन्दसो नाधीयीत ॥ ८६ ॥

उत्सर्जनादूर्ध्वमुपाकरणादर्वागपर्तुः । तत्र च्छन्दसो नानूक्तमंशमपूर्वं नाधीयीत । ग्रहणाध्ययनमपर्तौ न कर्तव्यम् । यद्यपि तैष्यां पौर्णमास्यां रोहिण्यां वा विरमेदित्युक्तं तथाऽपि कियन्तं कालं तद्विरमणं कस्याध्ययनमित्यपेक्षायामुच्यते । एतावन्तं कालं ग्रहणाध्ययनं न कर्तव्यम् । धारणाध्ययने तु न दोषः । तथा छन्दस इति वचनादङ्गानां ग्रहणेऽपि न दोषः ॥ ८६ ॥

प्रदोषे च ॥ ८७ ॥

प्रदोषे चाननूक्तमृतावपि नाधीयीत । मासं प्रदोषे नाधीयीतेत्येतत्तु धारणाध्ययनस्यापि प्रतिषेधार्थम् । अपर आह—यस्यां रात्रौ द्वादशी त्रयोदशी च मिश्रे भवतस्तस्यां प्रदोषे नाधीयीताननूक्तमनुक्तं चर्तावपर्तौ चैष आचार इति ॥ ८७ ॥

सार्वकालिकमाम्नातम् ॥ ८८ ॥

आम्नातमधीतं न सार्वकालिकम् । अपर्तौ प्रदोषे च सर्वस्मिन्कालेऽनध्यायः ॥८८॥

यथोपाकृते नानुवाकानामेवमपर्तौ कल्पानां यथोक्तमन्यदत्तः(तः) परिषत्सु ॥ ८९ ॥ (ख० ११) ।

इति सत्याषाढहिरण्यकेशिश्रौतसूत्रे (धर्मसूत्रापरपर्याये) षड्विंशप्रश्ने तृतीयः पटलः ॥

अत एतस्मादनध्यायप्रकरणादन्यदनध्यायनिमित्तं परिषत्सु मानवादिधर्मशास्त्रेषु यथोक्तं द्रष्टव्यम् । तत्र वसिष्ठः—दिग्दाहपर्वतप्रपातेषु फलरुधिरपांसुवर्षेष्वाकालिकमिति । यमः—

श्लेष्मातकस्य च्छायायां मधुकस्य तथाऽप्यधः ।
कदाचिदपि नाध्येयं कोविदारकपित्थयोः ॥

संग्रामोद्यानदेवसमीपेषु नाधीयीत ॥ ८९ ॥ (ख० ११)।

इति श्रीमन्महादेवदीक्षितविरचितायां हिरण्यकेशिधर्मप्रश्नव्याख्याया-
मुज्ज्वलायां षड्विंशप्रश्ने तृतीयः पटलः ॥

अथ चतुर्थः पटलः ।

तपः स्वाध्याय इति हि ब्राह्मणम् ॥ १ ॥

योऽयं नित्यस्वाध्यायः सः, कृच्छ्रचान्द्रायणादिलक्षणं तपो यावत्फलं साधयति तावत्फलं साधयतीत्यर्थः ॥ १ ॥

तत्र श्रूयते स यदि तिष्ठन्नासीनः शयानो वा स्वाध्यायमधीते तप एव तत्तप्यते तपो हि स्वाध्याय इति ॥ २ ॥

तत्र ब्राह्मणे स यदि तिष्ठन्नित्यापत्कल्पः श्रूयते । तत्र दर्भाणां महदुपस्तीर्योपस्थं कृत्वा प्राङासीनः स्वाध्यायमित्यादिर्मुख्यः कल्पः । स यदि तिष्ठन्नासित्वा ब्राह्मण एवोक्तः । इह पुनरासीनवचनं यथाकथंचिदासीनार्थम् । सर्वथाऽप्यधीयानस्तप एव तत्तप्यत इति ब्राह्मणार्थः । मनुरप्याह—

आहैव स नखाग्रेभ्यः परमं तप्यते तपः ।
यत्स्रग्व्यपि द्विजोऽधीते स्वाध्यायं शक्तितोऽन्वहम् ॥ इति ।

स्रग्वीति स्वैरं दर्शयति । एवं कर्तुर्नियमो नाऽऽपद्यतीवाऽऽदरणीय इति ॥ २ ॥

उत्कालेऽप्याह——

अथापि वाजसनेयिब्राह्मणं ब्रह्मयज्ञो ह वा एष यत्स्वाध्यायस्तस्यैते वषट्कारा यत्स्तनयति यद्वि-द्योतते यदवस्फूर्जति यद्वातो वा वाति तस्मात्स्त-नयति विद्योतमाने वाऽवस्फूर्जति वाते वा वाय-त्यधीयीतैव वषट्काराणामच्छंबट्कारायेति विज्ञा-यते ॥ ३ ॥

अथापि अपि च स्वाध्यायो नाम यदेष ब्रह्मयज्ञः । ब्रह्म वेदस्तत्साधनो यागः । यथा दर्शपूर्णमासादयः पुरोडाशादिसाधनाः । हवैशब्दौ प्रसिद्धिं द्योतयतः । तस्य यज्ञस्यैते

स्तनयित्न्वादयः । वषट्कारदर्शनात् । वायतीति वै शोषण इत्येतस्य रूपम् । यथाऽऽर्द्रः प्रदेशः शुष्को भवति तथा वायतीत्यर्थः । यस्मादेते वषट्कारास्तस्मात्स्तननादिष्व न-ध्यायनिमित्तेषु सत्स्वप्यधीयीतैव न पुनरनध्याय इति नाधीयीत । किमर्थम् । वषट्का-राणामेतेषामच्छंबट्कारायाव्यर्थत्वाय । अन्यथा वषट्कारा एते व्यर्थाः स्युः । ततश्च यथा होत्रा वषट्कृतेऽध्वर्युर्जुहुयात्तादृगेव तत्स्यात् ॥ ३ ॥

तस्य शाखान्तरे वाक्यसमाप्तिः ॥ ४ ॥

तस्य वाजसनेयिब्राह्मणस्य शाखान्तरे वाक्यसमाप्तिर्भवति । न तावता पर्यव-सानम् ॥ ४ ॥

तदेव शाखान्तरं पठति—

अथ यदि वातो वा वायात्स्तनयेद्वा विद्योतेत वा स्फूर्जेद्वैकां वर्चमेकं वा यजुरेकं वा सामा-भिव्याहरेद्भूर्भुवः स्वः सत्यं तपः श्रद्धायां जुहो-मीति चैतत्तेनो हैवास्यैतदहः स्वाध्याय उपाप्तो भवति ॥ ५ ॥

अन्त इति शब्दोऽध्याहार्यः । वातादिषु सत्सु एकामृचमधीयीत प्राप्ते प्रदेशे । यजुर्वे-दाध्ययन एकं यजुः । सामवेदाध्ययन एकं साम । सर्वेषु वा वेदेषु भूर्भुवःस्वरित्यादिकं यजुरभिव्याहरेत् । न पुनर्यथापूर्वं प्रश्नमात्रम् । तेनैतावताऽध्येतुस्तदहस्तस्मिन्नहनि स्वाध्याय उपाप्तो भवति स्वीकृतो भवति । अधीतो भवतीत्यर्थः । केचिद्भूर्भुवःस्वरित्या-दिकं ब्राह्मणं नामाध्ययनविषयं मन्यन्ते न सार्वत्रिकम् ॥ ५ ॥

कस्मात्पुनर्वाजसनेयिब्राह्मणस्योदाहृते शाखान्तरे वाक्यपरिसमाप्तिरवसीयते न पुनर्यथाश्रुतमात्रं गृह्यते तत्राऽऽह—

एवं सत्यार्यसमयेनाविप्रतिषिद्धम् ॥ ६ ॥

एवं सति एवं वाक्यपरिसमाप्तावाश्रीयमाणायामार्यसमयेनाऽऽर्याः शिष्टा मन्वादय-स्तेषां समयो व्यवस्था तेनाविप्रतिषिद्धं भवति । इतरथा विप्रतिषिद्धं स्यात् ॥ ६ ॥

कथम्—

अध्यायानध्यायान्ह्युपदिशन्ति तदनर्थकं स्याद्वा-जसनेयिब्राह्मणं चेदवेक्षेत ॥ ७ ॥

आर्याः स्वाध्यायमनध्यायं चोपदिशन्ति । तदुपदेशोऽनर्थकः स्याद्यदि वाजसनेयि-ब्राह्मणं यथाश्रुतमवेक्षेताध्येता ॥ ७ ॥

आह्वानर्थकमेव तदस्तु । श्रुतिविरोधात् । तत्राऽऽह—

आर्यसमयो ह्यगृह्यमानकारणः ॥ ८ ॥

योऽयमध्यायानध्यायमये विषय आर्यसमयो न तत्र किंचित्कारणं गृह्यते। यथा वैसर्जनीयं वासोऽध्वर्यवे ददातीति । अगृह्यमाणकारणश्चाऽऽर्यसमयः श्रुत्यनुमानद्वारेण प्रमाणम् । अतो वाक्यपरिसमाप्तिरेव युक्ता । एवं वाजसनेयिब्राह्मणस्यापि नात्यन्तबाधः । अनध्यायोपदेशस्यापि प्रभूताध्ययनविषयतयाऽर्थवत्त्वामिति । अगृह्यमानकारण इति णत्वाभावश्छान्दसः । का पुनरसौ स्मृतिर्या ब्रह्मयज्ञेऽप्यनध्यायमुपदिशति । मानवे तावद्विपर्ययः श्रूयते—नेत्येके नास्त्यनध्यायो ब्रह्मसत्रं हि तत्स्मृतमिति । सामान्येनानध्यायो ब्रह्मयज्ञादन्यत्र चरितार्थः । तस्मात्तादृशी स्मृतिर्मृग्या ॥ ८ ॥

एवं तर्ह्यग्निहोत्रादिष्वपि मन्त्राणामनध्यायः प्राप्नोति नेत्याह—

विद्यां प्रत्यनध्यायः श्रूयते न कर्मयोगे मन्त्राणाम् ॥९॥

विद्यां वेदानामध्ययनं प्रत्यनध्यायः श्रूयते न पुनः कर्मयोगे । हेतुः । अर्थान्तरं हि कर्मणि प्रयोगो मन्त्राणाम् । नापूर्वग्रहणार्थमध्ययनम् । पारायणाध्ययनमध्येऽनध्यायागमे भवति न वेति चिन्त्यम् । एवं रुद्रादिजपेऽपि ॥ ९ ॥

कथं पुनरार्यसमयः प्रमाणं यावता न तेषामतीन्द्रियेऽर्थे ज्ञानं संभवति । तत्राऽऽह—

ब्राह्मणोक्ता विधयस्तेषामुत्सन्नाः पाठाः ॥ १० ॥

अध्येतृदौर्बल्यात् ॥ १० ॥

कथं तर्हि तेषामास्तित्वम्—

प्रयोगादनुमीयन्ते ॥ ११ ॥

प्रयोगः स्मृतिनिबन्ध[न]मनुष्ठानं च । तस्माद्ब्राह्मणान्यनुमीयन्ते मन्वादिभिरुपलब्धानीति । कथमपरथा स्मरेयुरनुतिष्ठेयुर्वा संभवति च तेषां वेदसंयोगः ॥ ११ ॥

अथ प्रसङ्गादुपस्मृतिरुच्यते—

यत्र तु प्रीत्युपलब्धितः प्रवृत्तिर्न तत्र शास्त्रमस्ति ॥ १२ ॥

यत्र तु मातुलसुतापरिणयनादौ प्रीत्युपलब्धितः प्रवृत्तिर्न तत्रोत्सन्नपाठशास्त्रप्राप्तानां श्रुतिमूलत्वं युक्तम् ॥ १२ ॥

तादृगप्रमाणमित्याह—

तदनुवर्तमानो नरकाय राध्यति ॥ १३ ॥

ता अपस्मृतीरनुवर्तमानस्तदुक्तं कर्म कुर्वाणो नरकाय राध्यति । कल्पत इत्यर्थः ॥ १३ ॥

अथेदानीं प्रत्यक्षब्राह्मणोक्ता एव केचिद्विधयो व्याख्यायन्ते तेषामपि स्मार्तेष्वनुप्रवेशार्थम् । तेन तदतिक्रमे स्मार्तातिक्रमनिमित्तमेव प्रायश्चित्तं भवति—

अथापि ब्राह्मणोक्ता विधयस्तेषां महायज्ञा महासत्राणीति संस्तुतिः ॥ १४ ॥

अत्रापि स्मृतिमूलानि ब्राह्मणानि प्रत्यक्षाणि दृश्यन्ते तद्वत्तत्रापि श्रुतिमूलमनुमीयते इत्यर्थः । तेषां वक्ष्यमाणानां महायज्ञा इति संस्तुतिः । स्वाध्यायब्राह्मण आरण्यकादौ संस्तुतिग्रहणेन संस्तुतिमात्रमिदं नामधेयं धर्मातिदेशार्थमिति दर्शयति । तेन महायज्ञेषु सोमयागेषु ये धर्मा न ज्येष्ठभ्रातरमन्तरित्यसोमेन यष्टव्यमित्यादयो ये च महासत्रस्य गवामयनस्य धर्मा इष्टप्रथमयज्ञानामधिकार इत्येवमादयस्त उभय एवं वक्ष्यमाणेषु पञ्चमहायज्ञेषु न भवन्ति ॥ १४ ॥

अहरहर्भूतबलिर्मनुष्येभ्यो यथाशक्तिदानं (ख० १२) । देवेभ्यः स्वाहाकार आकाष्ठात् पितृभ्यः स्वधाकार ओदपात्रात्स्वाध्याय इति ॥ १५ ॥

वैश्वदेवे वक्ष्यमाणेन बलिहरणप्रकारेण भूतेभ्योऽहरहर्बलिर्देय एष भूतयज्ञः । मनुष्येभ्यश्च यथाशक्ति दानं कर्तव्यमेष मनुष्ययज्ञः (ख० १२) । देवेभ्यः स्वाहाकारेण प्रदानमाकाष्ठात् । अशनीयाभावे काष्ठमपि तावद्देयं वैश्वदेवोक्तप्रकारेण । एष देवयज्ञः । केचिद्वैश्वदेवाहुतिभ्यः पृथग्भूतामिमां मन्यन्ते । देवेभ्यः स्वाहेति मन्त्रमिच्छन्ति । देवयज्ञेन यक्ष्य इति संकल्पमिच्छन्ति । वयं तु न तथेति गृह्य एवावोचाम । केचिदाहुराकाष्ठादिति वचनाददनीयाभावेन भोजनलोपेऽपि यथाकथंचिद्वैश्वदेवः कर्तव्यः पुरुषसंस्कारत्वादिति । अपरे त्वशनीयसंस्कार इति वदन्तो भोजनलोपे वैश्वदेवो न कर्तव्य इति स्थिताः । तच्चिन्त्यम् । पितृभ्यः स्वधाकारेण प्रदानमोदपात्रात् । अन्नाद्यभाव उदपात्रमपि तावद्देयम् । पात्रग्रहणात्सह पात्रेण देयम् । एष पितृयज्ञः । स्वाध्यायस्तस्य विधिरित्यारभ्योक्तो नित्यस्वाध्यायः । एष ऋषियज्ञः । इतिशब्दः समाप्तौ । इत्येते महायज्ञा इति । न चायमुपदेशक्रमोऽनुष्ठान उपयुज्यते । अनुष्ठानं तु ब्रह्मयज्ञो देवयज्ञो भूतयज्ञः पितृयज्ञो मनुष्ययज्ञ इति ॥ १९ ॥

पूजाप्रसङ्गादाह—

पूजा वर्णज्यायसां कार्या ॥ १६ ॥

वर्णतो यो ज्यायान्प्रशस्ततरो भवति तस्यावरेण पूजा कार्या । अध्वन्यनुगमनादिका । उत्सवेषु गन्धमाल्यादिका ॥ १६ ॥

वृद्धतरणां च ॥ १७ ॥

सजातीयानामपि पूजा कार्या । तरनिर्देशाद्विद्यावयःकर्मभिर्वृद्धानाम् । हीनानामपी-त्येके । तथा च मनुः—शूद्रोऽपि दशमीं गत इति पूजा कार्येत्युक्तम् ॥ १७ ॥

तद्विरोधिहर्षो वर्ज्य इत्याह—

हृष्टो दर्पति दृप्तो धर्ममतिक्रामति धर्मातिक्रमे खलु पुनर्नरकः ॥ १८ ॥

अभिमतलाभादिनिमित्तश्चित्तविकारो हर्षः । तद्युक्तो हृष्टः । स दर्पति । दर्पो गर्वोऽभिमानः । दृप्तो धर्ममतिक्रामति । पूज्यपूजनादिकं प्रतिस्तब्धत्वात् । खलुशब्दो वाक्यालंकारे । धर्मातिक्रमे पुनर्नरको भवति निरयं प्रतिपद्यते । तस्माद्धर्मातिक्रममूलभूतो हर्षो न कर्तव्यः । यद्यपि भूतदाहीयेषु दोषेषु वर्जनीयेषु हर्षो विवर्ज्यते तथाऽपीह विशेषेण हर्षवर्जनार्थोऽयं समारम्भः । योगाङ्गत्वाद्वक्ष्यमाणस्य ॥ १८ ॥

न समावृत्ते समादेशो विद्यते ॥ १९ ॥

समावृत्तशिष्यं प्रत्याचार्येण समादेशो न देय इदं त्वया कर्तव्यमिति । यथा समावृत्तदशायां दीयते उदकुम्भमाहरेति । नैमित्तिके स्वेच्छया करणे न प्रतिषेधः ॥ १९ ॥

ॐकारः स्वर्गद्वारं तस्माद्ब्रह्माध्येष्यमाण एतदादि प्रतिपद्येत ॥ २० ॥

ओंकारः प्रणवः स्वर्गद्वारमिति यथा द्वारेण गृहाभ्यन्तरं प्राप्यते तथा तेन स्वर्गः । तस्माद्ब्रह्म वेदं स्वर्गसाधनमध्येष्यमाण एतदादि अनाम्नातमपि ॐकारमादौ कृत्वा प्रतिपद्येत क्रमेताध्येतुम् ॥ २० ॥

विकथां चान्यां कृत्वैव लौकिक्या वाचा व्यावर्तते ब्रह्म ॥ २१ ॥

अध्ययनेऽनुपयुक्ताः कथा विकथाः । अतोऽन्यां कृत्वा एतदादि प्रतिपद्येत । एवं सति ब्रह्म वेदो लौकिक्या वाचा व्यावर्तते तया मिश्रितं न भवति ॥ २१ ॥

पुनरप्योंकारमेव स्तौति—

यज्ञेषु चैतदादयः प्रसवाः ॥ २२ ॥

यज्ञेषु दर्शपूर्णमासादिष्वेतदादय ॐकारादयः प्रसवा अनुज्ञावाक्यानि स्युर्ब्रह्मादीनाम् । ओं प्रणय । ओं निर्वप । ओं स्तुतेति ॥ २२ ॥

लोके च भूतिकर्मस्वेतदादीन्येव वाक्यानि स्युर्यथा पुण्याहᳲ स्वस्त्ययनमृद्धिमिति ॥ २३ ॥

लोके च कर्मसु पाणिग्रहणादिष्वेतदादीन्येव वाक्यानि स्युः । तान्युदाहरति यथा पुण्याहवाचने—ॐ कर्मणः पुण्याहमिति वाचयित्वा वदन्ति ॐ पुण्याहं कर्मण इति प्रतिवक्तारः । ॐ कर्मणे स्वस्ति भवन्तो ब्रुवन्त्विति वाचयित्वा ॐ स्वस्ति कर्मण इतीतरे । ॐ कर्मण ऋद्धिं भवन्तो ब्रुवन्त्विति वाचयित्वा ॐ कर्म ऋध्यतामितीतरे । तस्मादेव प्रशस्त ॐकार इति ॥ २३ ॥

नासमयेन कृच्छ्रं कुर्वीत त्रिः श्रावणं त्रिः सहवचनमिति परिहाप्य ॥ २४ ॥

समयः शुश्रूषा । तेन विना कृच्छ्रं दुःखं दुरवधारणमपूर्वग्रन्थं न कुर्वीत । क्रियासामान्यवचनः करोतिरध्ययनेऽध्यापने च वर्तते । समयेन विना शिष्योऽपि कृच्छ्रं ग्रन्थं नाधीयीत । आचार्योऽपि नाध्यापयेत् । तथा च मनुः—

धर्मार्थौ यत्र न स्यातां शुश्रूषा चापि तद्विधा ।
न तत्र विद्या वक्तव्या शुभं बीजमिवोषरे ॥ इति ।

किमविशेषेणेत्याह-त्रिः श्रावणं त्रिः सहवचनमिति परिहाप्य वर्जयित्वा । त्रिः श्रावणमात्रा(त्रे) त्रिः सहवचनमात्रा(त्रे) चान्यतरापेक्षया क्रियमाणे शुश्रूषा नापेक्ष्या ततोऽधिके सर्वत्रापेक्ष्येति ॥ २४ ॥

अविचिकित्साया ब्रह्म निगन्तव्यमिति हारीतः ॥ २५ ॥

विचिकित्सा संशयः । तदभावोऽविचिकित्सा । सा यावदुपपद्यते तावद्ब्रह्म निगन्तव्यं नियमेन गन्तव्यं नियमपूर्वमधिगन्तव्यमिति हारीत आचार्यो मन्यते । अत्र पक्षे त्रिःश्रावणात्रिःसहवचनयोरपि शुश्रूषितव्यम् । ब्रह्मग्रहणादङ्गेषु नायं विधिः ॥ २५ ॥

न बहिर्वेदे गतिर्विद्यते ॥ २६ ॥

बहिर्वेदे वेदाद्बहिर्भूते काव्यनाटकश्रवणे गतिः शुश्रूषा न विद्यते । यद्यपि तदुपयुक्तं वेदार्थज्ञाने ॥ २६ ॥

समादिष्टमध्यापयन्तं यावदध्यायमुपसंगृह्णीयात् ॥ २७ ॥

आचार्येण समादिष्टोऽध्यापयेति तं यावदध्यायं यावदसावध्यापयति तावदुपसंगृह्णीयात् । तथा समादिष्टोऽध्यापयतीत्यत्र सूत्र आचार्यदारवद्वृत्तिरुक्ता । तत्र चान्यत्रोपसंगृह्णीयादिति वर्तते । अत उपसंग्रहणार्थोऽयमारम्भः ॥ २७ ॥

एनमुपसंगृह्णीयान्नित्यमर्हन्तमित्येके ॥ २८ ॥

स चेत्समादिष्टोऽर्हन्भवति विद्यासमाचारादिना ततो नित्यमुपसंगृह्णीयादित्येके । स्वमतं तु यावदध्ययनमिति ॥ २८ ॥

नित्यानां तु खलु ॥ २९ ॥

सा गतिर्नित्यसमादिष्टा य आचार्येणाध्यापनार्थं तेषामेव । न तु कदाचित्समादिष्टानाम् । कादाचित्के तु नित्यं न गतिर्विद्यते । यद्यप्यसावर्हन्भवति तथाऽप्याचार्ये या गतिः शुश्रूषा साऽस्मिन्न कर्तव्या ॥ २९ ॥

ब्रह्मणि मिथो विनियोगे न गतिर्विद्यते ॥ ३० ॥

ब्रह्मणि वेदविनियोगविषये यथा मिथो विनियोगः क्रियते बह्वृचो यजुर्वेदाध्यायिनः सकाशाद्यजुर्वेदमधीते सोऽपि तस्मादृग्वेदं तदा परस्परं शुश्रूषा न कर्तव्या ॥ ३० ॥

अत्र हेतुं स्वयमेवाऽऽह—

ब्रह्म वर्धत इत्युपदिशन्ति ॥ ३१ ॥

द्वयोरपि ब्रह्म वर्धते । सैव ब्रह्मवृद्धिः शुश्रूषा इत्युपदिशन्त्याचार्याः ॥ ३१ ॥

निवेशे हि वृत्ते संवत्सरे संवत्सरे द्वौ द्वौ मासौ समाहित आचार्यकुले वसेद्भूयः श्रुतमिच्छन्निति श्वेतकेतुः ॥ ३२ ॥

भूयः श्रवणमिच्छन् पुरुषो निवेशे वृत्ते दारकर्मणि वृत्तेऽपि प्रतिवत्सरं द्वौ द्वौ मासौ समाहित आचार्यकुले वसेदिति श्वेतकेतुराचार्यो मन्यते ॥ ३२ ॥

अत्र हेतुत्वेन श्वेतकेतोरेव शिष्यान्प्रति वचनम्—

एतेन ह्ययं योगेन पूर्वस्मात्कालाद्भूयः श्रुतमकुर्वमिति ॥ ३३ ॥

एतेनानन्तरोक्तेन योगेनोपायेन पूर्वस्माद्ब्रह्मचर्यकालाद्भूयोऽधिकतरं श्रुतमकुर्वं तत्कृतवानस्मि । ततो यूयमपि तथा कुरुध्वमिति ॥ ३३ ॥

तच्छास्त्रेषु च प्रतिषिद्धम् ॥ ३४ ॥

तदिदं श्वेतकेतोर्दर्शनं श्रुत्यादिशास्त्रेषु विप्रतिषिद्धम् ॥ ३४ ॥

कथमित्याह—

निवेशे हि वृत्ते(ख० १३) । नैयमिकानि श्रूयन्ते
यथाऽग्निहोत्रमतिथयो यच्चान्यदेवं युक्तम् ॥ ३५ ॥

हिशब्दो हेतौ । यस्मान्निवेशे वृत्ते नैयमिकानि नियमेन कर्तव्यानि नित्यानि कर्माणि श्रूयन्ते । कानि पुनस्तानि । अग्निहोत्रमतिथयोऽतिथिपूजा ।

यथा मातरमाश्रित्य सर्वे जीवन्ति जन्तवः ।
एवं गृहस्थमाश्रित्य सर्वे जीवन्ति जन्तवः । इति ।

यच्चान्यदेवं युक्तम् । एवंविधं श्राद्धादि । एवमेतैः कर्मभिरहरहराक्रान्तस्य शिरः-कण्डूयनेऽप्यवसरो न भवति स कथं द्वौ मासौ गुरुकुले वसेदिति ॥ ३५ ॥

अध्ययनार्थेन यं चोदयेन्न चैनं प्रत्याचक्षीत ॥ ३६ ॥

यमाचार्यं माणवकोऽध्ययनं प्रयोजनमुद्दिश्य चोदयेच्छिष्यस्तेऽहं शाधि मां प्रपन्न-मिति तमेव माणवकम् । चशब्दोऽवधारणे । नैनं प्रत्याचक्षीत ॥ ३६ ॥

किमविशेषेणेत्याह—

न चास्मिन्दोषं पश्येत् ॥ ३७ ॥

अस्मिन्निति निपातोऽस्ति चेदर्थवृत्तिः । ईदृक्च मृलया(इमा)निन इत्यादौ दर्श-नात् । तस्यायं प्रयोगः । न चेदस्मिन्माणवकेऽध्याप्यहेतुदोषं पश्येत् ॥ ३७ ॥

यदृच्छायामसंवृत्तौ गतिरेव तस्मिन् ॥ ३८ ॥

समानमधीयानेषु माणवकेषु यदि कस्यचिद्यदृच्छया दृष्टहेतुमन्तरेणैव बुद्धिमान्द्या-दिनाऽध्ययनस्यासंवृत्तिः स्यादधीतो भागो माणवकान्तरवन्नाधिगच्छेत्तदा तस्य यदृच्छायामसंवृत्तौ तस्मिन्नाचार्ये गतिरेव शुश्रूषैव माणवकस्य शरणम् । तथाऽऽह मनुः—

यथा खनन् खनित्रेण नरो वार्यधिगच्छति ।
तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छतीति ॥

अधिकं शुश्रूषितो हि गुरुः सर्वात्मना तं शिक्षयेदिति ॥ ३८ ॥

मातरि पितर्याचार्यवच्छुश्रूषा ॥ ३९ ॥

मातृग्रहणेन पितामहीप्रपितामह्योरपि ग्रहणम् । पितृग्रहणेन च पितामहप्रपितामहयोर्ग्रहणम् । सर्वे एत आचार्यवच्छुश्रूषितव्याः ॥ ३९ ॥

समावृत्तेन सर्वे गुरव उपसंग्राह्याः ॥ ४० ॥

उक्तानुक्ताश्च ज्येष्ठा मातुलादयः सर्वे गुरवः समावृत्तेनाहरहरुपसंग्राह्याः ॥ ४० ॥

भ्रातृभागिनीषु च यथापूर्वमुपसंग्रहणम् ॥ ४१ ॥

पूर्वेणैव सिद्धे क्रमार्थमिदं वचनम् । यथापूर्वं ज्येष्ठक्रमेणेति ॥ ४१ ॥

नित्या च पूजा यथोपदेशम् ॥ ४२ ॥

पूजा वर्णज्यायसां कार्या । वृद्धतराणामिति उपदेशानुरोधेन या नित्या पूजा सा च यथापूर्वं वृद्धतरक्रमेण ॥ ४२ ॥

ऋत्विक्श्वशुरपितृव्यमातुलानवरवयसोऽप्युत्थायाभिवदेत् ॥४३॥

त्रिवर्षपूर्वः श्रोत्रियोऽभिवादनमर्हतीति वक्ष्यति । तेऽवरवयस ऋत्विगादयोऽप्यभिवादयन्ते । तानभिवादयमानान्प्रत्युत्थायाभिवदेत् । नाने(न्ये)ष्विव यथासुखमासीनः । वयसोत्कृष्टानां तेषामियमेव पूजा ॥ ४३ ॥

तूष्णीं वोपसंगृह्णीयात् ॥ ४४ ॥

अथवा प्रत्युत्थाय स्वयमपि तांस्तूष्णीमुपसंगृह्णीयात् । विद्याचारित्राद्यपेक्षया विकल्पः ॥ ४४ ॥

अथाभिवाद्या उच्यन्ते—

दशवर्षं पौरसंख्यं[1] पञ्चवर्षं तु चारणं त्रिवर्षपूर्वः श्रोत्रियोऽभिवादनमर्हतीति ॥ ४५ ॥

पुरे भवं पौरं पौरं च तत्सख्यं[2] च पौरसख्यम् । सेवानिबन्धनं बान्धवम्[3] । तदभिवादनस्य निमित्तम् । कीदृशम् । दशवर्षान्तराले [विद्यमानम्] । दशवर्षाधिकं पौरसख्यमश्रोत्रियोऽप्यभिवाद्य इति विवक्षितम् । पञ्चवर्षं तु चारणम् । सख्यमित्युपरि समस्तमप्यपेक्षते । चारणशब्दः शाखाध्यायिषु रूढः । तेषां सख्यं पञ्चवर्षमभिवादनस्य निमित्तम् । श्रोत्रियं वक्ष्यति । स त्रिवर्षपूर्वस्तावन्मात्रेणाभिवादनमर्हति न पूर्वसंख्यमपेक्षते ॥४५॥

ज्ञायमाने वयोविशेषे वृद्धतरायाभिवाद्यम् ॥ ४६ ॥

---

१ क. °रसंख्यं २ क. तत्संख्यं । ३ क. बन्धनं ।

क्रमार्थमिदम् । वयोविशेषे ज्ञायमाने पूर्वं वृद्धतरायाभिवाद्यमभिवादनं कर्तव्यं पश्चाद्वृद्धायेति ॥ ४६ ॥

विषमगतायागुरवे नाभिवाद्यम् ॥ ४७ ॥

उच्चैःस्थाने नीचैःस्थाने वा स्थितो विषमगतः । तस्मै गुरुव्यतिरिक्ताय नाभिवाद्यम् । गुरवे त्वभिवाद्यम् । एवं दर्शने सति तूष्णीमवस्थानस्य युक्तत्वात् ॥ ४७ ॥

अन्वारुह्य वाऽभिवादयीत ॥ ४८ ॥

इदमगुरुविषयम् । यत्रासावभिवादनीयः स्थितस्तत्र त्वन्वारुह्य वाऽभिवादयीताभिवादयेत् । अ[न]न्वारुह्येत्यपि द्रष्टव्यम् । उभयस्य तुल्यत्वात् । गुरौ तु(रुस्तु) दृष्टमात्र एवाभिवादनीय इत्युक्तम् । सर्वत्र तु प्रत्युत्थायाभिवादनम् ॥ ४८ ॥

उत्तरे द्वे सूत्रे निगदसिद्धे—

अप्रयतेन नाभिवाद्यं तथा प्रयतायाप्रयतश्च न प्रत्यभिवदेत् ॥ ४९ ॥

यद्यज्ञानादप्रयताय कश्चिदभिवदेत्तथाऽपि सोऽप्रयतो न प्रत्यभिवदेत् ॥ ४९ ॥

पतिवयसः स्त्रियः ॥ ५० ॥

पत्युर्यद्वयः स्त्रीणां तदेव वयश्चेन्न तदनुरोधेन ज्येष्ठभार्यादिष्वभिवादनं कर्तव्यम् ॥ ५० ॥

न सोपानद्वेष्टितशिरा अवहितपाणिर्वाऽभिवादयीत ॥ ५१ ॥

अवहितपाणिः समित्कुशहस्तो दात्रादिहस्तो वा । अन्यत्प्रसिद्धम् ॥ ५१ ॥

सर्वनाम्ना स्त्रियो राजन्यवैश्यौ च न नाम्ना ॥ ५२ ॥

स्त्री च सर्वनाम्नैवाभिवाद्या त्वामभिवादयेऽहमिति । न नाम्नाऽभिवादनीया । एवं राजन्यवैश्यौ च ॥ ५२ ॥

मातरमाचार्यदारं चेत्येके ॥ ५३ ॥

मातरमाचार्यदारं च । एते अपि द्वे सर्वनाम्नैवाभिवादयीत । स्वमतं तु नाम्नैव भवति ॥ ५३ ॥

वयोविशेषणाभिवादनं हीनवर्णे नास्तीत्याह—

दशवर्षश्च ब्राह्मणः शतवर्षश्च क्षत्रियः पितापुत्रौ
स्म तौ विद्धि तयोस्तु ब्राह्मणः पिता ॥ ५४ ॥

शिष्यं प्रत्याचार्यस्यायमुपदेशः । स्मशब्दः श्लोकपूरणार्थो निपातः । ब्राह्मणः क्षत्रिय इत्युपलक्षणम् । विद्धि जानीहि । शिष्टं स्पष्टम् ॥ ९४ ॥

कुशलमवरवयसं वयस्यं वा पृच्छेत् ॥ ५५ ॥

ब्राह्मणविषयमिदम् । क्षत्रियादिषु विशेषस्य वक्ष्यमाणत्वात् । वयसा तुल्यो वयस्यः । अवरवयसं वयस्यं वा ब्राह्मणं प(क)थादिषु संगतं कुशलं पृच्छेत्, अपि कुशलमिति ॥ ९९ ॥

अनामयं क्षत्रियम् ॥ ५६ ॥

अप्यनामयं त इति । आमयो रोगस्तदभावोऽनामयं पृच्छेत् ॥ ९६ ॥

अनष्टं वैश्यम् ॥ ५७ ॥

अप्यनष्टपशुधनोऽसीति ॥ ९७ ॥

आरोग्यं शूद्रम् ॥ ५८ ॥

अप्यरोगो भवानिति ॥ ९८ ॥

नासंभाष्य श्रोत्रियं ह्यतिव्रजेदरण्ये च स्त्रियम् ॥ ५९ ॥ (ख० १४)।

श्रोत्रियं पथिसंगतमसंभाष्य नह्यतिव्रजेन्नह्यतिक्रामेत् । अरण्ये च स्त्रियम् । अरण्यग्रहणं समयदेशस्योपलक्षणम् । तत्र स्त्रियमेकाकिनीं दृष्ट्वाऽसंभाष्य नातिव्रजेत् । संभाषणं च मातृवद्भगिनीवच्च । भगिनि किं ते करवाणि न भेतव्यमिति ॥ ९९ ॥ (ख० १४)।

सर्वेषामेव कर्मणां शेषजातमाचमनं विधास्यंस्तदुपयोगिनो विधीनाह—

उपासने गुरूणां वृद्धानामतिथीनाᳬ होमे जपकर्मणि स्वाध्याये भोजन आचमने च यज्ञोपवीति स्यात् ॥ ६० ॥

गुरूणामाचार्यादीनामन्येषां च पूज्यानामतिथीनां चोपासने यदा तानुपास्ते तदा होमे साङ्गे पिड्यादन्यत्र जपकर्मणि जपक्रियायां स्वाध्यायाध्ययने भोजनाचमनयोश्च यज्ञोपवीती स्यात् । वासो विन्यासविशेषो यज्ञोपवीतम् । दक्षिणं बाहुमुद्धरतेऽवधत्ते सव्यमिति यज्ञोपवीतमिति ब्राह्मणम् । वाससोऽसंभवेऽनुकल्पं वक्ष्यति । अपि वा सूत्रमेवोपवीतार्थम् । मनुरप्याह—

कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृत् ।
उद्धृते दक्षिणे पाणावुपवीत्युच्यते बुधैः ॥ इति ।

एतेषु यज्ञोपवीतविधानात्कालान्तरे नावश्यंभावः ॥ ६० ॥

भूमिगतास्वप्स्वाचम्य प्रयतो भवति ॥ ६१ ॥

अपि शुद्धा भूमिगता वैतृष्ण्यं यासु गोर्भवेत् ।
अव्याप्ताश्चेदमेध्येन गन्धवर्णरसान्विताः ॥
शुचि गोतृप्तिकृत्तोयं प्रकृतिस्थं महीगतम् । इति याज्ञवल्क्यः ।
अजा गावो महिष्यश्च ब्राह्मणी च प्रसूतिका ।
दशरात्रेण शुध्यन्ति भूमिष्ठं च नवोदकम् ॥ इति मनुः ।
श्रावणे मासि संप्राप्ते सर्वा नद्यो रजस्वलाः । इति स्मृत्यन्तरमपि ।

एवंभूतदोषरहितास्वप्स्वाचम्य प्रयतो भवति । प्रायत्यार्थमाचमनं भूगतास्वप्सु कर्तव्यमिति ॥ ६१ ॥

यं वा प्रयत आचामयेत् ॥ ६२ ॥

यं वा प्रयतो योग्य आचामयेत्सोऽपि प्रयतो भवति । सर्वथा स्वयं वामहस्तावर्जिताभिराचमनं न भवति । एतेन शास्त्रान्तर उक्तं कमण्डलुधारणमाचार्यस्य नाभिमतं लक्ष्यते । अलाबुपात्रेण नारिकेलपात्रेण वा स्वयमाचमनं कुर्वन्ति ॥ ६२ ॥

न वर्षधारास्वाचामेत् ॥ ६३ ॥

पूर्वोक्तेन प्रकारेण प्रायत्यार्थस्याऽऽचमनस्य वर्षधारासु प्रसङ्गाभावात् पिपासितस्य पानप्रतिषेधोऽयमिति केचित् । अपर आह—अस्मादेव प्रतिषेधाच्छिक्यादिस्थस्य करकादेर्या धारा तत्र प्रायत्यार्थमाचमनं न भवतीति ॥ ६३ ॥

तथा प्रदरोदके ॥ ६४ ॥

भूमेः स्वयं दीर्णः प्रदेशः प्रदरः । तत्र यदुदकं तस्मिन्भूमिगतेऽपि नाऽऽचामेत् ॥ ६४ ॥

तप्ताभिश्चाकारणात् ॥ ६५ ॥

तप्ताभिश्चाद्भिर्नाऽऽचामेत् । अकारणाज्ज्वरादौ कारणे सति न दोषः ॥ ६५ ॥

रिक्तपाणिर्वयस उद्यम्याप उपस्पृशेत् ॥ ६६ ॥

वय इति पक्षी । यो रिक्तपाणिः सन् वयस उद्यम्य पक्षिणमुद्दिश्य तस्य प्रोत्सारणाय पाणिमुद्यच्छति स तत्कृत्वाऽप उपस्पृशेत् तेनैव पाणिना । रिक्तपाणिरिति वचनात्काष्ठलोष्टादिसहितस्य पाणेरुद्यमने न दोषः । केचिदुपस्पर्शनमाचमनमाहुः ॥६६॥

शक्तिविषये न मुहूर्तमप्यप्रयतः स्यात् ॥ ६७ ॥

शक्तौ सत्यां मुहूर्तमप्यप्रयतो न स्यात् । आचमनयोग्यं जलं दृष्ट्वैव मूत्रपुरीषादिकं कुर्यात् । यदि तावन्तं कालं वेगं धारयितुं शक्नुयात् ॥ ६७ ॥

नग्नो वा ॥ ६८ ॥

न मुहूर्तमपि स्यादिति संबध्यते । शक्तिविषय इति च । व्रणादिना कौपीनाच्छादनाशक्तौ न दोषः ॥ ६८ ॥

नाप्सु सतः प्रयमणं विद्यते ॥ ६९ ॥

येन प्रयतो भवति तत्प्रयमणम् । करणे ल्युट् । तदप्सु सतो वर्तमानस्य न भवति । जलमध्य आसीनोऽपि नाऽऽचामेदिति ॥ ६९ ॥

उत्तीर्य त्वाचामेत् ॥ ७० ॥

तीर उत्तीर्याऽऽचामेत् । न जलमध्य इत्यर्थो न विधेयः । पूर्वेण गतत्वात् । तस्मादयमर्थः—यदा नदीमुत्तरति नावा प्रकारान्तरेण वा तदा तामुत्तीर्य तीरान्तरं गतः प्रयतोऽप्याचामेत् । नद्यादेरुत्तरणमप्याचमनस्य निमित्तमिति । तुशब्दोऽपिशब्दार्थः ॥ ७० ॥

नाप्रोक्षितमिन्धनमग्नावादध्यात् ॥ ७१ ॥

श्रौते स्मार्ते लौकिकेऽ[वा]ग्नावप्रोक्षितमिन्धनं नाऽऽदध्यात् । केचिल्लौकिके नेच्छन्ति ॥ ७१ ॥

मूढस्वस्तरे चासंस्पृशन्यानप्रयतान्प्रयतो मन्येत ॥ ७२ ॥

पतितचण्डालसूतिकोदक्याशवस्पृष्टितत्स्पृष्टच्युपस्पर्शने सचैल इति गौतमः । तस्मिन्विषये वेदमुच्यते । शयनतयाऽऽसनतया वाऽऽस्तीर्णपलालादिः स्वस्तरः । पृषोदरादिदर्शनाद्रूपसिद्धिः । यत्रातिश्लक्ष्णतया पलालादेर्मूलाग्रविभागो न ज्ञायते स मूढः । मूढश्चासौ स्वस्तरश्च मूढस्वस्तरः । तस्मिन्पतितादिषु अप्रयतेषु यदि कश्चित्प्रयत उपविशेन्न च तान्संस्पृशेत् स प्रयतो मन्येत । यथा प्रयतमात्मानं मन्यते प्रयतोऽस्मीति तथैव मन्येत । नैवंविधे विषये तत्स्पृष्टिन्यायः प्रवर्तेत इति ॥ ७२ ॥

तथा तृणकाष्ठेषु निखातेषु ॥ ७३ ॥

तृणकाष्ठेष्वपि भूमौ निखातेषु तथा । तत्र तत्स्पृष्टिन्यायो न भवतीति ॥ ७३ ॥

प्रोक्ष्य वास उपयोजयेत् ॥ ७४ ॥

शुद्धमपि वासः प्रोक्ष्यैवोपयोजयेद्वसीत । अपर आह—अपवित्रस्यापि वाससः प्रोक्षणमेव शुद्धिहेतुरिति ॥ ७४ ॥

शुनोपहतः सचैलोऽवगाहेत ॥ ७५ ॥

शुनोपहतः स्पृष्टो यद्यपि च शुना दृष्टं तथाऽपि सचैलोऽवगाहेत । भूमिगतास्वप्सु स्नायान्नोद्धृताभिः । स्मृत्यन्तरे प्रायश्चित्तमुक्तम् । तत्र वसिष्ठः—

ब्राह्मणस्तु शुना दष्टो नदीं गत्वा समुद्रगाम् ।
प्राणायामशतं कृत्वा घृतं प्राश्य च शुध्यति ॥

अङ्गिराः—ब्रह्मचारी शुना दष्टस्त्रिरात्रेणैव शुध्यति ।
गृहस्थस्तु द्विरात्रेण एकाहेनाग्निहोत्रवान् ॥
नाभेरूर्ध्वं तु दष्टस्य तदेव द्विगुणं भवेत् ।
तदेव द्विगुणं वक्त्रे मूर्ध्नि चेत्स्याच्चतुर्गुणम् ॥
क्षत्रविट्शूद्रयोनिस्तु स्नानेनैव शुचिर्भवेत् ।
द्विगुणं तु वनस्थस्य तथा प्रव्रजितस्य च ॥
ब्राह्मणी तु शुना दष्टा सोमे दृष्टिं निपातयेत् ।
यदा न दृश्यते सोमः प्रायश्चित्तं तदा कथम् ॥
यां दिशं तु गतः सोमस्तां दिशं त्ववलोकयेत् ।
सोममार्गेण सा पूता पञ्चगव्येन शुध्यति ॥
प्रक्षाल्य चापि तं देशमग्निना संस्पृशेत्पुनः । इति ॥ ७५ ॥

प्रक्षाल्य वा तद्देशमग्निना सꣳस्पृश्य पुनः प्रक्षाल्य चाऽऽचम्य प्रयतो भवति ॥ ७६ ॥

शुना स्पृष्टं तद्देशं प्रक्षाल्याग्निना संस्पृश्य पुनः प्रक्षाल्य पादौ च प्रक्षाल्य पश्चादाचम्य प्रयतो भवति । व्यवस्थितविकल्पोऽयम् ।

ऊर्ध्वं नाभेः करौ मुक्त्वा यदङ्गमुपहन्यते ।
तत्र स्नानविधिः प्रोक्तो ह्यधः प्रक्षालनं स्मृतम् ॥

इति मानवे दर्शनात् ॥ ७६ ॥

अग्निं नाप्रयत आसीदेत् ॥ ७७ ॥

अप्रयतः सन्नग्निं नाऽऽसीदेदग्नेरासन्नो न भवेत् । यावति देश ऊष्मोपलम्भः । अत्राप्यशक्तौ न दोषः ॥ ७७ ॥

इषुमात्रादित्येके ॥ ७८ ॥

इषुमात्रादर्वाङ् नाऽऽसीदेदूष्मोपलम्भो भवतु मा [वा] भूदित्येक आचार्या मन्यन्ते ॥ ७८ ॥

न चैनमुपधमेत् ॥ ७९ ॥

अप्रयत इत्येव । एनमग्निमप्रयतो नोपधमेत् । प्रयतस्य न दोष इत्येके । अपर आह— मुखेन नोपधमेत् । नाग्निं मुखेनोपधमेदिति मानवदर्शनात् । स्मृत्यन्तरे—मुखे- नोपधमेदग्निं मुखादग्निरजायत । उभयोर्विकल्पः । अपर आह—वाजसनेयके श्रौत- प्रकरणे—मुखादग्निरजायत । तस्मान्मुखेनोपसमिध्यत इति दर्शनाच्छ्रौतेषु मुखेनोपसमि- न्धनम् । अन्यत्र स्मार्तप्रतिषेध इति । अन्ये तु वैणवेनाऽऽयसेन वा सुषिरेणोपसमि- न्धनमिच्छन्ति । एवमग्नेर्मुखव्यापारस्यान्वयाच्छ्रुतिरप्यनुगृहीता भवति । आस्याद्बि- न्दूनां पतनशङ्काभयात्प्रतिषेधस्मृतिरपीति ॥ ७९ ॥

खट्वायां च नोपदध्यात् ॥ ८० ॥

खट्वायामग्निं नोपदध्यात् । अत्राप्यशक्तौ न दोषः ॥ ८० ॥

प्रभूतैधोदके ग्रामे यत्राऽऽत्माधीनं प्रयमणं तत्र वासो धर्म्यो ब्राह्मणस्य ॥ ८१ ॥

प्रभूत एध उदकं च यस्मिंस्तस्मिन्ग्रामे ब्राह्मणस्य वासो धर्म्यः । तत्रापि न सर्वत्र कथं तर्हि । यत्राऽऽत्माधीनं प्रयमणं प्रायत्यं मूत्रपुरीषप्रक्षालनानीति । यत्राऽऽत्माधी- नानि । यत्र कूपेष्वेवोदकं तत्र बहुकूपेऽपि न वस्तव्यम् । ब्राह्मणग्रहणाद्वर्णान्तरस्या- नियमः । ग्रामग्रहणादेवंभूतेषु घोषादिष्वपि न वस्तव्यम् ॥ ८१ ॥

मूत्रं कृत्वा पुरीषं वा मूत्रपुरीषलेपानन्नलेपानु- च्छिष्टलेपान्रेतसश्च ये लेपास्तान्प्रक्षाल्य पादौ चाऽऽचम्य प्रयतो भवति ॥ ८२ ॥ (ख० १५)।

इति सत्याषाढहिरण्यकेशिश्रौतसूत्रे (धर्मसूत्रापरपर्याये) षड्विंशप्रश्ने चतुर्थः पटलः ॥४॥

मूत्रं पुरीषं [वा] कृत्वोत्सृज्य तयोर्मूत्रपुरीषयोर्लेपा यस्मिन्प्रदेशे स्थिताः प्रदेशान्तरे वा पतितास्तान्सर्वान् । अन्नलेपांश्चोच्छिष्टलेपानपि । उच्छिष्टलेपांश्चान्नलेपानपि । तथा रेतसश्च ये लेपाः स्वापादौ मैथुनेन च तान्सर्वानद्भिर्मृदा च प्रक्षाल्य पादौ च लेपव- र्जितावपि प्रक्षाल्य पश्चादाचम्य प्रयतो भवति । अत्र मृत्प्रमाणस्य संख्यायाश्चानुक्तत्वा- द्यावता गन्धलेपक्षयो भवति तावदेव विवक्षितम् । तथा च याज्ञवल्क्यः—' गन्धलेप- क्षयकरं शौचं कुर्यादतन्द्रितः ' इति । देवलस्तु—

यावत्संशुद्धिं मन्येत तावच्छौचं समाचरेत् ।
प्रमाणं शौचे संख्याया न शिष्टैरुपदिश्यते ॥ इति ।

पैठीनसिः—मूत्रोत्सर्गे कृते शौचं न स्यादन्तर्जलाशये ।
अन्यत्रोत्सृज्य कुर्यात्तु सर्वदैव समाहितः ॥ इति ।

॥ ८२ ॥ (ख० १९) ।

इति श्रीमन्महादेवविरचितायां हिरण्यकेशिधर्मप्रश्नव्याख्यायामुज्ज्वलायां षड्विंशप्रश्ने चतुर्थः पटलः ॥ ४ ॥

अथ पञ्चमः पटलः ।

तिष्ठन्नाऽऽचामेत्प्रह्वो वा ॥ १ ॥

तिष्ठन्प्रह्वो वा नाऽऽचामेत् । नायं प्रतिषेधो वक्तुं शक्यते । आसीनस्त्रिराचामेदिति वक्ष्यति । ततो यथा शयानस्याऽऽचमनं न भवति तथा तिष्ठतः प्रह्वस्य च न भवति । एवं तर्हि नायं शौचार्थस्याऽऽचमनस्य प्रतिषेधः । तथा गौतमः—नाञ्जलिना पिबेन्न तिष्ठन्निति । अपर आह—अस्मादेव वचनात्क्वचित्तिष्ठतः प्रह्वस्याऽऽचमनमभ्यनुज्ञातं भवति । तेन भूमिगतास्वप्सु तीरस्यापोढत्व ऊरुदघ्ने नाभिदघ्ने वा स्थितस्याऽऽचमनं भवति । गौतमे च तिष्ठन्नुद्धृतोदकेन नाऽऽचामेदिति सूत्रच्छेदादुद्धृतोदकेनैव तिष्ठतः प्रतिषेध इति ॥ १ ॥

अथाऽऽचमनविधिः—

आसीनस्त्रिराचामेद्धृदयंगमाभिरद्भिः ॥ २ ॥

अत्राऽऽनुकूल्यं स्मृत्यन्तरवशादुपाश्रीयते । आसीनः शुचौ देशे नाऽऽसने भोजने त्वाऽऽसनेऽपि चाऽऽत्मनो दक्षिणं बाहुं जान्वन्तरा कृत्वा प्राङ्मुख उदङ्मुखः प्रागुदङ्मुखो वा हृदयंगमा अपः करतलस्थासु यावतीषु माषो निमज्जति तावतीः फेनबुद्बुदरहिता वीक्षिता विमुक्तकनिष्ठाङ्गुष्ठेन संहतोर्ध्वीकृतमध्याङ्गुलित्रयेण दक्षिणपाणिना मुखमसंस्पृशंस्त्रिराचामेत्पिबेद्ब्राह्मणः । क्षत्रियः कण्ठगाः । वैश्यस्तालुगाः । शूद्रो जिह्वास्पृष्टाः सकृत् ॥ २ ॥

त्रिरोष्ठौ परिमृजेत् ॥ ३ ॥

त्रिरोष्ठावलोमप्रदेशावङ्गुष्ठेन परिमृजेत् परिमृज्यात् ॥ ३ ॥

द्विरित्येके ॥ ४ ॥

तुल्यविकल्पः ॥ ४ ॥

सकृदुपस्पृशेत् ॥ ५ ॥

मध्यमाभिस्त्रिभिरङ्गुलीभिरोष्ठौ ॥ ५ ॥

द्विरित्येके ॥ ६ ॥

तुल्यविकल्पः ॥ ६ ॥

दक्षिणेन पाणिना सव्यमभ्युक्ष्य पादौ शिरश्चेन्द्रियाण्युपस्पृशेच्चक्षुषी नासिके श्रोत्रे च ॥ ७ ॥

दक्षिणेन पाणिना सव्यं प्रोक्ष्य तथा पादौ शिरश्चेन्द्रियाण्युपस्पृशेत् । उदकेन सर्वेषामिन्द्रियाणां प्रसङ्गे परिसंचष्टे—चक्षुषी नासिके श्रोत्रे चेति । इन्द्रियाणीति वचनं स्वरूपकथनमात्रम् । तत्राङ्गुष्ठानामिकाभ्यां चक्षुषी । केचिद्युगपत्केचित्पृथक्पृथक् । अङ्गुष्ठप्रदेशिनीभ्यां नासिके। अङ्गुष्ठकनिष्ठिकाभ्यां श्रोत्रे । अङ्गुष्ठेनैव वा सर्वाणि खानि संस्पृशेत् । अत्र पृथग्भावस्य निश्चितत्वात्पूर्वत्रापि पृथगिति युक्तम् । अत्राऽऽपस्तम्बेनोक्तम्—अथाप उपस्पृशेदिन्द्रियस्पर्शनानन्तरं हस्तौ प्रक्षालयेदिति ॥ ७ ॥

भोक्ष्यमाणस्तु प्रयतोऽपि द्विराचामेद् द्विः परिमृजीत सकृदुपस्पृशेत् ॥ ८ ॥

भोजनं करिष्यन्प्रयतोऽपि द्विराचमनं कुर्यात् । अत्र विशेषः । द्विः परिमृजीत न विकल्पेन त्रिः । सकृदुपस्पृशेन्न विकल्पेन द्विः । प्रयतोऽपीति वचनादप्रयते सर्वत्र द्विराचमनमाचार्यस्याभिमतम् । अत्र द्विराचामेदिति साङ्गं द्विरावर्तयेदित्येके । द्विः परिमृजीत सकृदुपस्पृशेदित्येतत्प्रायपठितस्य द्विराचामेदेतस्यापि द्विः प्राशनमात्रपरत्वात्साङ्गमाचमनमात्रं विधीयते । तस्याभ्यासाश्रवणात्सकृदित्येके । शास्त्रान्तरप्राप्ताभ्यासोऽपीत्यन्ये ॥ ८ ॥

श्यावान्तपर्यन्तावोष्ठावुपस्पृश्याऽऽचम्य प्रयतो भवति ॥ ९ ॥

दन्तमूलात्प्रभृत्योष्ठौ । तत्रालोमकप्रदेशः श्यावः । तस्यान्तः सलोमकस्तत्पर्यन्तावोष्ठावुपस्पृश्याऽऽचामेत् । ओष्ठयोरलोमकप्रदेशमङ्गुल्या काष्ठादिना वोपस्पृश्याचामेदिति । अस्मादेव प्रतिषेधाज्ज्ञायते यत्किंचिदपि द्रव्यमन्तरास्ये सदुच्छिष्टतया निमित्तमिति ॥ ९ ॥

न श्मश्रुभिरुच्छिष्टा भवन्त्यन्तरास्ये सद्भिर्यावन्न हस्तेनोपस्पृशति ॥ १० ॥

श्मश्रूणि यदाऽऽस्यस्यान्तर्भवन्ति तदा तैरन्तरास्ये सद्भिरुच्छिष्टो न भवति यावन्न हस्तेनोपस्पृशति । उपस्पर्शेन उच्छिष्टो भवति । ततश्चाऽऽचामेदिति । अत्र स्मृत्यन्तरम्—

भुक्त्वा क्षुत्वा च सुप्त्वा च ष्ठेवित्वोक्त्वाऽनृतं वचः ।
आचान्तः पुनराचामेद्वासोऽपि परिधाय च ॥ इति ॥ १० ॥

य आस्याद्बिन्दवः पतन्त उपलभ्यन्ते तेष्वाचमनं विहितम् ॥ ११ ॥

भाषमाणस्याऽऽस्यात्पतन्तो लालाबिन्दव उपलभ्यन्ते चक्षुषा स्पर्शनेन वा य उपलब्धियोग्यास्तेष्वाचमनं विहितम् । वेदोच्चारणे गौतमः—मन्त्रान् ब्राह्मणमुच्चारयतो ये बिन्दवः शरीर उपलभ्यन्ते तेष्वाचमनं विहितमिति ॥ ११ ॥

ये भूमौ न तेष्वाचामेदित्येके ॥ १२ ॥

ये बिन्दवो भूमौ पतन्ति न शरीरे तेषु नाऽऽचामेदित्येके । स्वमते तु तेष्वप्याचामेदिति ॥ १२ ॥

स्वप्ने क्षवथौ शृं(सिं)घाणिकाश्र्वालम्भे लोहितस्य केशानामग्नेर्गवां ब्राह्मणस्य स्त्रियाश्चाऽऽलम्भे महापथं च गत्वाऽमेध्यं चोपस्पृश्याप्रयतं च मनुष्यं नीवीं च परिधायाप उपस्पृशेत् ॥ १३ ॥

स्वप्नः स्वापः । क्षवथुः क्षुतम् । शृङ्घाणिका नासिकामलः । अश्रु नेत्रजलम् । तेषामालम्भे स्पर्शे, लोहितस्य रुधिरस्य । केशानां शिरोगतानां भूमिगतानां च । अग्न्यादीनां चतुर्णामालम्भे, महापथं च गत्वाऽमेध्यं च गोव्यतिरिक्तानां मूत्रपुरीषाणां ताम्बूलनिषेकादि चोपस्पृश्याप्रयतं च मनुष्यमुपस्पृश्य । नीवी प्रसिद्धा । तद्योगादधोवासो लक्ष्यते तच्च परिधायाप उपस्पृशेत् । केषुचित्स्नानं केषुचिदाचमनं केषुचित्स्पर्शनमात्रं यावता प्रयतो मन्यते ॥ १३ ॥

आर्द्रं वा शकृदोषधीर्भूमिं वनस्पतिं चाऽऽचामेद्वा ॥ १४ ॥

आर्द्रं वा शकृदुपस्पृशेत् । ओषधीर्वा आर्द्रां भूमिं वाऽऽर्द्रां वनस्पतिं वाऽऽर्द्रं चाऽऽचामेत् । पूर्वोक्तेषु स्वल्पेषु वैकल्पिकमिदम् । एवमाचमनं सह निमित्त उ(सनिमित्तम्)क्तम् ॥ १४ ॥

अथाभक्ष्याधिकारः—

हिंसार्थेनासिना मांसं छिन्नं तदभोज्यम् ॥ १५ ॥

असिग्रहणं क्षुरादेरप्युपलक्षणम् । यन्मांसं पाककालेऽसिना छिन्नं तदभोज्यम् ॥ १५ ॥

दद्भिरपूपस्य नापच्छिन्द्यात् ॥ १६ ॥

अपूपग्रहणं मूलफलादेरप्युपलक्षणम् । द्वितीयार्थे षष्ठी । दन्तैरपूपं नापच्छिन्द्यात् । किंतु हस्तादिभिरवच्छिद्य भक्षयेत् ॥ १६ ॥

यस्य कुले म्रियेत न तत्रानिर्देशे भोक्तव्यम् ॥ १७ ॥

यस्य कुले कश्चिन्म्रियेत सपिण्डतायां सत्यां तत्रानिर्गते दशाहे न भोक्तव्यम् । अनिर्देश इत्याशौचकालोपलक्षणम् । तेन क्षत्रियादिष्वधिकं पक्षिण्यादिषु न्यूनम् ॥ १७ ॥

तथाऽनुत्थितायां सूतिकायाम् ॥ १८ ॥

सूतिकायामनुत्थितायां सत्याम् । उत्थानं नाम सूतिकागारे निवेशितानामुदकुम्भादीनामपनयनम् । तच्च द्वादशेऽहनि भवति । द्वादश्यां मातापुत्रौ स्नात इति गृह्य उक्तत्वात् । अत्राप्याशौचकालोपलक्षणम् । तस्माद्यावदाशौचमभोजनम् । अत्राङ्गिराः—

ब्रह्मक्षत्रविशां भुक्तौ न दोषस्त्वग्निहोत्रिणाम् ।
सूतके शाव आशौचे त्वस्थिसंचयनात्परम् ॥ इति ॥ १८ ॥

अन्तःशवे च ॥ १९ ॥

यावद्ग्रामान्न निर्ह्रियते शवस्तावन्न भोज्यम् । आचारस्तु धनुःशतादर्वाक्तत्रापि प्रदीपमारोप्योदकुम्भमुपनिधाय भुञ्जते यदि समानवंशगृहं न भवति ॥ १९ ॥

अप्रयतोपहतमन्नमप्रयतं न त्वभोज्यम् ॥ २० ॥

अप्रयतेनाशुचिनोपहृतं स्पृष्टमन्नमप्रयतं भवति किंत्वशुद्धमप्यभोज्यं न भवति । कः पुनरप्रयतस्याभोज्यस्य विशेषः । उच्यते । अप्रयतमन्नमग्नावधिश्रित्याद्भिः प्रोक्षितं भस्मना मृदा वा संस्पृष्टं वाचा प्रशस्तमन्नं भवति भोज्यम् । अभोज्यं तु न शूद्रादिना कदाचिदपीति ॥ २० ॥

अप्रयतेन शूद्रेणोपहृतमभोज्यम् ॥ २१ ॥

अप्रयतेन शूद्रेणोपनीतमभोज्यं स्पृष्टमस्पृष्टं च । स्पृष्टमेवेत्यन्ये ॥ २१ ॥

यस्मिंश्चान्ने केशः स्यात् ॥ २२ ॥

तदभोज्यम् । एतच्च पाकदशायामेव । पतितेन केशेन सह यत्पक्वमन्नं तद्विषयम् । भोजनकाले तु केशपाते घृतप्रक्षेपादिना संस्कृतं भोज्यम् ॥ २२ ॥

अन्यद्वाऽमेध्यम् ॥ २३ ॥

अन्यद्वा नखादि यस्मिन्नन्ने स्यात्तदप्यभोज्यम् । इदमपि पूर्ववत् । अत्र बौधायनः— कीटनखकेशाखुपुरीषाणि दृष्टानि तावन्मात्रमन्नमुद्धृत्य शेषं भोज्यमिति । वसिष्ठस्तु-कामं तु केशकीटानुद्धृत्याद्भिः प्रोक्ष्य भस्मावकीर्य वाचा प्रशस्तमुपयुञ्जीतेति ॥ २३ ॥

अमेध्यैरवमृष्टम् ॥ २४ ॥

अमेध्यैः कलञ्जपलाण्ड्वादिभिरवमृष्टं संस्पृष्टमभोज्यम् ॥ २४ ॥

कीटो वाऽमेध्यसेवी ॥ २५ ॥ (ख० १६) ।

यस्मिंश्चान्ने स्यादिति व्यवहितकल्पनया संबध्यते । अमेध्यसेवी क्रिमिः कीटः पूत्यण्डाख्यः ॥ २५ ॥ (ख० १६) ।

मूषकलाऽङ्गं वा ॥ २६ ॥

पूर्ववत्संबन्धः । मूषकला मूषकपुरीषम् । अङ्गं वा । उपसमस्तमपि मूषकग्रहणं संबध्यते । यस्मिन्नन्ने मूषकस्याङ्गं पादादि पुरीषं वा भवति तदप्यभोज्यम् ॥ २६ ॥

पदा वोपहतम् ॥ २७ ॥

प्रयतेनापि यत्पदा स्पृष्टं तदप्यभोज्यम् ॥ २७ ॥

सिचा वा ॥ २८ ॥

सिग्वस्त्रदशा । परिहितस्य वाससः सिचा यत्स्पृष्टं तदप्यभोज्यम् ॥ २८ ॥

अपपात्रेण वा दृष्टम् ॥ २९ ॥

अपपात्रेण वा यद्दृष्टं तदप्यभोज्यम् । पतितचाण्डालसूतिकोदक्या अपपात्राः । अपगताः पात्रेभ्यः । नहि ते पात्रे भोक्तुं लभन्ते ॥ २९ ॥

शुना वा ॥ ३० ॥

शुना वा यद्दृष्टं तदप्यभोज्यम् ॥ ३० ॥

सिचा वोपहृतम् ॥ ३१ ॥

अपरिहितस्य शुद्धस्यापि वाससः सिचा यदुपहृतमानीतं तदप्यभोज्यम् ॥ ३१ ॥

दास्या वा नक्तमाहृतम् ॥ ३२ ॥

दास्या नक्तमाहृतमभोज्यम् । स्त्रीलिङ्गनिर्देशाद्दासेनाऽऽहृते न दोषः । अन्ये लिङ्गमविवक्षितं मन्यन्ते । नक्तमिति वचनाद्दिवा न दोषः ॥ ३२ ॥

भुञ्जानं वा यत्र शूद्र उपस्पृशेत् ॥ ३३ ॥

भोजनदशायां यदा शूद्र उपस्पृशेत्तदाऽपि न भुञ्जीत । भुञ्जानग्रहणादन्यदा शूद्रोपस्पर्शने नाप्रायत्यमिति केचित् । अन्ये तु सदा भवत्यप्रायत्यं भोजनदशायामाधिक्यप्रतिपादनाय प्रतिषेध इति ॥ ३३ ॥

अनर्हद्भिर्वा समानपङ्क्तौ ॥ ३४ ॥

सर्वत्र वाशब्दः समुच्चये । अभिजनविद्यावृत्तरहिता अनर्हाः । तैः सह समानपङ्क्तौ न भुञ्जीत ॥ ३४ ॥

भुञ्जानेषु वा यत्रान्योऽनूत्थायोच्छिष्टं प्रयच्छेदाचामेद्वा ॥ ३५ ॥

समानपङ्क्ताविति वर्तते । समानपङ्क्तौ बहुषु भुञ्जानेषु यद्येकोऽन्योऽनूत्थाय भोजनाद्विरम्योच्छिष्टं शिष्येभ्यः प्रयच्छेदाचामेद्वा तस्यां पङ्क्तावितरेषां न भोक्तव्यम् । अतो बहुषु भुञ्जानेष्वेको मध्ये न विरमेत् । भोजनकण्टक इति तमाहुः ॥ ३५ ॥

कुत्सयित्वा वा यत्रान्नं दद्युः ॥ ३६ ॥

मूर्ख वैधवेय विषं भुङ्क्ष्वेत्येवं कुत्सयित्वा यत्रान्नं दद्युस्तदभोज्यम् ॥ ३६ ॥

मनुष्यैरवघ्रातमन्यैर्वा मेध्यैः ॥ ३७ ॥

मनुष्यैरन्यैर्वा मार्जारादिभिरवघ्रातमन्नमभोज्यम् । अवेत्युपसर्गप्रयोगाद्दूरस्थैर्गन्धस्याऽऽघ्राणे न दोषः ॥ ३७ ॥

न नावि भुञ्जीत ॥ ३८ ॥

नाव्यासीनो न भुञ्जीत शुद्धेऽपि पात्रे ॥ ३८ ॥

तथा प्रसादे ॥ ३९ ॥

प्रसादो दारुमयो मञ्चः । तत्रापि न भुञ्जीत ॥ ३९ ॥

कृतभूमौ तु भुञ्जीत ॥ ४० ॥

भूमावपि भुञ्जानः कृतायां गोमयादिना संस्कृतायां भुञ्जीत ॥ ४० ॥

अनाप्रीते मृन्मये भोक्तव्यम् ॥ ४१ ॥

यदि मृन्मये भुञ्जीत तदाऽन्येनानाप्रीते भुञ्जीत । आप्रीतं क्वचित्कार्ये पाकादा(वु)पयुक्तम् ॥ ४१ ॥

आप्रीतं चेदभिदग्धे ॥ ४२ ॥

आप्रीतमेव लभ्यते तदाऽग्निनाऽभितो दग्ध्वा तत्र भोक्तव्यम् ॥ ४२ ॥

परिमृष्टं लौहं प्रयतम् ॥ ४३ ॥

लौहं लोहविकारभूतं कांस्यादि भोजनपात्रं भस्मादिभिः परिमृष्टं सत्प्रयतं भवति तत्र भस्मना कांस्यमाम्लेन ताम्रं राजतं शकृता सौवर्णमद्भिरेवेत्यादिस्मृत्यन्तरवशाद्द्रष्टव्यम् ॥ ४३ ॥

यन्निर्लिखितं दारुमयम् ॥ ४४ ॥

यद्दारुमयं भाजनं तन्निर्लिखितं तष्टं सत्प्रयतं भवति ॥ ४४ ॥

यथागमं यज्ञे ॥ ४५ ॥

यज्ञपात्रं तु यथागमं शोधितं भवति । तद्यथा—अग्निहोत्रहवणी दर्भैरद्भिः प्रक्षालिता । सोमपात्राणि मार्जालीये प्रक्षालितानि । आज्यपात्राण्युष्णेन वारिणा ॥ ४५ ॥

नाऽऽपणीयमन्नमश्नीयात् ॥ ४६ ॥

आपणः पण्यवीथी । तत्र जातं लब्धं वाऽऽपणीयम् । तत्र कृतं नाश्नीयात् । व्रीह्या-दिषु न दोषः ॥ ४६ ॥

तथा रसानाममांसमधुलवणानीति परिहाप्य ॥ ४७ ॥

तथा रसान्रसद्रव्याणि । तानप्यापणीयान्नाश्नीयात् । आममांसादीनीति वर्ज-यित्वा ॥ ४७ ॥

तैलसर्पिषी तूदकेऽवधायोपयोजयेत् ॥ ४८ ॥

तैलसर्पिषी तु आपणीये अपि उपयोजयेत् । उदकेऽवधाय निषिच्य । पाकेन तैलस-र्पिषी शोधयित्वा कार्यविरोधो यथा न भवति तथोदकेन संसृज्येत्येके व्याच-क्षते ॥ ४८ ॥

कृतान्नं पर्युषितमखाद्यापेयानाद्यम् ॥ ४९ ॥

कृतान्नं पर्युषितं पूर्वेद्युः पक्वं सदखाद्यमपेयमनाद्यं च । यथायोग्यं खरविशदद्रवं मृदुविशदसिद्धं च ॥ ४९ ॥

शुक्तं च ॥ ५० ॥

शुक्तं काले पाकेनाऽऽम्लीभूतं तदपि पर्युषितमखाद्यापेयानाद्यम् ॥ ५० ॥

फाणितपृथुकतण्डुलभरुजकरम्भसक्तुशाकमांसपिष्टक्षीरविकारौ-षधिवनस्पतिमूलफलवर्जम् ॥ ५१ ॥

अनन्तरोक्तं विधिद्वयं फाणितादि वर्जयित्वा द्रष्टव्यम् । फाणितं पानविशेषः । इक्षुरस इति केचित् । भ्रष्टानां व्रीहीणां तण्डुलाः । पृथुभूताः पृथुकाः । भरुजा भ्रष्ट यवाः । करम्बो दधिसक्तूनामाहारः करम्ब इति प्रसिद्धः । वेदेऽप्युभयं भवति । यत्कर-म्भैर्जुहोति । धानाः करम्ब इति । क्षीरविकारो दध्यादि । प्रसिद्धमन्यत् ॥ ५१ ॥

अथ शुक्तं चेत्यस्य विधेः शेषः—

शुक्तं चापरयोगम् ॥ ५२ ॥

परेण द्रव्यान्तरेण योगो यस्य तत्परयोगम् । तदेव शुक्तं वर्जयति । पूर्वं सामान्ये-नाभिधाय सलावृक्यामेकसृक इति स्वप्नपर्यन्तमिति पश्चाद्विशेष उक्तः ॥ ५२ ॥

सर्वं मद्यमपेयम् ॥ ५३ ॥

सर्वं मद्यं मदकरमपेयम् । अत्र स्मृत्यन्तरवशाद्व्यवस्था । अत्र मनुः—

गौडी माध्वी च पैष्टी च विज्ञेया त्रिविधा सुरा ।
यथैव ता न पातव्यास्तथा सर्वा द्विजोत्तमैः ॥ इति ।

सुराव्यतिरिक्तं तु मद्यं ब्राह्मणस्य नित्यमपेयम् । तथा च गौतमः—मद्यं नित्यं ब्राह्मणस्येति । क्षत्रियवैश्ययोस्तु ब्रह्मचारिणोरिति ॥ ५३ ॥

तथैलकं पयः ॥ ५४ ॥

अविरेलका तस्याः क्षीरमपेयम् ॥ ५४ ॥

उष्ट्रीक्षीरमृगीक्षीरसंधिनीक्षीरयमसूक्षीराणीति ॥ ५५ ॥

उष्ट्रमृगौ प्रसिद्धौ । या गर्भिणी दुग्धे सा संधिनीति शास्त्रान्तरे प्रसिद्धा । एककालदोहेत्यन्ये । एकस्मिन्गर्भे याऽनेकगर्भं सूते सा यमसूः । उष्ट्रादीनां क्षीराण्यपेयानि । इतिकरणादेवंप्रकाराणामेकशफानां क्षीराण्यपेयानि । तथा च मनुः—

आरण्यानां [च] सर्वेषां मृगाणां महिषीं विना ।
स्त्रीक्षीरं चैव वर्ज्यानि सर्वशुक्तानि चैव हि ॥
अनिर्दशाया गोः क्षीरमौष्ट्रमैकशफं तथा ।
आविकं संधिनीक्षीरं विवत्सायाश्च गोः पयः ॥ इति ॥ ५५ ॥

धेनोश्चानिर्दशायाः ॥ ५६ ॥

धेनुर्नवप्रसूता गौः । चकारादजामहिष्यौ च । अजा गावो महिष्यश्चेति मानवे दर्शनात् ॥ ५६ ॥

औषधीनां च तथा कीलालम् ॥ ५७ ॥

औषधयः सुरार्थास्तेषां विकारभूतमन्नं कीलालं नाद्यात् ॥ ५७ ॥

कलञ्जपलाण्डुपरारिकाः ॥ ५८ ॥

कलञ्जं रक्तलसुनम् । पलाण्डुः स्थूलकन्दो नीलो लसुणानुकारी । परारिका कृष्णलण्डुमाख्यं प्रसिद्धम् । एते चाभक्ष्याः ॥ ५८ ॥

प्रतिपदपाठो न शक्य इति समासेनाऽऽह—

यच्चान्यत्परिचक्षते ॥ ५९ ॥

यच्चान्यदेवंयुक्तं शिष्टाः परिचक्षते वर्जयन्ति तदप्यभक्ष्यम् । तत्र मनुः—

लशुनं गृञ्जनं चैव पलाण्डुकवकानि च ।
अभक्ष्याणि द्विजातीनाममेध्यप्रभवाणि च ॥ इति ॥ ५९ ॥

क्याकुभोज्यमिति हि ब्राह्मणम् ॥ ६० ॥

क्याकु च्छत्राकम् । तदप्यभोज्यमभक्ष्यम् । ब्राह्मणग्रहणमुक्तार्थम् ॥ ६० ॥

एकखुरोष्ट्रगवयग्रामसूकरशरभगवाम् ॥ ६१ ॥

मांसमित्यर्थाद्गम्यते । एकखुरा अश्वादयः । गवयो गोसदृशः पशुः । शरभोऽष्टापद आरण्यो मृगः । अन्ये प्रसिद्धाः । एतेषां मांसमभक्ष्यम् ॥ ६१ ॥

धेन्वनडुहोश्च कारणाद्भक्ष्यम् ॥ ६२ ॥

धेन्वनडुहोर्मांसं भक्ष्यं नाविधं किंतु कारणात् । कारणमष्टकादिविधिः । गोप्रतिषेधस्य प्रतिप्रसवः—मेध्यमानडुहमिति वाजसनेयकम् । आनडुहं मांसं न केवलं भक्ष्यं किं तर्हि मेध्यमपीति वाजसनेयिनः समामनन्ति ॥ ६२ ॥

कुक्कुटो विकिराणाम् ॥ ६३ ॥

पादाभ्यां विकीर्य विकीर्य कीटधान्यादि ये भक्षयन्ति ते विकिरा मयूरादयः । तेषां मध्ये कुक्कुटो न भक्ष्यः । स्मृत्यन्तरवशाद्ग्राम्यो नाऽऽरण्यः ॥ ६३ ॥

प्लवः प्रतुदाम् ॥ ६४ ॥

तुण्डेन प्रतुद्य प्रतुद्य भक्षयन्ति ते दार्वाघाटादयः प्रतुदस्तेषां मध्ये प्लव एवाभक्ष्यः। प्लवः शकटविलाख्यो बकविशेषः ॥ ६४ ॥

क्रव्यादाः ॥ ६५ ॥

क्रव्यं मांसं तदेव केवलं येऽदन्ति ते क्रव्यादा गृध्रादयः । तेऽप्यभक्ष्याः ॥ ६५ ॥

हंसभासचक्रवाकसुपर्णाश्च ॥ ६६ ॥

हंसः प्रसिद्धः । भासः श्येनाकृतिः पीततुण्डः । चक्रवाको मिथुनचरः । सुपर्णः श्येनः । एते चाभक्ष्याः ॥ ६६ ॥

क्रुञ्चक्रौञ्चवार्ध्राणसलक्ष्मणवर्जम् ॥ ६७ ॥

क्रुञ्चा वृन्दचराः । क्रौञ्चा मिथुनचराः । ते चाभक्ष्याः । सूत्रे क्रौञ्चेति विभक्तिलोपश्छान्दसः । किमविशेषेण क्रुञ्चक्रौञ्चा अभक्ष्याः । नेत्याह—वार्ध्राणसलक्ष्मणवर्जम् । श्वेतो लोहितो वा मूर्धा येषां ते लक्ष्मणाः । त एव विशेष्यन्ते वार्ध्राणसा इति । वार्ध्रं चर्म तदाकारा नासिका येषां ते । एवंभूताँल्लक्ष्मणान्वर्जयित्वा क्रुञ्चक्रौञ्चा न भक्ष्या इति । अन्ये त्वाहुः । क्रव्यादा इति प्राप्तस्य प्रतिषेधस्य क्रुञ्चादिषु तेषु प्रतिषेध इति । तत्र लक्ष्मणा सारसी । लक्ष्मणवर्जमिति ङ्यापोः संज्ञाछन्दसोरिति ह्रस्वः । एवं क्रुञ्चाशब्दस्याप्यजादेराबन्तस्य ॥ ६७ ॥

पञ्चनखानां गोधाकच्छपश्वाविट्शल्यकखड्गशशपूतीकखषवर्जम् ॥ ६८ ॥

पञ्चनखा वानरमार्जारादयः । तेषां मध्ये गोधादीन्सप्त वर्जयित्वाऽन्ये भक्ष्याः । गोधा कृकलासाकृतिर्महाकायः । कच्छपः कूर्मः । श्वाविडत्राहिविशेषः । यस्य नाराचाकाराणि लोमानि स शल्यकः । यस्य चर्मणा तनुत्राणं क्रियते स श्वाविट् ।

शल्यक इति युक्तः पाठः । एके तु च्छकारं पठन्ति च्छकारात्पूर्वमिकारम् । खड्गो मृगविशेषः पार्वतीयः । यस्य तर्पणार्थं भाजनम् । शशः प्रसिद्धः । पूतीकखषः शशाकृतिर्हिमवति प्रसिद्धः ॥ ६८ ॥

अभक्ष्यश्चेटो मत्स्यानाम् ॥ ६९ ॥

मत्स्यानां मध्ये चेटाख्यो मत्स्यो न भक्ष्यः ॥ ६९ ॥

सर्पशीर्षा मृदुरः क्रव्यादो ये चान्ये विकृता यथा मनुष्यशिरसः ॥ ७० ॥

जलमनुष्याख्या जलमत्स्यादयश्च तत्र सर्वे न भक्ष्याः । तत्र मनुः—

अनुमन्ता विशसिता निहन्ता क्रयविक्रयी ।
संस्कर्ता चोपहर्ता च खादकश्चाष्ट घातकाः ॥
न मांसभक्षणे दोषो न मद्ये न च मैथुने ।
प्रवृत्तिरेषा भूतानां निवृत्तिस्तु गरीयसी ॥

अप्रतिषिद्धेष्वपि भक्ष्यानिवृत्तिरेव ज्यायसीत्यर्थः ॥ ॥ ७० (ख० १७) ।

एवं मांसनिमित्तदुष्टं जातिदुष्टं कालदुष्टं चाभोज्यमुक्तम् । तत्र निमित्तदुष्टं यस्य कुले म्रियेतेत्यादि । जातिदुष्टं कलञ्जादि । कालदुष्टं पर्युषितादि । इदानीं परिग्रहाशुचीनि कानिचिदनुज्ञापकानि कानिचित्प्रतिषेधत इति—

मध्वामं मार्गं मांसं भूमिर्मूलफलानि रक्षा गव्यूतिर्निवेशनं युग्यघासश्चोग्रतः प्रतिगृह्याणि ॥ ७१ ॥

मधु पक्वमपक्वं वा । आमं तण्डुलादि । मृगस्य विकारो मार्गं मांसम् । भूमिः शालेयादि क्षेत्रम् । विश्रामस्थानमित्येके । मूलफलानि मूलकाम्रादीनि । रक्षाऽभयदानम् । गव्यूतिर्गोमार्गः । निवेशनं गृहम् । युगं वह[ती]ति युग्यो बलीवर्दः । तस्य घासो भक्ष्यं पलालादि । एतानि उग्रतोऽपि प्रतिग्राह्याण्यदुर्भिक्षेऽपि । उग्रः क्रूरकर्मा द्विजातिः । वैश्याद्वा शूद्रायां जातः । उग्रग्रहणं तादृशानामुपलक्षणम् ॥ ७१ ॥

एतान्यपि नानन्तेवास्याहृतानीति हारीतः ॥ ७२ ॥

एतान्यपि मध्वादीन्यप्यन्तेवास्याहृतान्येव प्रतिग्राह्याणि न स्वयमिति हारीतो मुनिराह ॥ ७२ ॥

आमं वा गृह्णीरन् ॥ ७३ ॥

पूर्वोक्तेषु आमं स्वयं गृह्णीरन् वा द्विजातय इति हारीताचार्यस्यैव पक्षः ॥ ७३ ॥

कृतान्नस्य विरसस्य ॥ ७४ ॥

आमस्यालाभे कृतान्नस्यापि विरसस्य लवणादिरसैरयुक्तस्य षष्ठीनिर्देशात्स्तोकं स्वयमन्तेवास्याहृतं वा गृह्णीरन् ॥ ७४ ॥

न सुभिक्षाः स्युः ॥ ७५ ॥

अनन्तरोक्तविधानद्वये यद्गृहीतं तन्न सुभिक्षाः सुहिता न भवेयुः । यावता प्राण-यात्रा भवति तावदेव गृह्णीरन् । यावता सौहित्यं न तावदिति ॥ ७५ ॥

स्वयमप्यवृत्तौ सुवर्णं दत्त्वा पशुं वा भुञ्जीत ॥ ७६ ॥

यदा तु दुर्भिक्षतयाऽऽत्मनोऽपि वृत्तिर्नोपलभ्यते प्रागेव पोष्यवर्गस्य तदा स्वयमप्यवृत्तौ यत्रैव लभ्यते तत्रैव भुञ्जीत । तत्रैव गुणविधिः सुवर्णं दत्त्वा सकृदेवोपभोक्तव्यम् । उप-रिष्टात्सुवर्णेन स्पृष्ट्वा । एतेन पशुं दत्त्वेति व्याख्यातम् । पशुरग्निः । अग्निः पशुरिति मन्त्रलिङ्गात् । गोसूक्तेन चाग्नेरुपस्थानदर्शनात् ॥ ७६ ॥

नात्यन्तमन्ववस्येद्वृत्तिं प्राप्य विरमेत् ॥ ७७ ॥

यदा विहिता वृत्तिर्लभ्यते तदा निषिद्धाया विरमेत् । न पुनः सकृत्प्रवृत्तायाम-वकुण्ठनेनेति न्यायेन तत्रैव रमेत् । अत्र च्छान्दोग्योपनिषत्—मटचीहतेषु कुरुष्वा-टिक्या सह जाययोषस्तिर्ह चाक्रायण इभ्यग्रामे प्रद्राणक उवास । स हेभ्यं कुल्मा-षान्खादन्तं बिभिक्ष इत्यादिर्मन्त्रश्च भवति । अवृत्त्या शुन आन्त्राणि पच इति । अवृत्त्या वृत्त्यभावे । अपर आह—दुर्भिक्षे स्वयमप्यवृत्तौ तन्निवृत्तेर्यत्र कुत्रचिन्नी-चेऽपि दातरि भुञ्जाने वसेत् । या च यावती च । सुवर्णमात्रं यंकंचन पशुं वा दत्त्वा न पुनरत्यन्तमलं वस्येत् । वृत्तिं प्राप्य विरमेदिति ॥ ७७ ॥

एवमापदि वृत्तिमुक्ता । सुभिक्षेऽनापदि वृत्तिमाह—

त्रयाणां वर्णानां क्षत्रियप्रभृतीनां समावृत्तेन न भोक्तव्यम् ॥ ७८ ॥

समावृत्तो द्विजातिः क्षत्रियादीनां त्रयाणां वर्णानां गृहे न भुञ्जीत ॥ ७८ ॥

प्रकृत्या ब्राह्मणस्य भोक्तव्यं कारणादभोज्यम् ॥ ७९ ॥

ब्राह्मणस्य त्वन्नं प्रकृत्याऽस्य भावेनैव भोज्यम् । कारणादभोज्यम् ॥ ७९ ॥

कारणमाह—

यत्राप्रायश्चित्तं कर्माऽऽसेवते प्रायश्चित्तवति ॥ ८० ॥

यत्र यदाऽग्निहोत्रवैश्वदेवाद्यप्रायश्चित्तरूपं नित्यमभ्युदयिकं वा कर्माऽऽसेवते तात्पर्येण करोति प्रायश्चित्तवत्यात्मनि न चोदितकर्मप्रायश्चित्तं तदा । एतस्मात्कारणा-दभोज्यमिति ॥ ८० ॥

चरितनिर्वेषस्य भोक्तव्यम् ॥ ८१ ॥

कृतप्रायश्चित्तस्य ॥ ८१ ॥

सर्ववर्णानां स्वधर्मे वर्तमानानां भोक्तव्यं शूद्रवर्जमित्येके ॥ ८२ ॥

शूद्रवर्जितानां स्वधर्मे वर्तमानानां सर्वेषामेव वर्णानामन्नं भोज्यं न ब्राह्मणस्यैवेत्येके मन्यन्ते ॥ ८२ ॥

तस्यापि धर्मोपनतस्य ॥ ८३ ॥

तस्यापि शूद्रस्यान्नं भोज्यं यद्ययं धर्मार्थमुपनत आनामितो भवति । धर्मग्रहणादर्थार्थमुपनतस्याभोज्यम् । आपत्कल्पश्चायम् ॥ ८३ ॥

तत्र गुणविधिः—

सुवर्णं दत्त्वा पशुं वा भुञ्जीत नात्यन्तमन्ववस्येद्वृत्तिं प्राप्य विरमेत् ॥ ८४ ॥

गतम् ॥ ८४ ॥

संघान्नमभोज्यम् ॥ ८५ ॥

संयोगेन यत्संहृतमन्नमभोज्यं ते सर्वे यद्यपि दद्युः ॥ ८५ ॥

परिक्रुष्टं च ॥ ८६ ॥

भोक्तुमागच्छेत्येवं परिक्रुश्य सर्वत आहूय यद्दीयते तत्परिक्रुष्टम् । तदभोज्यम् ॥ ८६ ॥

सर्वेषां च शिल्पजीविनाम् ॥ ८७ ॥

चित्रकर्मच्छत्रनिर्माणादिकाशिल्पं जीवन्ति उपजीवन्ति तेषां सर्वेषामपि ब्राह्मणानामन्नमभोज्यम् ॥ ८७ ॥

ये च शस्त्रमाजीवन्ति ॥ ८८ ॥

ये च शस्त्रेण जीवन्ति तेषामप्यभोज्यं क्षत्रियवर्जम् ॥ ८८ ॥

ये चाधिम् ॥ ८९ ॥

आजीवन्तीत्यपेक्षते । स्वगृहे परान्वासयित्वा तेभ्यो भृतिग्रहणमाधिर्यः स्तोम इति प्रसिद्धः । परभूमौ कुटिं कृत्वा स्तोमं दत्त्वा वसेत्तु य इति । ये चाधिमाजीवन्ति तेषामप्यन्नमभोज्यम् । अत्राधिं ये जीवन्ति तेषां वार्धुषिकत्वादेव निषेधः सिद्धः ॥ ८९ ॥

भिषक् ॥ ९० ॥

अभोज्यान्न इति प्रकरणाद्गम्यते । भिषग्भैषज्यवृत्तिः । धर्मार्थं ये सर्पदष्टादिकं चिकित्सन्ति ते भोज्यान्नाः ॥ ९० ॥

वार्धुषिकः ॥ ९१ ॥

वृद्ध्या जीवन्नप्यभोज्यान्नः ॥ ९१ ॥

अक्रीतराजको दीक्षितः ॥ ९२ ॥

दीक्षितो दीक्षणीयेष्ट्या संस्कृतः । सोऽपि यावत्क्रीतराजको न भवति सोमक्रयं न करोति तावदभोज्यान्नः ॥ ९२ ॥

अग्नीषोमीयसंस्थायामेव दीक्षितस्य भोक्तव्यम् ॥ ९३ ॥

अग्नीषोमीये पशौ संस्थिते समाप्ते दीक्षितस्य भोक्तव्यं न प्रागिति पक्षान्तरम् ॥ ९३ ॥

हुतायां वा वपायां क्रीते वा राजनि यज्ञार्थे वा
निर्दिष्टे शेषाद्भुञ्जीरन्निति ब्राह्मणम् ॥ ९४ ॥

हुतायामित्यादि तु यज्ञार्थमनिर्दिश्याप्यशेषादेव । यज्ञार्थ इति पक्षान्तर इदं यज्ञार्थमिति व्यादेशे कृते शेषाद्भुञ्जीरन्निति ब्राह्मणं भवति । ब्राह्मणग्रहणं प्रीत्युपलब्धितः प्रवृत्तिरपरस्मृतितो मा भूदिति प्रत्यक्षमेवोक्तं ब्राह्मणमिति ॥ ९४ ॥

क्लीबः ॥ ९५ ॥

क्लीबः प्रसिद्धः । सोऽप्यभोज्यान्नः ॥ ९५ ॥

राज्ञः प्रैषकृत् ॥ ९६ ॥

प्रैषकृद् दौत्यकर्मा । तस्यापि प्रतिषेधः ॥ ९६ ॥

अहविर्याजी चाऽऽर्यविधिप्रव्रजितः ॥ ९७ ॥

अग्निहोत्राद्यननुष्ठाताऽपि आर्यः शिष्टः । विधिराचारस्तस्मात्प्रव्रजितः प्रच्युतः । सोऽप्यभोज्यान्नः ॥ ९७ ॥

यश्चाग्नीनपास्यति ॥ ९८ ॥

अविधिना श्रेताग्निगृह्याग्नित्यागी ॥ ९८ ॥

यश्च सर्वान्वर्जयति ॥ ९९ ॥

आत्मानं श्रोत्रियं मन्यमान इतरान्वर्जयति । अन्नादिसंसर्गेण संसर्गदोषात् ॥ ९९ ॥

सर्वान्नी च ॥ १०० ॥

सर्वेषामन्नमश्नातीति मत्वर्थेन निरन्तरमित्युक्तम् । तत्तु युक्तानामयुक्तानां च ॥ १०० ॥

श्रोत्रियो निराकृतिः ॥ १०१ ॥

श्रोत्रियो निःस्वाध्यायः । निवृत्त इत्यर्थः ॥ १०१ ॥

वृषलीपतिः ॥ १०२ ॥ (ख० १८) ।

क्रमविवाहे यस्य वृषली शूद्रजाता जीवतीतरा मृता स वृषलीपतिः । स श्रोत्रियोऽप्यभोज्यान्न इति ॥ १०२ ॥ (ख० १८) ।

मत्त उन्मत्तो बद्धोऽणिकः प्रत्युपविष्टो यश्च प्रत्युपवेशयते यश्च प्रश्रयते तावन्तं कालम् ॥ १०३ ॥

मत्तो मदद्रव्यसेवयाऽप्रकृतिं गतः । उन्मत्तो भ्रान्तः । बद्धो निगडादिना । अणिकः पुत्राच्छुल्कग्राही । पुत्राचार्य इति शास्त्रे निन्दितः । प्रत्युपविष्टः ऋयणादिना कारणेन धर्मादिकं निरुध्य तत्पार्श्वे उपविष्ट इतरस्तत्परिहारमुक्तवांस्तेन सहाऽऽसीनः । प्रत्युपवेशयते यश्च प्रश्रयते तिष्ठति । एते मत्तादयस्तावन्तं कालमभोज्यान्ना यावन्मदाद्यनुवृत्तिः । अपर आह—अणिक ऋणिक ऋणस्य दाता । प्रत्युपविष्ट इदं विशेषणमिति ॥ १०३ ॥

अथ क आश्यान्नः ॥ १०४ ॥

यद्येतेऽभोज्यान्नाः कस्तर्ह्याश्यान्नः कस्य तर्ह्यन्नमशनीयमिति । यद्यप्येतेऽभोज्यान्ना इति उक्ते परिशिष्टा भोज्यान्ना इति गम्यते तथाऽप्यनेकमतोपन्यासार्थोऽयं प्रश्नपूर्वक आरम्भः ॥ १०४ ॥

यस्येप्सेदिति कण्वः ॥ १०५ ॥

य एवमर्थयते स एवाऽऽश्यान्न इति कण्व ऋषिर्मन्यते ॥ १०५ ॥

पुण्य इति कौत्सः ॥ १०६ ॥

सर्ववर्णानां स्वधर्मे वर्तमानानामित्युक्तत्वादभोज्यान्नाः सर्वे पुण्या एव । इह पुनः पुण्यग्रहणमतिशयार्थम् । तपोहोमजपैः स्वधर्मेण युक्तः पुण्यः । स स्वयं चाप्रार्थयमानोऽपि भोज्यान्न इति कौत्सस्य पक्षः ॥ १०६ ॥

यः कश्चिद्दद्यादिति वार्ष्यायणिः ॥ १०७ ॥

यः कश्चित्पुण्योऽपुण्यो वा सततं दानशीलः स भोज्यान्न इति वार्ष्यायणिराह । तथा च मनुः—श्रद्धापूतं वदान्यस्य हतमश्रद्धयेतरदिति ॥ १०७ ॥

अत्रोपपत्तिः—

यदि हि रजः स्थावरं पुरुषे भोक्तव्यमथ चेच्चलं दानेन निर्दोषो भवति ॥ १०८ ॥

रजः पापम् । तद्यदि पुरुषे कर्तरि स्थावरं स्थिरं न भोगमन्तरेण क्षीयते तदा ततः

प्रतिग्रहभोक्तारि संप्रकथाभावाद्दोक्तव्यम् । अथ चेत्फलमुपभोगमन्तरेणापि क्षीयते तदा सततं तद्दानशीले न मुहूर्तमपि स्वयमवतिष्ठत इति कुतो भोक्तुर्दोष इति ॥ १०८ ॥

शुद्धा भिक्षा भोक्तव्यैककुणिकौ कण्वकौत्सौ ॥ १०९ ॥

धार्मिकेणोपहृता भिक्षा शुद्धा । सा भोक्तव्या; इत्येककुणिकादीनां चतुर्णां पक्षः ॥ १०९ ॥

सर्वतोपेतं वार्ष्यायणीयम् ॥ ११० ॥

सर्वत उपेतं छान्दसो गुणः । उपेतमयाचितोपपन्नं तत्सर्वतोऽपि भोज्यमिति वार्ष्यायणीयं मतम् ॥ ११० ॥

इदानीं स्वयमाह—

पुण्यस्येप्सतो भोक्तव्यम् ॥ १११ ॥

कण्वकुत्सयोः पक्षयोः समुदित आचार्यस्य पक्षः ॥ १११ ॥

पुण्यस्याप्यनीप्सतो न भोक्तव्यम् ॥ ११२ ॥

यः प्रार्थितोऽपि नेत्यसकृदुक्त्वा कथंचिदापतितेप्सः सोऽनीप्सन्नुच्यते । तस्य पुण्यस्याप्यभोज्यमिति । अपर आह—अनीप्सत इति कर्तरि षष्ठी । पुण्यस्याप्यन्नमभोज्यं यदि भक्ष्यमाणः पूर्ववैरादिना स्वयमीप्सितं न भवति ॥ ११२ ॥

यतः कुतश्चाभ्युद्यतं भोक्तव्यम् ॥ ११३ ॥

सर्वतोपेतमित्युक्तमेव पुनरुच्यते विशेषविवक्षया ॥ ११३ ॥

तदाह—

नाननियोगपूर्वमिति हारीतः ॥ ११४ ॥

अद्य तुभ्यमिदमाहरिष्यामि तद्भवता ग्राह्यमिति निवेदनं नियोगः न नियोगोऽनियोगः । पुनर्नञ्समासः । द्वौ नञौ प्रकृतमर्थं चोदयतः । अननियोगो नियोगस्तत्पूर्वं चेदभ्युद्यतं न भोज्यमिति ॥ ११४ ॥

अथ पुराणश्लोकानुदाहरन्ति—

उद्यतामाहृतां भिक्षां पुरस्तादप्रवेदिताम् ।
भोज्यां मेने प्रजापतिरपि दुष्कृतकर्मणः ॥
न तस्य पितरोऽश्नन्ति दश वर्षाणि पञ्च च ।
न च हव्यं वहत्यग्निर्यस्तामभ्यधिमन्यते ॥ इति ॥११५॥

अपि च पुराणे—

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं चैव पुराणं पञ्चलक्षणम् ॥

इत्येवंलक्षणं भविष्यादौ । उपे(य)नां हस्ताभ्यामुद्यम्य धारितामाहृतां स्वयमानीतां पूर्वमनिवेदितां भिक्षां दुष्कृतकर्मणोऽपि सकाशादभोज्यां मेने प्रजापतिः मनुः प्रजापतिर्यस्मिन्निति मानवे दर्शनात् । परं न तामभ्याधिमन्यते प्रत्याचष्टे तस्य पितरः कव्यं नाश्नन्ति । कियन्तं कालम्—दश वर्षाणि पञ्च च । अग्निश्च हव्यं न वहति । तावन्तमेव कालमिति प्रत्याख्यातुर्निन्दार्थः ॥ ११५ ॥

चिकित्सकस्य मृगयोः शल्यकृन्तस्य पाशिनः
कुलटायाः षण्ढकस्य च तेषामन्नमभोज्यम् ॥११६॥

चिकित्सको भिषग्वृत्तिः । मृगयुर्मृगघाती लुब्धः । शल्यकृन्तः शस्त्रेण ग्रन्थ्यादिच्छेत्ताऽम्बष्ठः । पाशी पाशवान्पाशजालेन मृगादीनां ग्राहकः । कुलमटतीति कुलटा व्यभिचारिणी । अभिसारिका वा । षण्ढकस्तृतीयाप्रकृतिरुत्पाटितवृषणश्च । तेषां चिकित्सकादीनामन्नमभोज्यम् । चिकित्सकषण्ढकयोः पुनर्ग्रहणमुद्यतस्यापि प्रतिषेधार्थम् । पूर्वत्र ग्रहणं शक्यमकर्तुम् । एवं तर्हि सूत्रकारस्य विप्रतिषेधः । अयं तु पुराणश्लोक इत्यपौनरुक्त्यम् ॥ ११६ ॥

अन्नादे भ्रूणहा मार्ष्टयेनं नाभिशंसति स्तेनः
प्रमुक्तो राजनि याचन्न(द)नृतसंगरे ॥ ११७ ॥

षडङ्गस्य वेदस्याध्येता भ्रूणः । तं यो हतवान्स भ्रूणहा । सोऽन्नादे मार्ष्टि हि लिम्पति । किम् । प्रकरणादेन इति गम्यते । भ्रूणघ्नो योऽन्नमत्ति तस्मिन्नादेनोऽन्नमेनः संक्रामति । तस्मात्तस्योद्यतमप्यभोज्यमिति प्रकरणाद्गम्यते । संगतः प्रादः । इतरः पुराणे श्लोके पठ्यमाने पतितसंभोगेन नाभिशंसति मिथ्यैव ब्रूत इदं त्वया कृतमिति । तस्मिन्नाभिशंसति तदेनो मार्ष्टि । मनुश्च—

पतितं पतितेत्युक्त्वा चोरं चोरेति वा पुनः ।
वचनात्तुल्यदोषः स्यान्मिथ्या द्विर्दोषभाग्भवेत् ॥

इति द्वैगुण्यमाह तदभ्यासे द्रष्टव्यम् । स्तेनः प्रकीर्णकेश इति वक्ष्यति । स एव तृतीयपादस्यार्थः । कर्तृभेदादपौनरुक्त्यम् । संगतः प्रतिश्रयः सत्यसंगत इति यथा । यः प्रतिश्रुत्य न ददाति सोऽनृतसंगरः । रकारश्छान्दसः । तस्मिन्याचन्नादेनो मार्ष्टि । तस्मात्प्रतिश्रुतं देयमिति ॥ ११७ ॥

गुरौ याज्यश्च शिष्यश्च स्त्रियश्चर्तुव्यभिचारिणीति ॥ ११८ ॥ (ख० १९)।

इति सत्याषाढहिरण्यकेशिश्रौतसूत्रे (धर्मसूत्रापरपर्याये) षड्विंशप्रश्ने पञ्चमः पटलः ॥ ५ ॥

गुरौ याज्ये (जके) याज्यः । तथाऽध्यापके शिष्यः । स्त्रिय ऋतुकाले तां विहायान्यां गच्छेत्स व्यभिचारी । तस्मिन्नसौ स्वस्यत्ते(न्ते) एनो निमार्ष्टि । एवं याज्यशिष्यावपि ॥ ११८ ॥ (ख० १९) ॥

इति श्रीमन्महादेवविरचितायां हिरण्यकेशिधर्मप्रश्नव्याख्यायामुज्ज्वलायां वृत्तौ षड्विंशप्रश्ने पञ्चमः पटलः ॥ ५ ॥

अथ षष्ठः पटलः ।

अध्यात्मिकान्योगाननुतिष्ठेन्न्यायसंहितानैश्चारिकान् ॥ १ ॥

उक्ता धर्माः । पतनीयान्यभिधास्यंस्तेषु मुख्यत्वेन ब्रह्मचारिधर्मानभिधाय कांश्चित्स्नातकस्यापि कांश्चित्साधारणानप्यभिधाय गृहस्थधर्माभिधाने कर्तव्ये सत्यध्यात्मविद्याप्रतिपादनं प्रायश्चित्तानि विध्यपराधे वक्ष्यन्परमप्रायश्चित्तत्वेन प्रसक्तमाह । शुचिकराणि कर्माणि तेषां प्रायश्चित्तानि वक्ष्यन्नादित आत्मज्ञानं तदुपयोगिनश्च योगानधिकुरुते । तस्यापि सर्वपापहरत्वेन मुख्यप्रायश्चित्तत्वात् । श्रूयते हि—

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥ इति ।

तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्त इति वा । याज्ञवल्क्योऽप्याह— इज्याचारदयाहिंसादानस्वाध्यायकर्मणाम् ।

अयं तु परमो धर्मो यद्योगेनाऽऽत्मदर्शनम् ॥ इति ।

अध्यात्मं भवा अध्यात्मिकाः । छान्दसो वृद्ध्यभावः । आत्मनो लम्भयितॄन्योगांश्चित्तसमाधानहेतून्वक्ष्यमाणांश्चाक्रोधादीननुपायाननुतिष्ठेत्सेवेत । न्यायसंहितानुपपत्तिसमन्वितान् । उपपद्यन्ते हि न्यायतः क्रोधादीनां दोषाणां निर्घाते । अनैश्चारिकान् । निश्चारश्चित्तस्य बहिर्विक्षेपः । तस्मै ये प्रभवन्ति क्रोधादयो वक्ष्यमाणास्ते नैश्चारिकाः । तत्प्रतिपक्षभूतान् । अक्रोधादिषु सत्सु चित्तं निश्चरणशीलमात्मन्यमनं निश्चलं तिष्ठति । तस्मात्ताननुतिष्ठेत् । आत्मप्रलब्ध्यमक्रोधादिलक्षणं चित्तसमाधानं कुर्यादिति ॥ १ ॥

किं पुनरात्मा प्रयत्नेन लब्धव्य इत्याह—

आत्मलाभान्न परं विद्यते ॥ २ ॥

आत्मलाभात्परमुत्कृष्टं लाभान्तरं नास्ति । तस्मात्तस्य लाभाय यत्न आस्थेय इति । कः पुनरसावात्मा । प्रत्यगात्मा । नन्वसौ नित्यलब्धः । नहि स्वयमेव स्वस्यालब्धो भवति । सत्यम् । प्रकृतिग(क)लनात्तद्धर्मतामु गतो नष्टस्वरूप इव भवति । प्रकृत्या हि नित्यसंबद्धः पुरुषः । तथाविधश्च संबद्धो यथा परस्परं विवेको न जायते । अन्योन्यधर्माश्चान्योन्यत्राध्यस्यन्ते । यथा क्षीरोदके संपृक्ते न ज्ञायत इदं क्षीरमिदमुदकमस्मिन्नवकाशे क्षीरमयुष्मिन्नुदकमिति । यथा वा अग्नययोगोलकयोः संबद्धयोर्येऽग्निधर्मा उष्णत्वभास्वरत्वादयस्तेऽयोगोलकेऽध्यस्यन्ते । ये चायोगालकस्य धर्माः काठिन्यदैर्घ्यादयस्तेऽग्नावध्यस्यन्ते । एवं हि तत्र प्रतिपत्तिः । एकं वस्तूष्णं दीर्घं भास्वरं कठिनमिति । तद्वदिहापि पुरुषधर्माश्चैतन्यादयः प्रकृतावध्यस्यन्ते प्रकृतिधर्माश्च सुखदुःखमोहपरिणामादयः पुरुषे । ततश्चैकं वस्तु चेतनं सुखदुःखादिफलपरिणामीति व्यवहारः । वस्तुतस्तु तस्मिन्संघातेऽचेतनांशः परिणामी । चेतनांशस्तु तमनुधावति । येन येन रूपेण परिणमति तेन तेनाभेदाध्यासमापद्यते । यथा क्षीरावस्थां गतं घृतं क्षीरसंपृक्तं दध्यात्मना परिणमति तेनानु तामवस्थां प्रविशति त[द्व]त् । तदिदमुच्यते- 'तत्सृष्ट्वा तदेवानुप्राविशत्' इति । सर्गेऽप्यात्मनः कर्तृत्वं इदमेव यदुपभोक्तृत्वतया निमित्तत्वम् । तदेवं स्वभावतः स्वस्थोऽप्यात्मा प्रकृत्या महाभेदमापन्नस्तद्धर्मा भवति । एवं तद्विकारेण महतो विकारेणाहंकारेणेत्याशरीराद्द्रष्टव्यम् । स्थूलोऽहं कृशोऽहं देवदत्तोऽहं मनुष्योऽहं तिर्यगहमिति । तस्यैवंगतस्यापेक्षितः स्वरूपलाभो नीचैर्गभवर्धितस्य राजपुत्रस्य । तद्यथा शबरादिभिर्बाल्यात्प्रभृति स्वसुतैः सह वर्धितो राजपुत्रस्तज्जातीयमात्मानमनुभूय च बन्धुभिः स्वरूपे कथिते लब्धस्वरूप इव भवति । प्रकृत्यावेशेन स्वभावान्तरं नीत आत्मा मातृस्थानीयया तत्त्वमसीति श्रुत्या स्वभावं नीयते । यदेवंविधं परिशुद्धं वस्तु तदेव त्वमसि न तु यथा मन्यसे मनुष्योऽहं दुःखयहमित्यादि तथेति । एवंभूतो राजा तत्त्वमसीति राजपुत्र । ननु तत्त्वमसीति ब्राह्मणात्तादात्म्यमुच्यत इति को वा ब्रूते । नेति[नेतीति निषेधाद्]ब्रह्मापि नान्यदात्मनः । किं पुनरयमात्मैक आहोस्विन्नाना । किं तेन ज्ञातेन त्वं तावदेवंविधश्चिदेकोऽसौ नित्यनिर्मलः कलुषवस्तुसंसर्गात्कुलषतामिव गतस्तद्वियोगश्च ते मोक्षः त्वयि मुक्ते यद्यन्ये संसरिष्यन्ति का ते क्षतिः । अथ न सन्ति तथाऽपि कस्ते लाभ इत्यलमियता । महत्येषा कथा । तदप्येते श्लोका भवन्ति—

नीचानां वसतौ तदीयतनयैः सार्धं चिरं वर्धित-
स्तज्जातीयमवैति राजतनयः स्वात्मानमप्यञ्जसा ।
संघाते महदादिभिः सह वसंस्तद्वत्परः पूरुषः
स्वात्मानं सुखदुःखमोहकलितं मिथ्यैव धिङ् मन्यते ॥
दाता भोगपरः समग्रविषयो यः शासिता दुष्कृतां

राजा स त्वमसीति मातृमुखतः श्रुत्वा यथावत्स तु ।
राजीभूय यथार्थमेव यतते तद्वत्सुमान्बोधितः
श्रुत्वा तत्त्वमसीत्यपास्य दुरितं ब्रह्मैव संपद्यते ॥
इत्येवं बहवोऽपि राजतनयाः प्राप्ता दशामीदृशीं
ते चान्योन्यमिदामपास्य सहसा सर्वे भजन्त्येकताम् ।
किंतु स्वे परमे पदे पृथगमी तिष्ठन्ति भातास्तथा
क्षेत्रज्ञा इति तत्त्वमादिवचसां काऽभेदवादे क्षतिः ॥
तेष्वेको यदि जातु मातृवचनात्प्राप्तो निजं वैभवं
नानात्वे क्षतिरस्य का किल परे सन्त्यन्यथा च स्थिताः ।
यद्वाऽन्ये न भवेयुरेवमपि को लाभोऽस्य तद्भूतिः ॥
पुंसामित्थमिदानिरूप्य न वयं निर्बध्य निश्चितस(न्म)हे ॥ इति ॥ २ ॥

तदिहापेक्षितमात्मज्ञानमुपदिश्यते । तत्त्रिविधम् । श्रुतं मननं निदिध्यासनमिति 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति श्रवणात् । तत्र श्रुतमुपनिषदां तात्पर्यावधारणम् । मननमुपपत्तिनिरूपणम् । एवं श्रुतेऽनुमते चाऽऽत्मनि साक्षात्कारहेतुरविक्षिप्तेन चेतसा निरन्तरं भावनं ध्यानम् । तत्सिद्ध्यै श्रौतज्ञानं तावदाह—

तत्राऽऽत्मलाभीयान् श्लोकानुदाहरिष्यामः ॥ ३ ॥

तत्रेति वाक्योपन्यासे । आत्मलाभीयानात्मज्ञानप्रयोजनान् । अनुप्रवचनादित्वाच्छः । श्लोकान्पादबद्धानौपनिषदान्मन्त्रानुदाहरिष्यामः । उद्धृत्याऽऽहरिष्यामो ग्रन्थे निवेशयिष्यामः ॥ ३ ॥

पूः प्राणिनः सर्व एव गुहाशयस्याहन्यमानस्य विकल्मषस्याचलं चलनिकेतं येऽनुतिष्ठन्ति तेऽमृताः ॥ ४ ॥

गुहेति प्रकृतिनाम ।

यतः स्मृतं कारणमप्रमेयं ब्रह्म प्रधानं प्रकृतिः प्रसूतिः ।
आत्मन् गुहायां निरनाद्यनन्तं क्षेत्रं तथैवामृतमक्षरं च ॥

इति पुराणदर्शनात् । बुद्धिरित्यौपनिषदाः । अधिकरणसाहित्यात् । तस्यां शेते तया सहाविभागाच्चाऽऽस्तिष्ठतीति गुहाशय आत्मा । 'अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजा जनयन्तीं सरूपाम् । अजो ह्येको जुषमाणोऽनुशेते' इति मन्त्रान्तरम् । अहन्यमानस्येति । न ह्यसौ शरीरे हन्यमाने हन्यते । विकल्मषस्येति । निर्लेपस्येति । धर्माधर्मादिभिरन्तःकरणस्य धर्मैरात्मनि चाध्यस्तैः । एवं भूतस्याऽऽत्मनः सर्व एव प्राणिनो ब्रह्मा-

द्यास्तिर्यगन्ताः प्राणादिमन्तः संघाताः पुः पुग्मुग्भोगस्थानम् । यथा राजा पुरमधिवसन्सचिवैरानीतान्भोगाननुपभुङ्क्ते तथाऽयं देवादिशरीरमधिवसन्करणैरुपस्थापितान्भोगानुपभुङ्क्ते । तमेवंभूतमचलं सर्वगतत्वेन निश्चलम् । चलनिकेतं निकेतं स्थानं शरीरं तदस्य चलं तं येऽनुतिष्ठन्ति उपासत एवंभूतोऽहमिति प्रतिपद्यन्ते तेऽमृता मुक्ता भवन्ति ॥४॥

विषयसंगपरित्यागेनायमुपास्य इत्याह—

यदिदमिती हेदिह लोके विषयमुच्यते
विधूय कविरेतदनुतिष्ठेद्गुहाशयम् ॥ ५ ॥

यदिदमिति । विषयमेतदिति । सर्वत्र लिङ्गव्यत्ययश्छान्दसः । एवमिदिति तकारस्य दकारः । हशब्द आश्चर्ये । इति शब्देनाऽऽवृत्तेन शब्दादिषु विषयेष्ववान्तरप्रकारभेदः प्रतिपाद्यते । विषयापहृतचेतसो हि वदन्ति इति ह तस्याहितमिति ह तस्यासुखस्पर्श इति ह तस्यारूपं निष्टप्तमिव कनकमिति ह तस्यास्वादिष्ठोऽधरमणिरिति ह तस्यागन्धो घ्राणतर्पण इति । एवं दिव्यमानुषभेदोऽपि द्रष्टव्यः । इति ह इति हात्रानन्तरपर इतिशब्दोऽध्याहार्य इति । इति ह इति हेत्येतयोः । यं लोके विषयमुच्यते । सामान्यापेक्षमेकवचनम् । एतं विधूय कविरेतदनुतिष्ठेद्गुहाशयम् । कविर्मेधावीति ॥ ५ ॥

विषयत्यागे हेतुमाह—

आत्मन्नेवाहमलब्धैतद्धितꣳ सेवस्व नाहितम् ।
अथान्येषु प्रतीच्छामि साधुष्ठान(स्थान)मनपेक्षया महान्तं तेजस्कायं सर्वत्र निहितं प्रभुम् ॥ ६ ॥

शिष्यं प्रत्याचार्यवचनमेतत् । द्वौ चात्र हेतू । विषयाणां पराधीनत्वमहितत्वं च । महान्तं गुणतः । तेजस्कायं तेजःशरीरम् । 'तेजो वा अयं स्वयंप्रकाशमात्मज्योतिः सम्राडिति होवाच ' इति बृहदारण्यकम् । सर्वत्र निहितं सर्वगतम् । प्रभुं स्वतन्त्रम् । एवंभूतं गुहाशयमेतावन्तम् । अहम् । आत्मन्नसप्तम्येकवचनस्य लुक् । आत्मनि । अस्मिंस्तदीये संघातेऽन्यानपेक्षयैव लब्धुं योग्यमलब्धम् । अथान्येष्वग्नीन्द्रादिषु तं तं विषयं प्रतीच्छामीति लब्धुं लट् । प्रत्यैच्छम् । इदानीं तु तं लब्ध्वा तथाविधोऽस्मि त्वमप्येतदेव हितं साधुस्थानं साधुमार्गं सेवस्वानाहितविषयानुसंधानमिति ॥ ६ ॥

पुनरप्यसौ कीदृश इत्याह—

सर्वभूतेषु यो नित्यो विपश्चिदमृतो ध्रुवोऽनङ्गोऽ-
शब्दोऽशरीरोऽस्पर्शश्च महाञ्छुचिः स सर्वं परमा
काष्ठा स वैषुवतः स वै वैभाजनं पुरम् ॥ ७ ॥

सर्वेषु भूतेषु मनुष्यादिषु संघातेषु यो नित्यो विनश्यत्सु न नश्यति । विपश्चिन्मेधावी चित्स्वरूपः । अमृतो नित्यत्वादेवामरणधर्मा । ध्रुव एकरूपो विकाररहितः । न प्रधानवद्विकारिणः सतो धर्मिरूपेणास्य नित्यत्वमित्यर्थः । अनङ्गश्चरणाद्यङ्गरहितः । अशब्दोऽस्पर्श इति भूतगुणानामुपलक्षणम् । शब्दादिगुणरहितः । अशरीरः सूक्ष्मशरीरेणापि वर्जितः । महाशुचिर्महत्त्वं शौचस्य विशेषणम् । परमार्थतोऽन्यत् । शुद्धः । स सर्वं प्रकृत्यभेदद्वारेण स एव । परमा काष्ठा ततः परं गन्तव्याभावात् । स वैषुवतं विषुवान्नाम गवामयनस्य मध्ये भवमहरेकविंशम् । तदहरुपयन्ति विषुवन्तं मध्ये संवत्सरस्येति दर्शनात् । विषुवानेव वैषुवतम् । तद्यथा संवत्सरस्य मध्ये भवति एवमङ्गानामेष मध्ये । मध्ये ह्येषोऽङ्गानामिति बह्वृचब्राह्मणम् । स एव च वैभाजनं पुरं विविधैर्मार्गैर्भजनीयं विभजनं तदेव वैभाजनम् । ब्राह्म(प्रज्ञा)दिरनुशातिकादिश्च । यथा समृद्धं पुरं सर्वैरर्थिभिः प्राप्यमेवमयमपीति ॥ ७ ॥

तं योऽनुतिष्ठेत्सर्वत्र प्राध्वं चास्य सदाचरेद्दुर्दर्शं
निपुणं युक्तो यः पश्येत्स मोदेत विष्टपे ॥ ८ ॥

तमेवंभूतमात्मानं योऽनुतिष्ठेदुपासीत प्राध्वं चास्य सर्वत्र सर्वावस्थासु सदा प्राध्वमानुकूल्यमाचरेत् । आनुकूल्यं प्रतिषिद्धवर्जनं नित्यनैमित्तिककर्मानुष्ठानं च । यश्च दुर्दर्शं निपुणं सूक्ष्ममेतं युक्तः समाहितो भूत्वा पश्येत्साक्षात्कुर्यात्स स्वविष्टपे स्वमहिमनि स्थितो मोदते विगतपापः सर्वदुःखविवर्जितो भवति । संसारदशायां वा तिरोहितं निरतिशयं स्वमानन्दमनुभवतीति केचित् ॥ ८ ॥

आत्मन्पश्यन्सर्वभूतानि न मुह्येच्चिन्तयन्कविरा-
त्मानं चैव सर्वत्र यः पश्येत्स वै ब्रह्मा नाकपृष्ठे
विराजति ॥ ९ ॥

सर्वाणि भूतानि आत्मनि शेषत्वेन स्थितानि पश्यन्नुपनिषदादिभिर्जानन्पश्चाच्चिन्तयन्युक्तिभिर्निरूपयन्यो न मुह्येन्मोहं न गच्छेत् । कविर्मेधावी । पश्चाच्चैव सर्वत्रावशेषित्वेन स्थितमात्मानं पश्येत्साक्षात्कुर्यात्स वै ब्राह्मणो नाकपृष्ठे तत्सदृशे स्वे महिमनि स्थितो विराजति स्वयं प्रकाशते ॥ ९ ॥

निपुणोऽणीयान्बिसोर्णाया यः सर्वमावृत्य ति-
ष्ठति वर्षीयांश्च पृथिव्या ध्रुवः सर्वमारभ्य
तिष्ठति स इन्द्रियैर्जगतोऽस्य ज्ञानादन्योऽनन्यस्य
ज्ञेयात्परमेष्ठी विभाजस्तस्मात्कायात्प्रभवन्ति सर्वे
स मूलꣳ शाश्वतिकः स नित्यः ॥ १० ॥

निपुणो मेधावी चित्स्वरूपः । बिसोर्णाया बिसतन्तोरप्यणीयान्सूक्ष्मः । सर्वमावृत्य व्याप्य तिष्ठति । यश्च पृथिव्या अपि वर्षीयान्वृद्धतरः सर्वगतत्वादेव सर्वमारभ्य विष्टभ्य शेषित्वेनाधिष्ठाय तिष्ठति । ध्रुव एकरूपः । स इन्द्रियैरस्य जगतो यदिन्द्रियै-र्ज्ञानमिन्द्रियजन्यं ज्ञानं तस्मात् । कीदृशाज्ज्ञेयात् । अनन्यस्य पञ्चम्यर्थे षष्ठी । ज्ञेया-न्नीलपीतादेराकारादनन्यभूतं नीलपीताद्याकारं तस्माद्विषयज्ञानादन्य इत्यर्थः । तस्मा-द्विज्ञानादन्योऽन्तर आत्माऽऽनन्दमय इति ।

ज्ञानस्वरूपमत्यन्तं निर्मलं परमार्थतः ।
तदेवार्थस्वरूपेण भ्रान्तिदर्शनतः स्थितम् । इति पुराणम् ।

स्वभावस्वच्छस्य चिद्रूपस्याऽऽत्मनो नीलपीताद्याकारकालुष्यं तद्रूपाया बुद्धिवृत्ते-रनुरागकृतं भ्रान्तमित्यर्थः । वैषयिकज्ञानादन्य इति विशेषणाज्ज्ञानात्मक इत्यपि सिद्धम् । सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुतेः । एवंभूतः स आत्मा परमेष्ठी परमस्वरूपे तिष्ठति । विभाज इत्यस्य परमेणसंबन्धः । विभज्याऽऽत्मानं देवमनुष्यादिरूपेण नानाशरीरानुप्रवेशेनेति विभाक् । तस्माद्विभाजो निमित्तभूतात्सकायादेव मनुष्यादिश-रीराणि प्रभवन्ति उत्पद्यन्ते । स मूलं सप्रपञ्चसृष्टेर्मोक्तृताया मूलकारणम् । स नित्योऽ-विनाशी । शाश्वतिक एकरूपोऽविकारः ॥ १० ॥

दोषाणां तु निर्घातो योगमूल इह जीविते निर्हृत्य
भूतदाहान्क्षेमं गच्छति पण्डित इति ॥ ११ ॥

अध्यात्मज्ञानद्वारेण पण्डितो लब्धज्ञान आत्मसाक्षात्कारी क्षेममभयं मोक्षम् । अभयं वै जनक प्राप्तोऽसीति बृहदारण्यकम् । समाप्ताः श्लोकाः ॥ ११ ॥

अथ भूदाहीयान्दोषानुदाहरिष्यामः ॥ १२ ॥

भूतानां दाहो भूतदाहः । तस्मै हिता भूतदाहीयाः ॥ १२ ॥

क्रोधो हर्षो रोषो लोभो द्रोहो दम्भो मृषोद्यम-
त्याशपरीवादावसूया काममन्यू आनात्म्यमयोग-
स्तेषां योगमूलो निर्घातः ॥ १३ ॥

ताडनक्रोशनादिहेतुकोऽन्तःकरणविक्षोभः स्वेदकम्पादिलिङ्गकः क्रोधः । हर्ष इष्टलाभाच्चेतस उद्रेको रोमादिलिङ्गकः । रोषः क्रोधस्यैव कियानपि भेदः । पित्रादिषु प्रतिकूलेषु मनसो वैलोम्यमात्रमकार्यकरम् । लोभो द्रव्यव्यासङ्गः । मोहः कार्याकार्ययोरविवेकः । स च प्रायेण क्रोधादिजन्योऽपि पृथगुच्यते कश्चित्तदभावेऽपि संभवेदिति । द्रोहोऽपकारः । दम्भो धार्मिकत्वप्रकाशनेन लोकवञ्चनम् । मृषोद्यमनृतवदनम् । अत्याशोऽत्यशनम् । परीवादः परनिन्दा । असूया परगुणेष्वक्षमा । कामः स्त्रीसङ्गः । मन्युर्गूढो दोषः । आनात्म्यमजितेन्द्रियत्वं जिह्वादिचापलादि । अयोगो विक्षिप्तचित्तता । एवं भूतदाहीया दोषाः । तेषां योगमूलो निर्घातः ॥ १३ ॥

के पुनस्ते योगाः--

अक्रोधोऽहर्षोऽरोषोऽलोभोऽमोहोऽद्रोहोऽदम्भः सत्यवचनमनत्याशोऽपैशुनमनसूया संविभागस्त्याग आर्जवं मार्दवꣳ शमो दमः सर्वभूतैरविरोधो योग आर्यमानृशꣳस्यं तुष्टिरिति सर्वाश्रमाणाꣳ समयपदानि तान्यनुतिष्ठन्विधिना सार्वगामी भवति ॥ १४ ॥ (ख० २०) ॥

एते चाक्रोधादयो विभावरूपा न क्रोधासंभवमात्रं क्रोधादिनिर्घातहेतुतयोपदेशात् । के पुनस्ते--अलोभः संतोषोऽलंबुद्धिः । अमोहोऽवधानम् । अद्रोहः पुनः पुनः प्रसक्तेषु क्रोधादिषु मा कार्षमिति संकल्पः । अदम्भो धर्मार्थमनुष्ठानम् । सत्यवचनं यथादृष्टार्थवादित्वम् । अनत्याशो नियतभोजनम् । अपैशुनं परदूषणानुच्चारणम् । अनसूया परगुणेष्वनुमोदनम् । संविभाग आत्मानमुपरुध्य(ध्या)पि ला(दा)नम् । त्यागोऽपरिग्रहः । आर्जवं मनोवाक्कायकर्मणामेकरूपता । मार्दवं सूपगमता । शमः काममन्युपरित्यागः । दम इन्द्रियजयः । एताभ्यामेव गतत्वात्पूर्वत्र स्वस्मिन्क्रमेऽकामोऽमन्युरात्मवत्त्वमिति नोपादिष्टम् । सर्वभूतैरविरोधः । सर्वग्रहणं क्षुद्रैरप्यविरोधार्थम् । योग ऐकाग्र्यम् । आर्याणां भाव आर्यं शिष्टाचारानुपालनम् । आनृशंस्यं व्यवहारवचनादौ प्रसक्तस्यापि नैष्ठुर्यस्य वर्जनम् । तुष्टिरनिर्वादः । समयो व्यवस्था । सा च प्रकरणाद्धर्मज्ञानम् । पदं विषयः । एतेऽक्रोधादयः सर्वेषामाश्रमाणां समाः । न केवलं योगिनामेवेति । धर्मज्ञानं समय इत्यर्थः । एते हि भाव्यमानाः क्रोधादीन्समूलघातं घ्नन्ति । अतश्च तान्यनुतिष्ठन्विधिना सार्वगामी भवति । तान्यक्रोधादीन्यनुतिष्ठन्सार्वगामी सर्वस्मै हितः सार्वः । आत्मानन्दं गच्छति । विधिनेति वचना-

त्प्राणिनां तु वधो यत्र तत्र साक्ष्यनृतं वदेदित्यादिके विषयेऽनृतवचनेऽपि न दोष इति ॥ १४ ॥ (ख० २०) ॥

नेमं लौकिकमर्थं पुरस्कृत्य धर्मांश्चरेत् ॥ १५ ॥

इमं लौकिकं लोके विश्रुतं ख्यातिलाभपूजादिकमर्थं प्रयोजनं पुरस्कृत्याभिसंधाय धर्मान्न चरेत् ॥ १५ ॥

किं कारणम्—

निष्फला ह्यभ्युदये भवन्ति ॥ १६ ॥

तस्मादेवं क्रियमाणा धर्मा अभ्युदये फलकाले निष्फला भवन्ति । लोकोक्त्यर्थमसौ धर्मं चरति न कर्तव्यमिति । नः कर्तव्यमिति श्रद्धया धर्मफलं साधयति । यो वै श्रद्धामनारभ्येति श्रुतेः ॥ १६ ॥

किमिदानीं दृष्टं फलं त्याज्यमेव नेत्याह—

तद्यथाऽऽम्रे फलार्थे निर्मिते छाया गन्ध इत्यनू
त्पद्येते एवं धर्मं चर्यमाणमर्था अनूत्पद्यन्ते॥१७॥

अनुनिष्पद्यन्ते । तदेव स्वीकार्योपल्लताः सहितं प्रमेचितं तृणानि वह्निरपि प्रसिध्यति । तथा नरो धर्मचयेन वर्तते यशश्च कामांश्च वसूनि चाश्नुते । इति ॥ १७ ॥

न चेदनूत्पद्यन्ते न धर्महानिर्भवाति ॥ १८ ॥

यद्यपि दैवादर्था नानूत्पद्यन्ते तथाऽपि धर्मस्तावद्भवाति । स च स्वतन्त्रः पुरुषार्थः । किमन्यैरर्थैरिति ॥ १८ ॥

अनसूयुर्दुष्प्रलम्भः स्यात्कुहकशठनास्तिकबाल-
वादेषु ॥ १९ ॥

कुहकः प्रकाशे शुचिरेकान्ते यथेष्टाचारी । शठो वक्रचित्तः । नास्तिकः प्रेत्याव(प्रत्यक्ष)वादी । बालः श्रुतिरहितः । तेषां वादेष्वनसूयः स्यात् । असूयया द्वेषो लक्ष्यते । द्वेष्टा न स्यात् । तान्विषयीकृत्य द्वेषमपि न कुर्यात् । तथा दुष्प्रलम्भ इति च । प्रलम्भनं विसंवादनं मिथ्याफलाख्यानम् । गृधिवञ्च्योः प्रलम्भने इति दर्शनात् । दुष्प्रलम्भो विसंवादयितुं मिथ्याफलाख्यानेन वर्तयितुं स शक्यः । कुहकादिवादेषु वञ्चितो न स्यात् । तद्वशो न स्यादित्यर्थः ॥ १९ ॥

वचनस्यासंभवमाह—

न धर्माधर्मौ चरत आवा(व)१ स्वेव इति न देवा न गन्धर्वा न पितर इत्याचक्षतेऽयं धर्मोऽयमधर्म इति ॥ २० ॥

आवा(व)मिति छान्दसं रूपम् । भाषायां तु प्रथमायाश्च द्विवचने भाषायामिति प्राप्नोति । यदि हि धर्माधर्मौ विग्रहवन्तौ गोव्याघ्रवधगतावावां स्व इति ब्रुवाणौ यदि वा देवादयः प्रकृष्टज्ञाना ब्रूयुरिमौ धर्माधर्माविति ततः कुहकादिवादो न स्यात् । वचनात् । तदभावात्तु वचनं स्यादिति । इदं तावद्द्रष्टव्यम् । प्रत्यक्षादेरगोचरौ धर्माधर्मौ किंतु नित्यनिर्दोषवेदगम्यौ । तदभावे तन्मूलशास्त्रगम्याविति ॥ २० ॥

यत्र तु प्रायश्चित्तादौ विषयव्यवस्था दुष्करा तत्र निर्णयमाह—

यत्त्वार्याः क्रियमाणं प्रशंसन्ति स धर्मो यद्गर्हन्ते सोऽधर्मः ॥ २१ ॥

आर्याः शिष्टास्त्रैवर्णिकाः । बहुवचनाच्चत्वारस्त्रयोऽपि वा ।
चत्वारो वेदधर्मज्ञाः पर्षत्त्रैविद्यमेव वा ॥
सा ब्रूते यं स धर्मः स्यादेको वाऽध्यात्मवित्तमः इति ॥ २१ ॥

इदानीं श्रुतिस्मृत्योः प्रत्यक्षयोरदर्शने शिष्टाचारादप्यवगम्य धर्मः कार्य इत्याह—

सर्वजनपदेष्वेकान्तसमाहितमाचार्याणां वृत्तं१ सम्यग्विनीतानां वृद्धानामात्मवतामलोलुपानामदाम्भिकानां वृत्तसादृश्यं भजेत ॥ २२ ॥

सम्यग्विनीता आचार्याधीनः स्यादित्यादिना विनयेन संपन्नाः । वृद्धाः परिणतवयसः । यौवने विषयवश्यता स्यादिति तदुक्तम् । आत्मवन्तो जितेन्द्रियाः । अलोलुपा अकृपणाः । अदाम्भिका धर्मध्वजाः । एवंभूतानामाचार्याणां सर्वजनपदेषु यदेकान्तेनापि विचारेण समाहितमनुमतं वृत्तमनुष्ठानं न मातुलसुतापरिणयनवत्कतिपयविषयं तद्वृत्तसादृश्यं भजेत तदनुरूपं चेष्टेत । न तेषामनुष्ठानं निर्मूलं संभवति । संभवति च वैदिकानां तूत्सन्न(नूतन)पाठो ब्राह्मणानुभव इति ॥ २२ ॥

एवं वर्तमान उभौ लोकावभिजयति ॥ २३ ॥

इमं चामुं च ॥ २३ ॥

अविहिता ब्राह्मणस्य वणिज्या ॥ २४ ॥

क्रयविक्रयव्यवहारो वणिज्या । सा स्वयंकृता ब्राह्मणस्य वृत्तिर्न विहिता । प्राप्तानुवादोऽयमापदि विधानार्थः ॥ २४ ॥

आपदि व्यवहरेत पण्यानामपण्यानि व्युदस्यन् ॥२५॥

ब्राह्मणवृत्तेरलाभ आपत् । तस्यां वृत्त्यौ पण्यानां व्यवहृपणोः समर्थयोरिति कर्तरि षष्ठी । व्यवहरेत । क्रयश्च विक्रयश्च व्यवहारः । पण्यानि क्रिणीयाद्विक्रीणीत वेत्यर्थः । अपण्यानि वक्ष्यमाणानि व्युदस्यन्वर्जयन् । कृत्स्नाया वैश्यवृत्तेरुपलक्षणमिदम् । क्षत्रियवृत्तिश्च दण्डापूपिकया सिद्धा । तथा च गौतमः—तदलाभे क्षत्रियवृत्तिस्तदलाभे वैश्यवृत्तिरिति ॥ २५ ॥

अपण्यानाह—

मनुष्यान् रसान् रागान् चर्म गवां वशाꣳ श्लेष्मोदके तोक्मकिण्वे पिप्पलीमरीचे धान्यमाꣳसमायुधꣳ सुकृताशां च ॥ २६ ॥

मनुष्या दासादयः । रसा गुडलवणादयः क्षीरादयो वा । रागाः कुसुम्भादयः । रज्यन्तेऽनेनेति रागा वस्त्रा(स्त्रा)दयः । चर्म । गवां मध्ये वशा वन्ध्या गौः । श्लेष्मजलादि । येन विश्लिष्टं चर्मादि संधीयते, यथा श्लेष्मणा चर्मण्यं वाऽन्यद्वा विश्लिष्टं संश्लेषयेदिति बह्वृचब्राह्मणे दर्शनात् । तोक्मानीषदङ्कुरितानि व्रीह्यादीनि । किण्वं सुराप्रकृतिद्रव्यम् । सुकृतं पुण्यं तस्य फलं वा सुकृताशा । शिष्टानि प्रसिद्धानि । एतान्यपण्यानि वर्जयित्वाऽन्येषां पण्यानां व्यवहरेत । मनुष्यादीन्वर्जयित्वेत्येव सिद्धेऽपण्यानीति वचनमन्येषामपण्यानां व्युदासार्थम् । तत्र मनुः—

सर्वान्रसानपोहेत कृतान्नं च तिलैः सह ।
अश्मनो लवणं चैव पशवो ये च मानुषाः ॥
सर्वं च तान्तवं रक्तं शाणक्षौमाविकानि च ।
अपि च स्युररक्तानि फलमूले तथौषधीः ॥
अयःशस्त्रं विषं मांसं सोमं गन्धांस्तु सर्वशः ।
क्षीरं क्षारं दधि घृतं तैलं मधु गुडं कुशान् ॥
आरण्यांश्च पशून्सर्वान्नण्वु (न्दंष्ट्र) णश्च वयांसि च ।
मद्यं नीलं च लाक्षां च सर्वांश्चैकशफान्पशून् ॥ इति ॥ २६ ॥

तिलतण्डुलाꣳस्त्वेव विशेषेण धान्यस्य न विक्रीणीयात् ॥ २७ ॥

धान्यानां मध्ये तिलतण्डुलानेव विशेषतोऽतिशयेन न विक्रीणीयात् । अन्येषां विकल्पः । स्वयमुत्पादितेषु नायं प्रतिषेधः । मानवे तु श्रुतम्—

कामुमुत्पाद्य कृष्यात्तु स्वयमेव कृषीवलः ।
विक्रीणीत तिलाञ्छुद्धान्धर्मार्थमचिरस्थितान् ॥ इति ॥ २७ ॥

अविहितश्चैतेषां मिथो विनिमयः ॥ २८ ॥

परिवर्तनं विनिमयो येषां विक्रयः प्रतिषिद्धस्तेषामेतेषां मिथः परस्परेण विनिमयोऽपि प्रतिषिद्धो न कर्तव्य इत्यर्थः ॥ २८ ॥

तेष्वेव केषु केषु विनिमयोऽनुज्ञायते—

अन्नेन चान्नस्य रसानां च रसैर्मनुष्याणां च
मनुष्यैर्विद्यया च विद्यानाम् ॥ २९ ॥

अन्नादीनां विद्यान्तानां विनिमयो भवत्येवेत्यर्थः । तथा च वसिष्ठः—रसा रसैः समतो हीनतो वा तिलतण्डुलपक्वान्नविद्यामनुष्याश्च विहिताः परिवर्तकेनेति । मानवे तु विशेषः—

रसा रसैर्निमातव्या न त्वेव लवणं रसैः ।
कृतान्नं च कृतान्नेन तिला धान्येन तत्समाः ॥

गौतमीये तु रसानां च रसैः पशूनां च लवणकृतान्नयोः समेतानामेव न तु पक्वस्यासंप्रत्ययार्थ इति । तस्मादत्र प्रतिषेधानुवृत्तिर्नाऽऽशङ्कनीया । पूर्वत्र चोक्तं ब्रह्माणि मिथो विनियोगेन गतिर्विद्यत इति । विनिमयाभ्यनुज्ञानादेव विद्यानां विक्रयो विप्रतिषिद्धो वेदितव्यः ॥ २९ ॥

अक्रीतपण्यैर्व्यवहरेत (ख० २१) मुञ्जबल्वजै-
र्मूलफलैः ॥ ३० ॥

अक्रीतानि स्वयमुत्पादितानि अरण्यादाहृतानि वा यानि पण्यानि तैर्व्यवहरेत मुञ्जादिभिः । मुञ्जबल्वजास्तृणविशेषाः ॥ ३० ॥

तृणकाष्ठैरविकृतैः ॥ ३१ ॥

तृणानां विकारो रज्ज्वादिभावः । काष्ठानां विकारः स्थूणादिभावः । तृणत्वादेव सिद्धे मुञ्जबल्वजग्रहणं विकारार्थम् ॥ ३१ ॥

नात्यन्तमन्ववस्येत् ॥ ३२ ॥

प्रतिषिद्धानामपि विक्रयविनिमयाभ्यां जीवन्न पुनरत्यन्तमवसीदेत्। तथा च गौतमः—सूर्षा च वृत्तिरशक्तौ च शूद्रेण जीवेत्तदप्येके प्राणसंशय इति। मनुरपि—

जीवितात्ययमापन्नो योऽन्नमत्ति ततस्ततः।
आकाशमिव पङ्केन न स दोषेण लिप्यते॥ इति॥ ३२॥

वृत्तिं प्राप्य विरमेत्॥ ३३॥

गतम्॥ ३३॥

अथाप्युदाहरन्ति। पशवश्च मुखादाना अश्मा चालवणो धृतः। एतद्ब्राह्मण ते पण्यं तन्तुश्चारजनीकृत इति॥ ३४॥

अपि च वदन्ति मुखेनाऽऽदानं येषां ते मुखादानाः पशवः। लवणव्यतिरिक्तोऽश्मा चारञ्जितस्तन्तुश्च। एतेन पूर्वोक्तं ब्राह्मण ते पण्यं विक्रेयमिति॥ ३४॥

न पतितैः संव्यवहारो विद्यते॥ ३५॥

पतिताः। स्तेनादयो वक्ष्यमाणाः। तैः सह न कश्चिदपि व्यवहारः कर्तव्यः। तत्र मनुः—संवत्सरेण पतति पतितेन सहाऽऽचरन्। याजनाध्यापनाद्यौनात्तु यानाशनादिति। यानादिभिः संवत्सरेण पतति याजनादिभिस्तु सद्य एव॥ ३५॥

तथाऽपपात्रैः॥ ३६॥

अपपात्राश्चण्डालादयः। तैश्च संव्यवहारो न कर्तव्यः॥ ३६॥

अथ पतनीयानि॥ ३७॥

द्विजाति कर्मभ्यो हानिः पतनं तस्य निमित्तानि कर्माणि वक्ष्यन्ते॥ ३७॥

स्तेयमाभिशस्त्यं पुरुषवधो ब्रह्मोज्झं गर्भशातनं मातुः पितुरिति योनिसंबन्धे सहापत्ये स्त्रीगमनं सुरापानमसंयोगसंयोगः॥ ३८॥

स्तेयं सुवर्णचौर्यम्। आभिशस्त्यं ब्रह्महत्या। ब्राह्मणमात्रं च हत्वाऽभिशस्त इति वक्ष्यमाणत्वात्। पुरुषवधो मनुष्यजातिवधः। तेन स्त्रीवधोऽपि गृह्यते। ब्रह्मोज्झं संसर्गः। भावे घञ्। छान्दसो लिङ्गव्यत्ययः। ब्राह्मणेन वेदस्याधीतस्य नाशनम्। औषधादिप्रयोगेण गर्भशातनं गर्भवधः। मातुर्योनिसंबन्धे मातृष्वस्रादौ मातुलादौ, पितुर्योनिसंबन्धे पितृष्वस्रादौ सहापत्येऽपत्यसहिते स्त्रीगमनं मातृष्वसृगमनं तत्सुताग-

मनं पितृष्वसृगमनं तत्सुतागमनं मातुलसुतागमनं चेत्यर्थः । गौडी माध्वी च पैष्टी च विज्ञेया त्रिविधा सुरा । तस्याः पानं सुरापानम् । असंयोगाः संयोगानर्हाः पतितादयः । तैः संयोग एकगृहवासादि असंयोगसंयोगः । एतानि पतनीयानि ॥ ३८ ॥

गुर्वीं सखीं(खिं) गुरुसखीं(खिं) च गत्वाऽन्यांश्च परतल्पान् ॥ ३९ ॥

छान्दसो ह्रस्वः । मात्रादीनां सखीं, गुरुसखीं पित्रादीनां सखीम् । किम् । पततीत्युत्तरत्र श्रुतमपेक्षते । अन्यांश्च परतल्पान्गत्वा पतति । तल्पशब्देन शयनवाचिना दारा लक्ष्यन्ते ॥ ३९ ॥

नागुरुतल्पे पततीत्येके ॥ ४० ॥

गुरुदारव्यतिरेकेण परतल्पगमने पातित्यं नास्तीत्येके मन्यन्ते । यद्यपि सामान्येन शब्देन शयनवाचिना दारा लक्ष्यन्ते तथाऽपि प्रायश्चित्ते गुरुलघुभावो द्रष्टव्यः ॥ ४० ॥

अधर्माणां तु सततमाचारः ॥ ४१ ॥

तुश्चार्थे । उक्तव्यतिरिक्तानामप्यधर्माणां सततमाचारः पतनहेतुः ॥ ४१ ॥

अथाशुचिकराणि ॥ ४२ ॥

अशुचिं पुरुषं कुर्वन्तीत्यशुचिकराणि कर्माणि वक्ष्यन्ते ॥ ४२ ॥

शूद्रगमनमार्यस्त्रीणाम् ॥ ४३ ॥

त्रैवर्णिकस्त्रीणां शूद्रगमनमशुचिकरम् ॥ ४३ ॥

प्रतिषिद्धानां मांसभक्षणम् ॥ ४४ ॥

येषां मांसं प्रतिषिद्धं तेषां मांसानां भक्षणमशुचिकरम् ॥ ४४ ॥

तत्रोदाहरणम्—

शुनो मनुष्यस्य कुक्कुटसूकराणां क्रव्यादसाम् ॥ ४५ ॥

प्रतिषेधः । अदसोऽदो भावेऽसुन् । क्रव्यमामिषमदनं येषां ते क्रव्यादसः । केवलमांसवृत्तयो गृध्रादयः ॥ ४५ ॥

मनुष्याणां मूत्रपुरीषप्राशनम् ॥ ४६ ॥

मूत्रपुरीषग्रहणं तादृशस्य रेतसोऽप्युपलक्षणम् ॥ ४६ ॥

शूद्रोच्छिष्टमपपात्रागमनं चाऽऽर्याणाम् ॥ ४७ ॥

शूद्रोच्छिष्टं भुक्तमार्याणामशुचिकरम् । अपपात्रा अतिनीचस्त्रियस्तासां च गमनम् ॥ ४७ ॥

अपि पतनीयान्येतानि भवन्तीत्येके ॥ ४८ ॥

यान्येतान्यशुचिकराण्यनुक्रान्तानि तान्यपि पतनीयानि भवन्तीत्येके ॥ ४८ ॥

अतोऽन्यानि दोषफलान्यशुचिकराणि ॥ ४९ ॥

उक्तव्यतिरिक्तानि दोषफलानि कर्माणि दुष्प्रतिग्रहहिंसादीन्यशुचिकराणि भवन्ति ॥ ४९ ॥

दोषं बुद्ध्वा न पूर्वः परेभ्यः पतितस्य समाख्याने स्याद्वर्जयेत्त्वेनं धर्मेषु ॥ ५० ॥(ख०२२) ।

पतितस्य दोषं परैरविदितं बुद्ध्वा परेभ्यः समाख्याते पूर्वो न स्यात् । परेभ्यः पूर्वं नाऽऽचक्षीत । किंतु स्वयं धर्मकृत्येषु वर्जयेत् । यथा परा न जानन्ति । अन्यथा दोषवान् ॥ ५० ॥ (ख० २२) ।

क्षत्रियꣳ हत्वा गवाꣳ सहस्रं वैरयातनार्थं दद्यात् ॥ ५१ ॥

क्षत्रियं हत्वा गवां सहस्रं ब्राह्मणेभ्यो दद्यात् । किमर्थम् । वैरयातनार्थम् । वैरं पापं तस्य यातनं निर्हरणं तदर्थम् ॥ ५१ ॥

शतं वैश्ये दश शूद्रे ॥ ५२ ॥

वैश्ये हते शूद्रे हत इति । प्रकरणाद्वा इति च । ऋषभश्चात्राधिकः सर्वत्र प्रायाश्चित्तार्थमिति वक्ष्यति । तेन प्रायश्चित्तरूपमिदं दानम् । प्रायश्चित्तं पापक्षयार्थम् । तत्किमर्थं वैरयातनार्थमित्युच्यते । केचिदाहुः—नाभुक्तं क्षीयते कर्म पुण्यमपुण्यं च । प्रायश्चित्तं नैमित्तिकं कर्मान्तरम् । यथा गृहदाहादौ क्षामवत्याद्य इति । तन्निराकर्तुमुक्तम् । अपर आह यो येन हन्यते स हतो म्रियमाणस्तस्मिन्वैरं करोति । अपि नामैनं जन्मान्तरेऽपि वध्यासमिति । तस्य वैरस्य यातनार्थमिदमिति । प्रायश्चित्तार्थमपि वक्ष्यमाणेन सिद्धमिति ॥ ५२ ॥

ऋषभश्चात्राधिकः सर्वत्र प्रायश्चित्तार्थम् ॥ ५३ ॥

सर्वेष्वेतेषु निमित्तेषु ऋषभोऽधिको देयः । न केवलं गा एव । इदं प्रायश्चित्तत्रयं मानवेन समानविषयम् । यथाऽऽह—

अकामतस्तु राजन्यं विनिपात्य द्विजोत्तमः ।
ऋषभैकसहस्रा गा दद्याच्छुद्ध्यर्थमात्मनः ॥
त्र्यब्दं चरेद्वा नियतो जटी ब्रह्महणो व्रतम् ।
वसन्दूरतरे ग्रामाद्वृक्षमूलनिकेतनः ॥
एतदेव चरेदब्दं प्रायश्चित्तं द्विजोत्तमः ।
प्रमाय वैश्यवृत्तस्थं दद्याच्चैकशतं गवाम् ॥

एतदेव व्रतं कृत्स्नं षण्मासं शूद्रहा चरेत् ।
ऋषभैकादशा वाऽपि दद्याद्विप्राय गाः शतम् ॥ इति ॥ ५३ ॥

स्त्रीषु चैतेषामेवम् ॥ ५४ ॥

एतेषां तु क्षत्रियादीनां स्त्रीषु च हतास्वेवमेव प्रायश्चित्तं यथा पुरुषेषु ॥ ५४ ॥

पूर्वयोर्वर्णयोर्वेदाध्याय१ हत्वा सवनगतं चाभिशस्तः ॥ ५५ ॥

प्रकृतेषु यौ पूर्वौ वर्णौ क्षत्रियवैश्यौ तयोर्वेदाध्यायोऽधीतवेदस्तं हत्वाऽभिशस्तो भवति । अभिशस्त इति ब्रह्मघ्नोऽभिधानम् । सवनगतं तयोरेव वर्णयोः सवनगतः । सवनशब्देन न प्रातःसवनादीन्युच्यन्ते । नापि यागमात्रम् । किं तर्हि । सोमयागः । तत्र यो दीक्षितः स सवनगतः । ब्राह्मणो वा एष जायते यो दीक्षित इति दर्शनात् । तं च हत्वाऽभिशस्तो भवति । पूर्वयोर्वर्णयोरिति किम् । ब्राह्मणे मा भूत् । इष्यते ब्राह्मणे वक्ष्यते च ब्राह्मणमात्रं चेति । एवं तर्हि शूद्रे मा भूत् । न शूद्रो वेदाध्यायः सवनगतो भवति । इदं तर्हि प्रयोजनम् । पूर्वयोर्वर्णयोरेव यथा स्यात् । तयोरेवानुलोमौ सवर्णाभ्रष्टौ तयोर्मा भूदिति । तेनान्ये वर्णधर्मा अनुलोमानामपि भवन्ति ॥ ५५ ॥

ब्राह्मणमात्रं च ॥ ५६ ॥

हत्वाऽभिशस्तो भवति । मात्रग्रहणान्नाभिजनविद्यासंस्कारापेक्षा ॥ ५६ ॥

गर्भं च तस्याविज्ञातम् ॥ ५७ ॥

तस्य ब्राह्मणमात्रस्य गर्भं स्त्रीपुंनपुंसकभेदेनाविज्ञातं हत्वाऽभिशस्तो भवति ॥ ५७ ॥

आत्रेयीं च स्त्रियम् ॥ ५८ ॥

ऋतुस्नाताऽऽत्रेयीति वसिष्ठः । तस्येति वर्तते । आत्रेयीं ब्राह्मणस्त्रियं हत्वा ब्रह्महा भवति । संभवत्यस्यां ब्राह्मणगर्भ इति । अत्रिगोत्रजा वाऽऽत्रेयीत्यन्ये ॥ ५८ ॥

तस्य निर्वेषः ॥ ५९ ॥

तस्य सर्वप्रकाराभिशस्तस्य निर्वेषः प्रायश्चित्तमुच्यते ॥ ५९ ॥

अरण्ये कुटिं कृत्वा वाग्यतः शवशिरोध्वजोऽर्धशाणीपक्षमधोनाभ्युपरिजान्वाच्छाद्य ॥ ६० ॥

कृत्वेति वचनान्न परकृता कुटी ग्राह्या । वाग्यता नियता येन स वाग्यतो वाचंयमः । आहिताग्न्यादिषु दर्शनाद्यतशब्दस्य परनिपातः । शवशिरो ध्वजो यस्य स शवशिरोध्वजः । सलोपः क्वचिच्छान्दसः । स्वव्यापादितस्य ब्राह्मणस्य शिरो ध्वजदण्डाग्रे प्रोतं कृत्वेत्यर्थः । यस्य कस्यचिच्छिर इत्यन्ये । शणस्य विकारः शाणी पटी ।

१ घ °शिरध्व° ।

तस्या अर्धमर्धशाणी । तस्य(स्याः) पक्षमर्धशाणीपक्षम् । आयामविस्तारयोरुभयोरप्यर्ध-मधोनाभ्युपरिजानु च यथा भवति तथाऽऽच्छाद्य तावन्तं प्रदेशमाच्छाद्य । सापेक्षत्वाद्ग्रामे तिष्ठेतेति वक्ष्यमाणेन संबन्धः ॥ ६० ॥

मध्ये कियान् विधिः—

तस्य पन्था अन्तरा वर्त्मनी ॥ ६१ ॥

तस्य ग्रामं प्रविशतो वर्त्मनी अन्तरा शकटादेर्वर्त्मनोर्मध्ये पन्था वेदितव्यः । अपर आह—यत्र रथ्यादावुभयोः पथोर्वर्त्मनी भवतस्तत्र तयोर्मध्ये न सूकरादिपथेन संचरेदिति ॥ ६१ ॥

दृष्ट्वा चान्यमुत्क्रामेत् ॥ ६२ ॥

अन्यमायान्तं दृष्ट्वा पथ उत्क्रामेत् । तत्र कौण्डिन्यः—पञ्चारत्नीति रथपथात् । चत्वारो हस्तिपथात् । द्वौ क्षुद्रपशुमनुष्या[णा]मिति । तेन मनुष्येषु द्वौ हस्तावुत्क्रामेदिति ॥६२॥

खण्डेन लोहितकेन शरावेण ग्रामे प्रतितिष्ठेत ॥ ६३ ॥

अर्धमात्रं खण्डम् । लोहितं मनाक् प्रीतम् । एवंभूतं शरावं भिक्षापात्रं गृहीत्वा ग्रामे प्रतितिष्ठेत ग्रामं गच्छेत् ॥ ६३ ॥

कोऽभिशस्ताय भिक्षामिति सप्तागाराणि चरेत् सा वृत्तिः ॥ ६४ ॥

अभिशस्तो ब्रह्महा । तस्मै मह्यं को धार्मिको भिक्षां ददातीत्युच्चैर्ब्रुवाणः सप्ता-गाराणि चरेत् । सप्तग्रहणमधिकनिवृत्त्यर्थम् । द्वित्रादिष्वेवागारेषु यदि पर्याप्तं लभ्यते तदा तावत्येव सा वृत्तिः । सप्तस्वगारेषु यात्रायां यावल्लभ्यते सैव वृत्तिरपर्याप्ताऽपि ॥ ६४ ॥

अलब्धोपवासः ॥ ६५ ॥

यदि सप्तस्वगारेषु न किंचिल्लभ्यते तदोपवास एव तस्मिन्नहनि ॥ ६५ ॥

गाश्च रक्षेत् ॥ ६६ ॥

एवं प्रायश्चित्तं कुर्वन्नहरहर्गाश्च रक्षेत् ॥ ६६ ॥

तासां निष्क्रमणप्रवेशने द्वितीयो ग्रामेऽर्थः ॥ ६७ ॥

तासां गवां निष्क्रमणसमये प्रवेशनसमये द्वितीयो ग्रामेऽर्थः प्रयोजनम् । भिक्षार्थं प्रथममुक्तम् । नान्यदा ग्रामं प्रविशेदित्युक्तं भवति ॥ ६७ ॥

द्वादश वर्षाणि चरित्वा सिद्धः सद्भिः संप्रयोगः ॥ ६८ ॥

एवं द्वादश वर्षाणि व्रतमेतच्चरित्वा सद्भिः संप्रयोगः कर्तव्यः । सद्भिः सह संप्रयुज्यते येन विधिना स कर्तव्यः । स च शिष्टाचारे शास्त्रान्तरे च सिद्धः । स उच्यते—कृतप्रायश्चित्तः स्वहस्ते यवसं गृहीत्वा गामाह्वयेत् । अन्यथा नेति ॥ ६८ ॥

आजिपथे वा कुटिं कृत्वा ब्राह्मणगवीरुपजिहीर्षमाणो वसेत्त्रिः प्रतिराद्धोऽपजित्य वा मुक्तः ॥ ६९ ॥

संग्रामेण जेतव्या दस्यवो येन पथा ग्रामं प्रविश्य गवादिकमपहृत्यापसरन्ति स आजिपथः । तस्मिन्वा कुटिं कृत्वा वसेत् । ब्राह्मणगव्य इति पाठे वा छन्दसीति पूर्वसवर्णाभावे यणादेशः । ब्राह्मणगवीरुपजिहीर्षमाणो दस्यूनवजित्य प्रत्याहर्तुमिच्छन् । एवं दस्युभिर्ह्रियमाणगवादिकमुद्दिश्य तैर्युद्धं कुर्वंस्त्रिः प्रतिराद्धस्तैरवजितो विजित्य वा तान्गवादीन्प्रत्याहृत्य ब्राह्मणेभ्यो दत्त्वा मुक्तो भवति तस्मादेनसः । द्वादशवार्षिकप्रत्यावृत्तस्येदम् । एवमुत्तरमपि ॥ ६९ ॥

आश्वमेधिकं वाऽऽवभृथमवेत्य मुच्यते ॥ ७० ॥

अथवाऽऽश्वमेधावभृथे स्नात्वा मुच्यते ॥ ७० ॥

धर्मार्थसंनिपातेऽर्थग्राहिण एतदेव ॥ ७१ ॥

धर्मस्याग्निहोत्रादेरर्थस्य च युगपत्संनिपातो यत्र तत्रोभयानुसंग्रहासंभवे धर्मलोपेन योऽर्थं गृह्णाति तस्याप्येतदेव प्रायश्चित्तम् । अथवा यो धर्मं हित्वाऽर्थहेतोः कौटसाक्ष्यादि करोति तद्विषयमेतत् । अत्र गौतमः—कौटसाक्ष्यं राजगामि पैशुनं पातकसमानीति । मनुरपि—

अनृतं च समुत्कर्षे राजगामि च पैशुनम् ।
गुरोश्चालीकनिर्बन्धः समानि ब्रह्महत्यया ॥ इति ॥ ७१ ॥

गुरुं हत्वा श्रोत्रियं वा कर्मसमाप्तमेतेनैव विधिनोत्तमादुच्छ्वासाच्चरेत् ॥ ७२ ॥

गुरुः पित्राचार्यादिः । श्रोत्रियोऽधीतवेदः । स यदि कर्मसमाप्तौ भवति सोमान्तानि कर्माणि समाप्तानि यस्य स एवमुच्यते । तौ हत्वैतेन विधिनोत्तमादुच्छ्वासात् । उत्तम उच्छ्वासः प्राणवियोगः । तस्माच्चरेत् ॥ ७२ ॥

नास्यास्मिँल्लोके प्रत्यापत्तिर्विद्यते ॥ ७३ ॥

अश्वमेधावभृथादिषु संभवत्स्वप्यस्यास्मिँल्लोकेऽस्मिञ्जीविते प्रत्यापत्तिः शुद्धिर्नास्तीत्यर्थः ॥ ७३ ॥

कल्मषं तु निर्हण्यते ॥ ७४ ॥

मृतस्य कल्मषं निर्हण्यते । तेन पुत्रादिभिः संस्कारादि कर्तव्यमिति भावः । अन्ये पूर्वसूत्रं तन्निवृत्त्यर्थं मन्यन्ते । पुत्रादिभिः पित्रादिभावेन(ना)संबन्ध इति ॥७४॥

गुरुतल्पगामी सवृषणꣳ शिश्नं परिवास्याञ्जलावाधाय दक्षिणां दिशमनावृत्तिं व्रजेत् ॥ ७५ ॥

गुरुरत्र पिता नाऽऽचार्यादिः । तल्पशब्देन शयनबोधिना भार्या लक्ष्यते । साक्षाज्जननी न तत्पत्नी । तां गत्वा सवृषणं साण्डं शिश्नं परिवास्य क्षुरादिना छित्त्वाऽञ्जलावाधाय दक्षिणां दिशं व्रजेत् । अनावृत्तिम् । आवृत्तिर्न क्रियते यस्यां तां दिशमनावर्तमानो गच्छेदिति । अथ ये दक्षिणस्योदधेस्तीरे वसन्ति ते कथम् । तेऽपि यावद्देशं गत्वोदधिमेव प्रवेक्ष्यन्ति । मरणं ह्यत्र विवक्षितम् । अत्र संवर्तः—

पितृदारं समारुह्य मातृवर्जं नराधमः ।
भगिनीं मातुराप्तां वा स्वसारं चान्यमातृजाम् ॥
एता गत्वा स्त्रियो मोहात्तप्तकृच्छ्रं समाचरेत् ॥ इति ।

नारदस्तु—माता पितृष्वसा स्वसृर्मातुलानी पितृष्वसा ।
पितृव्यसखिशिष्यस्त्री भगिनी तत्सखी स्नुषा ॥
दुहिताऽऽचार्यभार्या च सगोत्रा शरणागता ।
राज्ञी प्रव्रजिता धात्री साध्वी वर्णोत्तमा च या ॥
आसामन्यतमां गच्छन्गुरुतल्पग उच्यते ।
शिश्नस्योत्कर्तनं तत्र नान्यो दण्डो विधीयते ॥ इति ॥ ७५ ॥

ज्वलितां वा सूर्मिं परिष्वज्याऽऽत्मानं समाप्नुयात् ॥ ७६ ॥

आयसी ताम्रमयी वा स्त्रीप्रतिकृतिरत्र सूर्मिः । तां ज्वलितामग्नौ तप्तां परिष्वज्याऽऽत्मानं समाप्नुयान्म्रियेत ॥ ७६ ॥

कृच्छ्रं संवत्सरं वा चरेत् ॥ ७७ ॥

अथवा संवत्सरमेकं नैरन्तर्येण कृच्छ्रं चरेत् ॥ ७७ ॥

सुरापोऽग्निस्पर्शाꣳ सुरां पिबेत् ॥ ७८ ॥

सुरापोऽग्निस्पर्शामिति ज्वलितां सुरां पिबेत् । तथा दग्धकायः शुध्यति ॥ ७८ ॥

स्तेनः प्रकीर्णकेशोऽꣳसे मुसलमाधाय ॥ ७९ ॥ (ख० २३) ॥

इति सत्याषाढहिरण्यकेशिश्रौतसूत्रे(धर्मसूत्रापरपर्याये)षड्विंशप्रश्ने षष्ठः पटलः ।

स्तेनो ब्राह्मणस्वामिकसुवर्णपरिमितसुवर्णहारी । स स्वीये स्कन्धे मुसलमाधायाऽऽयसं खादिरं वा। आचक्षीतेत्यनेन संबन्धः ॥ ७९ ॥ (ख० २३) ॥

इति श्रीमन्महादेवदीक्षितविरचितायां हिरण्यकेशिधर्मप्रश्नव्याख्याया- मुज्ज्वलायां वृत्तौ षष्ठः पटलः ॥ ६ ॥

अथ सप्तमः पटलः ।

राजानं गत्वा कर्माऽऽचक्षीत तेनैनꣳ हन्याद्वधे मोक्षः ॥ १ ॥

राजानं प्रति गत्वा कर्माऽऽचक्षीतैवंकर्माऽस्मि शाधि मामिति । स तेन मुसलेनैनं हस्तेन हन्यात् । यथा मृतो भवति । वधे मोक्षः ॥ १ ॥

अनुज्ञातेऽनुज्ञातारमेनः स्पृशति ॥ २ ॥

यदि राजा दयादिना तमनुजानीयादाज्ञापयति तदा तमनुज्ञातारं राजानमेव तदेनः स्पृशति ॥ २ ॥

उत्तरमृत्वाग्निं वा प्रविशेत् तीक्ष्णं वा तप आयच्छेत् ॥ ३ ॥

तीक्ष्णं वा तपो महाकारा(कृच्छ्रा)दि तद्वाऽऽयच्छेदावर्तयेत् ॥ ३ ॥

भक्तापचयेन वाऽऽत्मानꣳ समाप्नुयात् ॥ ४ ॥

भक्तमन्नं तस्यापचयो ह्रासः । प्रथमे दिवसे यावन्तो ग्रासास्त एकेन न्यूना द्वितीये । एवं तृतीयादिषु । अथैकस्माद्ग्रासात्, तत्रापि यदि न समाप्तिस्ततस्तत्रैव परिमाणा- पचयः कर्तव्यः । एवं भक्तापचयेनाऽऽत्मानं समाप्नुयात्समापयेत् ॥ ४ ॥

कृच्छ्रꣳ संवत्सरं वा चरेत् ॥ ५ ॥

गतम् । एषामेनःसु गुरुषु गुरूणि लघुषु लघूनीति व्यवस्थया द्रष्टव्यम् ॥ ५ ॥

अथाप्युदाहरन्ति ॥ ६ ॥

अस्मिन्नेव विषये पुराणश्लोकमप्युदाहरन्तीत्यर्थः ॥ ६ ॥

स्तेयं कृत्वा सुरां पीत्वा गुरुदारं च गत्वा
ब्रह्महत्यामकृत्वा चतुर्थकाला मितभोजिनः
स्युरपोऽभ्यवेयुः सवनान्यनुकल्पयेत्स्थानास-
नाभ्यां विहरन्त एते त्रिभिर्वर्षैरप पापं नुदन्ते॥७॥

ब्रह्महत्याव्यतिरिक्तानि स्तेयादीनि कृत्वा चतुर्थकालाः। चतुर्थो भोजनकालो येषां ते, यथाऽद्य दिवा भुञ्जते श्वो रात्राविति तथोक्ताः। तदाऽपि मितभोजिनोऽमिष्टाशिनोऽपोऽभ्यवेयुर्भूमिगतास्वप्सु स्नानं कुर्युः। सवनान्यनुकल्पयेत्। यथा सवनानि प्रातःसवनादीन्यनुकल्प्तानीन्यनुस्मृतानि भवन्ति। त्रिषवणमित्यर्थः। तिष्ठेयुरहनि रात्रावासीरन्। एवं स्थानासनाभ्यां विहरन्तः कालं क्षिपन्तः। एवं त्रिभिर्वर्षैस्तत्पापमपनुदन्ते ॥ ७ ॥

तेन कल्पेन धनलाभे वधे च संवत्सरं वैरमणं चरित्वा
त्रयाणामेकशुचयो भवन्ति ॥ ८ ॥

अत्रैका पङ्क्तिस्त्रुटिता ॥ ८ ॥

प्रथमं वर्णं परिहाप्य प्रथमं वर्णꣳ हत्वा संग्रामं गत्वाऽ-
वतिष्ठेत तत्रैनꣳ हन्युः ॥ ९ ॥

प्रथमवर्णो ब्राह्मणः। तं हत्वा संग्रामं गत्वा सेनयोर्मध्येऽवतिष्ठेत। किं सर्वेमित्याह। प्रथमं वर्णं परिहाप्य ब्राह्मणवर्जमितरो वर्णः क्षत्रियादिः। तत्र स्थितं सैनिका हन्युः। अघ्नन्तस्त एनं हिंस्युर्यथा राजा स्तेनम्। स मृतः शुध्यति ॥ ९ ॥

अपि वा लोमानि त्वचं माꣳसमिति हावयित्वाऽग्निं प्रविशेत् ॥ १० ॥

अनन्तरोक्तविषये प्रायश्चित्तान्तरम्। इतिशब्द उपलक्षणार्थः। आत्मनो लोमान्युत्कृत्य पुरोहितेन हावयित्वा होमं कारयित्वा पश्चात्स्वयं तस्मिन्नग्नौ प्रविशेत्। मृतः शुध्यति। तत्राग्निमुपसमाधाय जुहुयात्। लोमानि मृत्योर्जुहोमि लोमभिर्मृत्युं वासये स्वाहा। त्वचं मृत्योर्जुहोमि त्वचा मृत्युं वासये स्वाहा। लोहितेन० मृत्युं वा० हा। स्नावानि० मृत्युं० लोहितं मृत्यो० मि स्नावभिर्मृ०हा। मज्जानि मृत्यो० मज्जभिर्मृत्युं०हा। मेदो मृत्योर्जुहोमि मेदसा मृ० हा। इत्येते मन्त्रा वसिष्ठेन पठिताः ॥ १० ॥

वायसप्रचलाकबर्हिणचक्रवाकहंसभासनकुलमण्डूकडेरीकाश्वहिंसायां शूद्रवत्प्रायश्चित्तम् ॥ ११ ॥

वायसः काकः । प्रचलाकः कामरूपी कृकलासः । बर्हिणो मयूरः । चक्रवाको मिथुनचरो रात्रौ विरही । हंसो मानसवासी । भासो गृध्रविशेषः । नकुलमण्डूकश्वानः प्रसिद्धाः । डेरीका गन्धमूषिका । एतेषां समुदितानां वधे शूद्रवत्प्रायश्चित्तम् । प्रत्येकवधेऽनुकल्प्यम् । केचित्प्रत्येकवध एतदित्याहुः ॥ ११ ॥

धेन्वनडुहोश्चाकारणात् ॥ १२ ॥

धेनुः पयस्विनी गौः । अनड्वान् —अनोवहनयोग्यो बलीवर्दः । तयोः कारणमन्तरेण हिंसायां शूद्रवत्प्रायश्चित्तं कार्यम् । कारणं कोपो मांसेच्छा वा । तेन विनाऽबुद्धिपूर्वमित्यर्थः । बुद्धिपूर्वे तु गां च दत्त्वा वैश्यवदित्यादि स्मृत्यन्तरोक्तं द्रष्टव्यम् ॥ १२ ॥

धुर्यवाहप्रवृत्तौ चेतरेषां प्राणिनाम् ॥ १३ ॥

धुरं वहतीति धुर्यो बलीवर्दः । तेन वोढुं शक्यन्ते धुर्यवाहाः । तावत्सु हिंसायां प्रवृत्तौ सत्यामितरेषां प्राणिनां केवलं प्राणा एव येषां नास्थीनि तेषां हिंसायां शूद्रवत्प्रायश्चित्तमिति । अत्र गौतमः—अस्थिमतां सहस्रं हत्वाऽनस्थिमतामनडुद्भारं चेति ॥ १३ ॥

अनाक्रोश्यमाक्रुश्यानृतं चोक्त्वा त्रिरात्रमक्षीरक्षारलवणं भोजनम् ॥ १४ ॥

यो न कथंचनाऽऽक्रोशमर्हति स पित्राचार्यादिरनाक्रोश्यः । तमाक्रुश्यानृतं चोक्त्वा पातकोपपातकवर्ज्यं त्रिरात्रं क्षीरादि भोजने वर्जयेत् । क्षीरग्रहणेन विकाराणां दध्यादीनामपि ग्रहणमित्यर्थः । अक्षारेति पाठे क्षारं यद्भुज्यमानं परस्य स्वस्य वा जिह्वां द्रावयति तत् ॥ १४ ॥

शूद्रस्य सप्तरात्रमभोजनम् ॥ १५ ॥

शूद्रस्त्वनन्तरोक्तविषये सप्तरात्रमुपवसेत् ॥ १५ ॥

स्त्रीषु चैतेष्वेवम् ॥ १६ ॥

क्षत्रियं हत्वेत्यादिष्वनृतवदनान्तेषु निमित्तेषु यानि प्रायश्चित्तान्युक्तानि तानि स्त्रीणामप्येवमेव कर्तव्यानि । एतच्चत्वारो वर्णा इति जात्यभिधानादेव प्राप्तं सन्नियमार्थमुच्यते । अत ऊर्ध्वं पुरुषस्यैव न स्त्रीणामिति । अपर आह—जात्यभिधानादेव सिद्धेऽतिदेशार्थं वचनम् । अतिदेशेषु चार्धं प्राप्यत इति स्मार्तो न्यायः । तेन स्त्रीणामप्यर्धप्राप्त्यर्थं वचनमिति । तथा च भार्गवः—

अशीतिर्यस्य वर्षाणि बालो वाऽप्यूनषोडशः ।
प्रायश्चित्तार्धमर्हन्ति स्त्रियो व्याधित एव च ॥ इति ॥ १६ ॥

येष्वाभिशस्यं(स्त्यं) तेषामेकाङ्गं छित्त्वाऽप्राणहिंसायाम् ॥ १७ ॥

येषु हतेषु सक्मगतं चाभिशस्तमित्यादिनाऽभिशस्तत्वमुक्तं तेषामेकाङ्गं छित्त्वा शूद्रवत्प्रायश्चित्तं कुर्यात् । अप्राणहिंसायां यदि च्छेदनेन तस्याङ्गस्य शक्तिर्न भज्यते ॥ १७ ॥

अनार्यवपैशुनप्रतिषिद्धाचारेष्वभक्ष्याभोज्यापेयाप्राशने शूद्रायां च रेतः सिक्त्वाऽयोनौ च दोषवच्च कर्माभिसंधिपूर्वं कृत्वाऽनभिसंधिपूर्वं वाऽब्लिङ्गाभिरप उपस्पृशेद्वारुणीभिर्वाऽन्यैर्वा पवित्रैर्यथा कर्माभ्यासः ॥ १८ ॥

आर्याणां भाव आर्यं तद्यस्मिन्नाचारेऽस्ति तदार्यवम् । मत्वर्थीयो वप्रत्ययः । ततोऽन्यदनार्यवमसत्यभाषणादि । पैशुनं परदोषकथनं राजगामि । प्रतिषिद्धाचारः ष्ठीवनमैथुनयोः कर्मापां वर्जयेदित्यादेरनुष्ठानम् । अभक्ष्यं वृथा कृशरादि । अभोज्यं केशकीटाद्युपहतमन्नादि । अपेयमनिर्दशाया गोः क्षीरादि । एतेषां प्राशने शूद्रायां वैश्यात्प्रभृतौ रेतः सिक्त्वाऽयोनौ च जलादौ रेतः सिक्त्वा दोषवच्च कर्म श्रौतमाभिचारिकमभिसंधिपूर्वं बुद्धिपूर्वं कृत्वाऽनभिसंधिपूर्वं वा परपीडादिकं कृत्वाऽब्लिङ्गाभिरापो हि ष्ठा मयो भुव इति तिसृभिर्हिरण्यवर्णाः शुचयः पावका इति चतसृभिरप उपस्पृशेत् । तूष्णीं प्रथमं स्नात्वा पश्चादेतैर्मन्त्रैर्मार्जनं कुर्यात् । वारुणीभिर्वा इमं मे वरुण, तत्त्वा यामि, त्वं नो अग्ने, स त्वं नो अग्न इत्येतैर्मन्त्रैरन्यैर्वा पवित्रैः पवमानः सुवर्जन इत्येतेनानुवाकेन शुद्धवतीभिस्तरत्समन्दीत्यादिकेन यथा कर्माभ्यासस्तथाऽप उपस्पृशेत् । अभ्यासे न रहस्यप्रायश्चित्तमित्येक आहुः ॥ १८ ॥

गर्दभेनावकीर्णी निर्ऋतिं पाकयज्ञेन यजेत ॥ १९ ॥

यो ब्रह्मचारी स्त्रियमुपेयात्सोऽवकीर्णी गर्दभेन निर्ऋतिं यजेत् । पाकयज्ञेन स्थालीपाकविधानेन । अत्र मनुः—

अवकीर्णी तु काणेन गर्दभेन चतुष्पथे ।
पाकयज्ञविधानेन यजेत निर्ऋतिं निशि ॥ इति ।

हारीतस्तु स्त्रीष्ववकीर्णी निर्ऋत्यै चतुष्पथे गर्दभपशुना यजेत पाकधर्मेण । भूमौ पशुपुरोडाशश्रपणमवदानैः प्रचर्य जुहोति । कामावकीर्णोऽस्म्यवकीर्णोऽस्मि कामकामाय स्वाहा । कामाभिद्रुग्धोऽस्म्यभिद्रुग्धोऽस्मि कामकामाय स्वाहा ॥ १९ ॥

तस्य शूद्रः प्राश्नीयात् ॥ २० ॥

तस्य गर्दभस्य सर्पिष्मद्धविरुच्छिष्टं शूद्रः प्राश्नीयात् । तेन ब्राह्मणं विद्यावन्तं परिवेवेष्टीत्यस्यापवादः ॥ २० ॥

मिथ्याधीतप्रायश्चितम् ॥ २१ ॥ (ख० २४) ।

नियमातिक्रमेणाधीतं मिथ्याधीतम् । तद्दोषनिर्हरणाय प्रायश्चित्तं वक्ष्यते ॥ २१ ॥ (ख० २४) ।

संवत्सरमाचार्यहिते वर्तमानो वाचं यच्छेत्स्वाध्याय एवोत्सृजेद्वाचमाचार्य आचार्यदारे भिक्षाचर्ये च ॥ २२ ॥

आचार्यहिते वर्तमानो भूत्वा संवत्सरं वाचंयमः स्यात् । स्वाध्यायादिष्वेव वाचमुत्सृजेत् । आचार्ये तं प्रति कार्यनिवेदने । एवमाचार्यदारे भिक्षाचरणे तत्र भवति भिक्षां देहीति । अस्मादेव ज्ञायतेऽसमावृत्तविषयमेतदिति ॥ २२ ॥

एवमन्येष्वपि दोषवत्सु कर्मस्वपतनीयेषूत्तराणि यानि वक्ष्यामः ॥ २३ ॥

यथा मिथ्याधीतस्येदं प्रायश्चित्तमुत्तराणि यानि वक्ष्यामः प्रायश्चित्तानि तान्यन्येष्वपि । अपिशब्दान्मिथ्याधीतेष्वपि । दोषवत्सु पतनीयव्यतिरिक्तेषु कर्मसु येष्वाहत्य प्रायश्चित्तं नोक्तं तद्विषयाणि द्रष्टव्यानि ॥ २३ ॥

काममन्युभ्यां वा जुहुयात्कामोऽकार्षीन्मन्युरकार्षीदिति जपेद्वा ॥ २४ ॥

स्वाहान्ताभ्यामाज्यद्रव्यम् । जपेद्वा । अस्मिन्पक्षे न स्वाहाकारः । केचित्तु कामाय स्वाहा मन्यवे स्वाहेति होममिच्छन्ति । जपपक्षे तु सूत्रोपदिष्टौ मन्त्राविति । दोषाभ्यासानुरूपं च जपहोमयोरावृत्तिः ॥ २४ ॥

पर्वणि वा तिलभक्ष उपोष्य वा श्वोभूते म(मा)हानदमुदकमुपस्पृश्य सावित्रीं प्राणायामं सहस्रकृत्व आवर्तयेदाप्राणायामशो वा ॥ २५ ॥

पर्वणि पौर्णमास्याममावास्यायां वा तिलानेव भक्षयति नान्यदोदनादिकमिति तिलभक्षः । महानदीभवमुदकमुपस्पृश्य स्नात्वा प्राणायामं प्राणानायम्यै प्राणायामेन । एकस्मिन्प्रा

णायामे यावत्कृत्व आवर्तयितुं शक्यं तत्र तावत्कृत्व आवर्तयेत् । एवमा सहस्रावृत्तेः प्राणायामावृत्तिः । आप्राणायामशो वा ॥ २५ ॥

श्रावण्यां पौर्णमास्यां पर्वणि वा तिलभक्ष उपोष्य वा श्वोभूते म(मा)हानदमुदकमुपस्पृश्य सावित्र्या समित्सहस्रमादध्याज्जपेद्वा ॥ २६ ॥

गिरिप्रभवा समुद्रगा महानदी । तत्र भवं म(मा)हानदम् । सहस्रं यज्ञियस्य वृक्षस्य। आदध्यादिति वचनान्न होमधर्मः स्वाहाकारः ॥ २६ ॥

इष्टियज्ञक्रतून्वा पवित्रार्थानाहरेत् ॥ २७ ॥

पवित्रार्थाः शुद्ध्यर्था मृगाराद्या इष्टयः । यज्ञक्रतवः सोमयागाग्निष्टुदादयः । तान्येतानि षट् प्रायश्चित्तानि । एनःसु गुरुषु गुरूणि लघुषु लघूनि ॥ २७ ॥

अभोज्यं भुक्त्वा नैष्पुरीष्यम् ॥ २८ ॥

अभोज्यस्य मार्जारादिमांसस्य भक्षणे निष्पुरीषभावः कर्तव्यः । यावदुदरं निष्पुरीषं भवति तावदुपवस्तव्यम् ॥ २८ ॥

कियता कालेनावाप्यते तदाह—

सप्तरात्रेणावाप्यते ॥ २९ ॥

सप्तरात्रमुपवसेदित्येव सिद्धे नैष्पुरीष्यवचनाद्येषां त्रिरात्रेणैव तदवाप्यते तेषां तावतैव शुद्धिः । तथा च गौतमः—अभोज्यभोजने निष्पुरीषभावस्त्रिरात्रमभोजनं सप्तरात्रं वेति ॥ २९ ॥

हेमन्तशिशिरयोर्वोभयोः संध्ययोरुदकमुपस्पृशेत् ॥ ३० ॥

उभयोः संध्ययोः सायं प्रातश्चोदकमुपस्पृशेत् । भूमिगतास्वप्सु स्नानमुद्धृताभिर्वा शीताभिरिति ॥ ३० ॥

कृच्छ्रद्वादशरात्रं वा चरेत् ॥ ३१ ॥

द्वादशरात्रसाध्यो व्रतविशेषः कृच्छ्रद्वादशरात्रः ॥ ३१ ॥

तस्य विधिमाह—

त्र्यहमनक्ताश्यदिवाशी ततस्त्र्यहमयाचितव्रतस्त्र्यहं नाश्नाति किंचनेति कृच्छ्रद्वादशरात्रस्य विधिः ॥ ३२ ॥

आदितस्त्रिष्वहःसु नक्तं नाश्नीयाद्दिवैव भुञ्जीत । ततस्त्र्यहमादिवाशी रात्रावेव भुञ्जीत न दिवा । ततस्त्र्यहमयाचितमेव भुञ्जीत । याच्ञाप्रतिषेधोऽयम् । तेन स्वद्रव्य-

स्याप्रतिषेधः । ततस्त्र्यहं नाश्नीत किंचन फलादिकमपि । एवं कृच्छ्रद्वादशरात्रस्य विधिः । तत्र स्मृत्यन्तरवशाद्धविष्यमन्नं ब्रह्मचर्यं स्त्रीशूद्रादिभिरसंभाषणम् ॥ ३२ ॥

एवमेवाभ्यस्येत्संवत्सरꣳ स कृच्छ्रसंवत्सरः ॥ ३३ ॥

एवमेव विधिं संवत्सरं निरन्तरमभ्यस्येत् । स एष कृच्छ्रसंवत्सरो वेदितव्यः । पूर्व-मुक्तं कृच्छ्रसंवत्सरं वा चरेदिति ॥ ३३ ॥

अथापरं बहून्यप्यपतनीयानि कृत्वा त्रिभिरनश्न-न्पारायणैश्चरितप्रायश्चित्तो भवति ॥ ३४ ॥

अथापरं प्रायश्चित्तमुच्यते । अनश्नन्नेव निरन्तरं त्रीणि पारायणानि । आदित आर-भ्याऽऽपरिसमाप्तेर्वेदस्याध्ययनं पारायणम् । बहून्यपि । अपिशब्दात्किं पुनरेकं द्वे वा ॥ ३४ ॥

अनार्यां शयने बिभ्रद्ददद्वृद्धिं कषायपोऽब्राह्मणादि वन्दित्वा तृणेष्वासीत पृष्ठतप् ॥ ३५ ॥

अनार्यां शूद्रां शयने बिभ्रत्–उपगच्छन् । ददद्वृद्धिं वृद्ध्यर्थं द्रव्यं ददत् । वृद्ध्या-जीव इत्यर्थः । सुराव्यतिरिक्तकषायो मद्यकषायस्तस्य पाता कषायपः । यश्चाब्राह्मण इव सर्वान्वन्दित्वा स्तौति स सर्वोऽपि तृणेषूदयादारभ्याऽऽसीत यावदस्याऽऽदित्यः पश्चाद्भागे तपति । आदित्ये तपति तदानुगुण्याचरणात्स्वयमेव पृष्ठतबित्युच्यते । अभ्यासेऽभ्यासो यावता शुद्धिं मन्यते ॥ ३५ ॥

यदेकरात्रेण करोति पापं कृष्णवर्णं ब्राह्मणः सेवमानश्चतुर्थकाल उदकाभ्यवा(वा)यी त्रिभिर्वर्षै-स्तदपहन्ति पापम् ॥ ३६ ॥ (ख० २९) ।

कृष्णवर्णः शूद्रः । तमाज्ञाकरो भूत्वा वृत्त्यर्थं सेवमानः । शिष्टं स्पष्टं गतं च । अहन्यहन्यदा शूद्रो मैथुनं सेवमान इत्यस्मिन्पक्ष ऋतावुपगमनेऽपत्योत्पत्त्यामिदं द्रष्ट-व्यम्—

वृषलीफेनपीतस्य निःश्वासोपहतस्य च ।
तस्यां चैव प्रसूतस्य निष्कृतिर्न विधीयते ॥ इति ॥ ३६ ॥ (ख० २९) ।

यथाकथाच परपरिग्रहमभिमन्यते स्तेनो ह भव-तीति कौत्सहारीतौ तथा काण्वपुष्कर-सादी ॥ ३७ ॥

यथाकथाचाऽऽपद्यनापदि वा भूयांसमल्पं वा परपरिग्रहं परस्वममिमन्यते ममेदमस्त्विति बुद्धौ कुरुते बुद्धौ कृत्वाऽऽदत्त इत्यर्थः। [स] सर्वथा स्तेनो भवतीति कौत्सादयो मन्यन्ते ॥ ३७ ॥

सन्त्यपवादाः परिग्रहेष्विति वार्ष्यायणिः ॥ ३८ ॥

वार्ष्यायणिस्तु मन्यते केषुचित्परिग्रहेषु स्तेनस्यापवादाः सन्तीति ॥ ३८ ॥
तानेवोदाहरति—

शम्योषा युग्यघासो न स्वामिनः प्रतिषेधयन्ति ॥ ३९ ॥

शमी बीजकोशी। तस्यामुष्यन्ते दह्यन्ते कालवशेन पच्यन्त इति शम्योषाः। कोशीधान्यानि माषमुद्गचणकादीनि। युगं वहतीति युग्यः शकटवाही बलीवर्दः। तस्य घासो भक्ष्यं तृणादि युग्यघासः। एत आदीयमानाः स्वामिनो न प्रतिषेधयन्ति। स्वामिनः प्रतिषेधं न कारयन्ति। एतेष्वादीयमानेषु स्वामिनो न प्रतिषेद्धुमर्हन्तीत्यर्थः। स्वयं ग्रहणेऽपि न स्तेयदोष इति यावत्। अत्र स्मृत्यन्तरे विशेषः—

चणकव्रीहिगोधूमयवानां मुद्गमाषयोः।
अनिषिद्धैर्ग्रहीतव्यो मुष्टिरेकोऽध्वनि स्थितैः॥

मनुस्तु—द्विजोऽध्वगः क्षीणवृत्तिर्द्वाविक्षू द्वे च मूलके।
आददानः परक्षेत्रान्न दण्डं दातुमर्हति॥ इति ॥ ३९ ॥

अतिव्यवहारो व्यृद्धो भवतीति ॥ ४० ॥

शम्योषादिष्वतिव्यवहारोऽत्यपहारो व्यृद्धो दुष्टो भवति। अतिमात्रापहारे स्तेय दोषो भवतीत्यर्थः ॥ ४० ॥

सर्वत्रानुमतिपूर्वमिति हारीतः ॥ ४१ ॥

सर्वेषु द्रव्येषु सर्वास्ववस्थासु स्वाम्यनुमतिपूर्वकमेव ग्रहणमिति हारीत आचार्यो मन्यते ॥ ४१ ॥

न पतितमाचार्यं ज्ञातिं वा दर्शनार्थो गच्छेत् ॥ ४२ ॥

पतितैः संव्यवहारो न विद्यत इत्युक्तेऽपि पुनरुच्यते-आचार्यादिषु विशेषं वक्ष्यामीति ॥ ४२ ॥

न चास्माद्भोगानुपयुञ्जीत ॥ ४३ ॥

अस्मात्पतितादाचार्याज्ज्ञातेर्वा पित्रादेर्भोगान्भोगसाधनानि दायप्राप्तान्यपि नोपयुञ्जीत न गृह्णीयात् ॥ ४३ ॥

यदृच्छासंनिपात उपसंगृह्य तूष्णीं व्यतिव्रजेत् ॥ ४४ ॥

यदि पतितैराचार्यादिभिर्यदृच्छासंगतिः स्याद्विधिनोपयातानुपसंगृह्य तूष्णीं तैः सह किंचिदसंभाष्य व्यतिव्रजेन्न क्षणमपि सह तिष्ठेत् ॥ ४४ ॥

माता पुत्रस्य भूयाꣳसि कर्माण्यारभते तस्याꣳ शुश्रूषा नित्या पतितायामपि ॥ ४५ ॥

पुत्रस्य कृते माता भूयांसि दृष्टादृष्टार्थानि गर्भधारणाशुचिनिर्हरणस्तन्यदानप्रदक्षिणानमस्कारोपवासादिकर्माणि करोति । तस्मात्तस्यां पतितायामपि शुश्रूषाऽभ्यङ्गस्नापनादिका नित्या नित्यमेव कर्तव्या ॥ ४५ ॥

न तु धर्मसंनिपातः स्यात् ॥ ४६ ॥

एकस्मिन्धर्मे सहानयोर्धर्मसंनिपातः स पतितया मात्रया सह न कर्तव्यः । नाम सुब्रह्मण्यायां मातुर्नामग्रहणं वरुणप्रघासेषु यावन्तो यजमानस्यामात्याः सस्त्रीकास्तावन्त एकातिरिक्ता इत्येवमादिकमुदाहरणम् । किं पुनरेवमादिषु मातुरन्वयः शुश्रूषा ॐ इत्याह । अन्विक्षा हि सा संमता मन्यते । निरस्ता तु विमता । वैश्वदेवार्थे च पाके सा न भोजयितव्या । मृतायास्तु तस्याः संस्कारादिकाः क्रियाः कर्तव्या नेति प्रतिपन्नाः ॥ ४६ ॥

अधर्माहृतान्भोगानुत्सृज्य न वयं चाधर्मश्चेत्यभिव्याहृत्याधोनाभ्युपरिजान्वाच्छाद्य त्रिषवणमुदकमुपस्पृशन्नक्षीराक्षारलवणं भुञ्जानो द्वादश वर्षाणि नागारं प्रविशेत् ॥ ४७ ॥

ब्राह्मणस्वर्णहराणाम्,

चण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च ।
पतत्यज्ञानतो विप्रो जानन्साम्यं तु गच्छति ॥

एवमादिकमुदाहरणम् । येऽधर्माहृता भोगास्तानभ्य[न]नुज्ञाय परित्यज्य न वयं चाधर्मश्चेति प्रैषं ब्रूयात् । अस्यार्थः । वयं चाधर्मश्च सह नवतां महे(?) इति । अधोनाभीत्यादि गतम् । नात्रार्धशाणीपक्षो भिक्षाचर्यं वा ॥ ४७ ॥

अथ संयोगः स्यादार्यैः ॥ ४८ ॥

प्रायश्चित्तोपदेशात्सिद्धे पुनर्वचनं ज्ञानात्साम्यं तु गच्छतीत्यस्यापवादार्थम् ॥ ४८ ॥

एवमन्येष्वपि दोषवत्सु कर्मसु पतनीयेषु ॥ ४९ ॥

उक्तव्यतिरिक्तानि पतनीयानि पूर्वमुक्तानि । तेषु यत्राऽऽहृत्य प्रायश्चित्तमनुक्तं तेषामप्यनन्तरोक्तमेव प्रायश्चित्तं वेदितव्यम् । उक्तविषये विकल्प इत्यन्ये । तत्र ज्ञानाज्ञानकृतो विकल्पः ॥ ४९ ॥

गुरुतल्पगामी तु सुषिरां सूर्मिं प्रविश्योभयत
आदीप्याभिदहेदात्मानम् ॥ ५० ॥

यस्तु गुरुतल्पगामी सोऽन्तःप्रवेशयोग्यां सूषिरां सूर्मिं कृत्वा प्रविशेत् । प्रविश्योभयोः पार्श्वयोरादीपयेत् । आदीप्याऽऽत्मानमभिदहेत् । ज्वलितां सूर्मिं परिष्वरां(ष्व) समाप्नुयादित्यत्रैव कियानपि विशेषः । अनन्तरस्य वैकल्पिकत्वनिवृत्त्यर्थं वचनम् ॥ ५० ॥

मिथ्यैतदिति हारीतः ॥ ५१ ॥

हारीतस्तु मन्यते । अनन्तरोक्तं मरणान्तिकं प्रायश्चित्तं मिथ्या न कर्तव्यमिति ॥ ५१ ॥

कुत इत्याह—

यो ह्यात्मानं परं वाऽभिमन्यतेऽभिशस्त एव भवति ॥ ५२ ॥

हिशब्दो हेतौ । यस्माद्य आत्मानं परं वाऽभिमन्यते मारयति सोऽभिशस्त एव भवति ब्रह्महैव भवति । नच महापातकस्य ब्रह्महत्यायाः प्रायश्चित्तं भवतीति हेत्वभिधानादभिशस्त एवेति वचनाच्चान्येषामपि मरणान्तिकानां ब्राह्मणविषये निवृत्तिः ॥ ५२ ॥

किं तर्हि तस्य प्रायश्चित्तमित्याह—

एतेनैव विधिनोत्तमादुच्छ्वासाच्चरेन्नास्यास्मिँल्लोके
प्रत्यापत्तिर्विद्यते कल्मषं तु निर्हण्यते ॥ ५३ ॥

अधोनाभ्युपरिजान्वाच्छाद्येत्यादि यदनन्तरमुक्तमेतेनैव विधिना । शिष्टं गतम् ॥ ५३ ॥

दारव्यतिक्रमे खराजिनं बहिर्लोम परिधाय
दारव्यतिक्रमिणे भिक्षामिति सप्तागाराणि चरेत् ॥ ५४ ॥

दारव्यतिक्रमी खराजिनं खरस्य गर्दभस्याजिनं बहिर्लोम परिधाय वसित्वा दारव्यतिक्रमिणे भिक्षां देहीति सप्तागाराणि भिक्षां चरेत् । कौमारदारपरित्यागिने भिक्षां देहीति वा ॥ ५४ ॥

चरवृत्तिराषण्मासात् ॥ ५५ ॥

आषण्मासं चरवृत्तिर्भवेत् । भ्रमन्नेव तिष्ठेदित्यर्थः । ततः सिद्धिः ॥ ५५ ॥

स्त्रियाश्च भर्तुर्व्यतिक्रमे कृच्छ्रद्वादशरात्राभ्यासस्तावन्तं कालम् ॥ ५६ ॥

भर्तुव्यतिक्रम इति पाठे छान्दसो रेफलोपः । व्यतिक्रमः परित्यागः । या स्त्री भर्तारं परित्यजत्यन्तरेण निमित्तं तस्याः कृच्छ्रद्वादशरात्राभ्यासः प्रायश्चित्तं तावन्तं कालमाषण्मासमिति ॥ ५६ ॥

अथ भ्रूणहा श्वाजिनं [खराजिनं] वा बहिर्लोम परिधाय (ख० २६) । खट्वाङ्गं दण्डमादाय पुरुषशिरः प्रतीपानार्थं कर्मनामधेयं प्रब्रुवाणश्चङ्क्रम्येत को भ्रूणघ्ने भिक्षामिति प्राणवृत्तिं प्रतिलभ्योपानिष्क्रम्य शून्यागारं वृक्षमूलं वाऽभ्युपाश्रयेन्नहि म आर्यैः संप्रयोगो विद्यत एतेनैव विधिनोत्तमादुच्छ्वासाच्चरेन्नास्यास्मिँल्लोके प्रत्यापत्तिर्विद्यते कल्मषं तु निर्हण्यते ॥ ५७ ॥

षडङ्गस्य वेदस्याध्येता तदर्थस्य प्रयोगशास्त्रस्य च सव्याख्यानस्यार्थवित्कर्मणामनुष्ठाताऽनुष्ठापयिता च ब्राह्मणो भ्रूणः । तथा च बौधायनः—वेदानां च किंचिदधीत्य ब्राह्मणः । एकां शाखामधीत्य श्रोत्रियः । अङ्गाध्याय्यनूचानः । कल्पाध्यायी ऋषिकल्पः । सूत्रप्रवचनाध्यायी भ्रूण इति । तं हतवान्भ्रूणहा । स शुनः खरस्य वाऽजिनं बहिर्लोम परिधाय पुरुषस्य कस्यचिन्मृतस्य शिरः प्रतीपानार्थं प्रतिर्घात्वर्थवादी । उपसर्गस्य घञ्यमनुष्ये बहुलमिति[1] बहुलग्रहणाद्दीर्घः । पानमेव प्रतिपानम् । पानग्रहणमुपलक्षणम् । भोजनमपि तेनैव । खट्वाङ्गं दण्डं दण्डार्थे खट्वाया अङ्गं खट्वाङ्गमीषादि, तद्धस्तेकृत्वाऽऽदाय भ्रूणहाऽस्मीत्येवं कर्मस्मि(नि)बन्धनं वान्म(स्व)नामधेयं प्रब्रुवाणश्चङ्क्रम्येतेतस्ततश्चरेत् । कापालिकतन्त्रप्रसिद्धस्य खट्वाङ्गस्य वा ग्रहणम् । भिक्षाचरणकाले को भ्रूणघ्ने भिक्षां ददातीति चरेत् । चरित्वा ग्रामे प्राणवृत्तिं प्राणयात्रामात्रां प्रतिलभ्य शून्यागारं वृक्षमूलं वा निवासार्थमभ्युपाश्रयेत् । नहि म आर्यैः संप्रयोगो विद्यत इत्येवं मन्यमानः । कियन्तं कालं चरितव्यमित्याह—एतेनैवेत्यादि । गतम् । श्रोत्रियं वा कर्मसमाप्तमित्यत्र यो ग्रन्थवार्यर्थज्ञो न भवत्यनुष्ठापयिता च न भवति तस्य ग्रहणम् ॥ ५७ ॥

१ (पा० सू० ६ । ३ । १२२) ।

यः प्रमत्तो हन्ति प्राप्तं दोषफलम् ॥ ५८ ॥

क्षत्रियं हत्वेत्येवमादिकेऽनुक्रान्ते विषये यः प्रमत्तो हन्ति प्रमादेनाबुद्धिपूर्वं हन्ति तस्यापि दोषफलं प्राप्तमेव न तु प्रमादादकृतमिति दोषाभावः ॥ ५८ ॥

सह संकल्पेन भूयः ॥ ५९ ॥

संकल्पेन सह वधे कृते भूयः प्रभूततरं भवति । तेन प्रमादकृते लघु प्रायश्चित्तं बुद्धिपूर्वे गुर्विति । यत्पुनः पूर्वमुक्तं दोषवच्च कर्माभिसंधिपूर्वं कृत्वाऽनभिसंधिपूर्वं वेति तत्प्रायश्चित्ते विशेषाभावादुक्तम् ॥ ५९ ॥

एवमन्येष्वपि दोषवत्सु कर्मसु ॥ ६० ॥

अन्येष्वपि हननव्यतिरिक्तेषु दोषवत्सु कर्मत्स्वेवमेव द्रष्टव्यम् । अबुद्धिपूर्वेऽल्पदोषो बुद्धिपूर्वे महानिति ॥ ६० ॥

तथा पुण्यक्रियासु ॥ ६१ ॥

पुण्यक्रियास्वप्येवमेव न्यायः । अबुद्धिपूर्वेऽल्पं फलं बुद्धिपूर्वे महदिति । तद्यथा ब्राह्मणस्वान्यपहृत्य चोरेषु धावत्सु यदृच्छया कश्चिच्छूर आगतस्तान्हन्यात्स्वयमेव वा शूरं दृष्ट्वा चोरा अपहृतान्युत्सृज्य पलायेरंस्तदा शूरस्याल्पं पुण्यफलम् । यदा बुद्धिपूर्वं स्वयमेव चोरेभ्यः प्रत्याहृत्य स्वानि स्वामिभ्यो ददाति तदा महदिति । एवं स्त्रियाऽबुद्ध्या परदारगमनेऽल्पमन्यत्र महदिति ॥ ६१ ॥

परीक्षार्थोऽपि ब्राह्मण आयुधं नाऽऽददीत ॥ ६२ ॥

गुणदोषज्ञानं परीक्षा । तयाऽर्थः प्रयोजनं यस्यैवंभूतोऽपि भूत्वा ब्राह्मण आयुधं नाऽऽददीत । किं पुनर्हिंसार्थमित्यपिशब्दार्थः ॥ ६२ ॥

अस्य प्रतिप्रसवः—

यो हिंसार्थमभिक्रान्तः हन्ति स मन्युरेव मन्युः स्पृशाति न तस्मिन्दोष इति पुराणे ॥ ६३ ॥

श्रुते दोषाभावे हेतुर्यस्मान्मन्युरेव मन्युं स्पृशति न पुरुषः पुरुषम् ॥ ६३ ॥

अत्र वसिष्ठबौधायनादयोऽप्युदाहरन्तीत्याह—

अथाऽप्युदाहरन्त्यध्यापकं कुले जातं यो हन्यादाततायिनम् । न तेन भ्रूणहा भवति मन्युस्तन्मन्युमृच्छतीति ॥ ६४ ॥

मनुस्तु—शस्त्रं द्विजातिभिर्ग्राह्यं धर्मो यत्रोपरुध्यते ।
द्विजातीनां च विप्राणां विप्लवे कालकारितम् ॥
आत्मनश्च परित्राणे दक्षिणानां च संगरे ।
स्त्रीविप्राभ्यवपत्तौ च घ्नन्धर्मेण न दुष्यति ॥ इति ।

गौतमस्तु—प्राणसंशये ब्राह्मणोऽपि शस्त्रमाददीत । वसिष्ठः—
अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः ।
क्षेत्रदारहरश्चैव षडेते आततायिनः ॥
आततायिनमायान्तमपि वेदान्तपारगम् ।
जिघांसन्तं जिघांसीयान्न तेन भ्रूणहा भवेत् । इति ॥ ६४ ॥

पतितैरकृतप्रायश्चित्तैरुत्पादितानां पुत्राणामपि पातित्यमस्तीति प्रतिपादयितुं पूर्वपक्षमाह—

अथाभिशस्ताः समवसाय चरेयुर्धार्म्यमिति सांशित्येतरेतरयाजका इतरेतराध्यापका मिथो विवहमानाः ॥ ६५ ॥

अथशब्दोऽर्थान्तरप्रस्तावं सूचयति । अभिशस्ताः पतिताः । समवसाय । अवसानं गृहम् । समित्येकीभावे । ग्रामाद्बहिरेकस्मिन्प्रदेशे गृहाणि कृत्वा चरेयुः । धार्म्यं धर्म्यं वक्ष्यमाणवृत्तमिति सांशित्य संशितां तीक्ष्णां बुद्धिं कृत्वा । निश्चित्येत्यर्थः । इतरेतरं याजयन्त इतरेतरमध्यापयन्तः परस्परं विवाहसंबन्धं कुर्वन्तश्चरेयुर्वर्तेरन्निति ॥ ६१ ॥

पुत्रान्संनिष्पाद्य ब्रूयुर्विप्रव्रजतैवं ह्यस्मत्स्वार्याः संप्रतिपत्स्यते(न्त इ)ति ॥ ६६ ॥

अथ ते पुत्रान्संनिष्पाद्य ब्रूयुर्हे पुत्रा अस्मदस्मत्तो विप्रव्रजत विविधं प्रकर्षेण च स्नेहमुत्सृज्याऽऽर्यसमीपं गच्छत । एवं ह्यस्मत्स्वस्मात्स्वार्या अभीष्टाः संप्रतिपत्स्यन्ते । आशंसायां भूतवच्चेति भविष्यति लट्[1] । सकारात्परो यकारश्छान्दसः । अपपाठो वा । संप्रतिपत्तिं करिष्यन्ति । आर्याणामप्येतदभिप्रेतं भविष्यति । अस्माभिरेव पतनीयं कर्मानुष्ठितं न भवद्भिः । न च पतितैरुत्पादितस्य पातित्यम् । अन्यत्वात् ॥ ६६ ॥

एतदेवोपपादयति—

---

१ (पा० सू० ३ । ३ । १३२) ।

अथापि न सेन्द्रियः पतति ॥ ६७ ॥

न पतितो भवन्निन्द्रियेण सह पतति । पुरुष एव पतति नेन्द्रियं शुक्रमिति । अथशब्दोऽपिचेत्यस्यार्थे ॥ ६७ ॥

कथं न सेन्द्रियः पततीत्याह—

तदेतेन वेदितव्यमङ्गहीनो हि साङ्गं जनयति ॥ ६८ ॥

तदनन्तरोक्तमर्थजातमेतेन वक्ष्यमाणेन निदर्शनेन वेदितव्यम् । चक्षुराद्यङ्गहीनो हि साङ्गं चक्षुरादिमन्तं जनयति । एवमधिकारविकलः साधिकारं जनयति । स्त्रिया अपि कारणत्वात् । अस्याश्च दोषाभावात् ॥ ६८ ॥

एतदेव दूषयति—

मिथ्यैतदिति हारीतः ॥ ६९ ॥

एतदनन्तरोक्तमर्थरूपं मिथ्याऽयुक्तमिति हारीतो मन्यते ॥ ६९ ॥

कुत इत्याह—

दधिधानीसधर्मा स्त्री भवति ॥ ७० ॥

दधि धीयते यस्यां सा दधिधानी स्थाली । तया सधर्मा सदृशी स्त्री भवति ॥ ७० ॥

ततः किम्—

यो हि दधिधान्याममयतं पय आतश्च(च्य)म-
न्थति न तेन धर्मकृत्यं क्रियत एवमशुचियुक्तं य
न्निर्वर्तते न तेन सह संप्रयोगो विद्यते ॥ ७१ ॥

यो हि पुरुषो दधिधान्यां स्थाल्याममयतं श्वाद्युपहतं पय आतश्च(च्य) तक्राद्यातञ्चनेन संस्कृत्य मन्थते, न तदुत्पन्नेन घृतादिना धर्मकृत्यं यागादिकं क्रियते । एवं पतितसंबन्धेनाशुचि शुक्रं स्त्रियां निषिक्तं शोणितेन क्रियां (विकृतं) निर्वर्तते येन रूपेण निष्पद्यते न तेन सह संप्रयोगो विद्यते शिष्टानाम् । अत्र चाशुचि शुक्रमित्येतत् । अथापि न सेन्द्रियः पततीत्यस्य [न] दूषणम् । नहि वाचनिकेऽर्थे युक्तयः क्रमन्ते । तथा च समानायामप्युत्पत्तौ पुत्र एव पतति न दुहिता । यथाऽऽह वसिष्ठः—पतितेनोत्पन्नः पतितो भवत्यन्यत्र स्त्रियाः । सा हि परगामिनी तामरिक्थामुपेयादिति ॥ ७१ ॥

अभीचारानुव्याहारावशुचिकरावपतनीयौ ॥ ७२ ॥

अभिचार एवाभीचारः । उपसर्गस्य घञीति दीर्घः । अभिचारः श्येनादिः । अनुव्याहारः शापः । तौ गोब्राह्मणविषये क्रियमाणावशुचिकरावेव न पतनीयौ ॥ ७२ ॥

पतनीयाविति हारीतः ॥ ७३ ॥

हारीतस्तु तावपि पतनीयाविति मन्यते ॥ ७३ ॥

पतनीयवृत्तिस्त्वशुचिकराणां द्वादश मासान्द्वादशार्धमासान्द्वादश द्वादशाहान्द्वादश सप्ताहान्द्वादश त्र्यहान्द्वादश द्व्यहान्द्वादशाहं सप्ताहं त्र्यहं द्व्यहमेकाहम् ॥ ७४ ॥

अशुचिकराणामपि कर्मणां येषामाहत्य प्रायश्चित्तं नोक्तं तेषामपि पतनीयेषु कर्मसु या वृत्तिः प्रायश्चित्तं सैव प्रायश्चित्तिः । कियन्तं कालम्—द्वादशमासाद्येकाहान्तम् ॥ ७४ ॥

किमविशेषेण सर्वेष्वेवाशुचिकरेष्वेतेषु कालविकल्पः, नेत्याह—

इत्यशुचिकरनिर्वेषो यथा कर्माभ्यासः ॥ ७५ ॥ (ख० २७) ॥

इति सत्याषाढहिरण्यकेशिश्रौतसूत्रे (धर्मसूत्रापरपर्याये) षड्विंशप्रश्ने सप्तमः पटलः ॥ ७ ॥

इत्येषोऽशुचिकरनिर्वेषो यथा कर्माभ्यासस्तथा वेदितव्यः । बुद्धिपूर्वे सानुबन्धेऽभ्यासे च भूयांसं कालम् । विपरीते विपर्यय इति ॥ ७५ ॥ (ख० २७) ॥

इति श्रीसत्याषाढहिरण्यकेशिधर्मसूत्रव्याख्यायां महादेवदीक्षितविरचितायामुज्ज्वलायां वृत्तौ षड्विंशप्रश्ने सप्तमः पटलः ॥ ७ ॥

अथाष्टमः पटलः ।

न समावृत्ता वपेरन्स्नातेषु काल इत्यादिषु प्रसक्तस्य स्नानस्य कालमाह—

विद्यया स्नातीत्येके ॥ १ ॥

वेदविद्या विद्या । तया संपन्नः स्नानं कुर्यादित्येके मन्यन्ते । मनुरप्याह[1]—

1 (पा० सू० ६ । ३ । १२२) ।

वेदानधीत्य वेदौ वा वेदं वाऽपि समासतः ।
अविप्लुतब्रह्मचर्यो गृहस्थाश्रममावसेत् ॥ इति ॥ १ ॥

तथा व्रतेनाष्टाचत्वारिंशत्परिमाणेन ॥ २ ॥

अष्टाचत्वारिंशद्ग्रहणं गृह्योक्ताष्टाचत्वारिंशद्वर्षाणि चतुर्विंशतिरित्यादेरुपलक्षणम् । अष्टाचत्वारिंशदित्यादिपरिमाणेन व्रतेन वा संपन्नः स्नायात् । असंपन्नोऽपि विद्यया ॥ २ ॥

विद्या व्रतेन च ॥ ३ ॥

विद्येति सुपां सुलुगित्यादिना तृतीयान्तम्[1] । विद्यया व्रतेन चोभाभ्यां संपन्नः स्नायादिति च मन्यन्ते । एवमधीत्य वेद९ स्नानं तदूव्यारूयास्याम इत्यत्र वेदमित्युपलक्षणम् । अत्र याज्ञवल्क्यः—

वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा ।
अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् ॥ इति ।

अत्र व्रतशब्देनाऽऽचार्यकुलवासश्चाति क्षारं लवणमित्यादयो ब्रह्मचारिधर्मा उच्यन्ते । तेषु हि कालपरिमाणस्य श्रुतत्वात्पारं नीत्वेति युज्यते । दृश्यते च तेषु व्रतशब्दः । यथा—व्रतेषु समर्थः स्याद्यानि वक्ष्याम इति । न तु सावित्र्यादीनि वेदव्रतानि । तेषां तत्प्रदेशाध्ययनशेषतया तदभावेऽभावाद्वेदं व्रतानि वेति विकल्पानुपपत्तेः । अतः कालविशेषावच्छिन्नानि व्रतानि वेदमुभयं पारं नीत्वेत्यर्थः ॥ ३ ॥

तेषु सर्वेषु स्नातकवद्वृत्तिः ॥ ४ ॥

विद्यास्नातको व्रतस्नातक उभयस्नातक इति त्रयः स्नातका उक्ताः । तेषु सर्वेषु स्नातकवत् । तदर्हमिति वतिः । स्नातकार्हा वृत्तिः पूजा 'यत्रास्यापचितिम्' इत्यादिका कार्या । न तु व्रतस्नातक ऊनोभयस्नातकेऽधिका ॥ ४ ॥

यद्यप्येवं तथाऽपि पूजयितुः फलविशेषोऽस्तीत्याह—

समाधिविशेषाच्छ्रुतिविशेषाच्च पूजायां फलविशेषः ॥ ५ ॥

कर्तव्येषु कर्मस्ववधानं समाधिः । श्रुतिः श्रुतम् ॥ ५ ॥

अथ स्नातकव्रतानि ॥ ६ ॥

इत उत्तरं स्नातकव्रतान्यधिकृतानि वेदितव्यानि । यद्यपि वक्ष्यमाणेषु कानिचित्साधारणान्यपि भवन्ति तथाऽपि भूम्ना स्नातकव्रतान्यधिक्रियन्ते ॥ ६ ॥

---

१ (पा० सू० ५ । १ । ११७)।

पूर्वेण ग्रामान्निष्क्रमणप्रवेशनानि शीलयेदुत्तरेण वा ॥ ७ ॥

यदा ग्रामान्निष्क्रामति ग्रामं वा प्रविशति तदा पूर्वेण द्वारेणोत्तरेण वा निष्क्रमणप्रवेशने कुर्यान्न द्वारान्तरेण । शीलयेदिति वचनाद्यदृच्छया द्वारान्तरेण निष्क्रमणप्रवेशयोरपि न प्रायश्चित्तम् ॥ ७ ॥

संध्योश्च बहिर्ग्रामादासनं वाग्यतस्य ॥ ८ ॥

अहोरात्रयोः संधानं संधिः । तौ द्वौ सज्योतिषौ । ज्योतिरन्तरदर्शनात् । तयोः संध्योर्ग्रामाद्बहिरासीत वाग्यतश्च भवेत् । मनुरप्याह—

पूर्वां संध्यां जपंस्तिष्ठेत्सावित्रीमाऽर्कदर्शनात् ।
पश्चिमां तु समासीत सम्यगृक्षविभावनात् ॥ इति ।

तद्ब्रह्मचारिविषयम् । स्नातक आसनस्य वाग्यतस्याप्यत्र विधानात् । अन्ये त्वासनग्रहणं स्थानस्याप्युपलक्षणम् । वाग्यतस्येति लौकिक्या वाचो निवृत्तिर्न सावित्रीजपस्येति वर्णयन्ति ॥ ८ ॥

आहिताग्निविषयेऽस्यापवादः—

विप्रतिषेधे श्रुतिलक्षणं बलीयः ॥ ९ ॥

विरोधो विप्रतिषेधः । अग्निहोत्रिणो बहिरासनमग्निहोत्रहोमश्च विरुध्यते । तत्र श्रुतिलक्षणमग्निहोत्रमेव कर्तव्यं न स्मृतिप्राप्तं बहिरासनम् । तस्य कल्प(ल्प्य)मूलत्वादितरस्य क्लृप्तमूलत्वादिति ॥ ९ ॥

सर्वान्रागान्वाससि वर्जयेत् ॥ १० ॥

कुसुम्भादयः सर्वे रागा वाससि वर्जनीयाः । न केनचिद्रक्तं वासो बिभृयादिति ॥ १० ॥

कृष्णं च स्वाभाविकम् ॥ ११ ॥

स्वभावतः कृष्णं कम्बलादि तदपि न वसीत ॥ ११ ॥

अनूद्भासि वासो वसीत ॥ १२ ॥

उद्भासनशीलमुद्भासि । तदन्यदनूद्भासि । छान्दसो दीर्घः । एवंभूतं वासो वसीताऽऽच्छादयेत् ॥ १२ ॥

अप्रकृष्टं च शक्तिविषये ॥ १३ ॥

प्रकृष्टं निकृष्टं जीर्णं मलवत्स्थूलं च । तद्विपरीतमप्रकृष्टम् । तादृशं च वासो वसीत शक्तौ सत्याम् ॥ १३ ॥

दिवा च शिरसः प्रावरणं वर्जयेन्मूत्रपुरीषयोः कर्म परिहाप्य ॥ १४ ॥

चकारः पूर्वापेक्षया समुच्चयार्थः । दिवा च शिरसः प्रावरणं पटादिना न कुर्यात् । किमविशेषेण । न । मूत्रपुरीषयोः कर्म परिहाप्य । मूत्रपुरीषयोः कर्म क्रियां वर्जयित्वा ॥ १४ ॥

शिरस्तु प्रावृत्य मूत्रपुरीषे कुर्याद्भूम्यां किंचिदन्तर्धाय ॥ १५ ॥

दिवा रात्रौ च मूत्रपुरीषे कुर्वञ्शिरः प्रावृत्य कुर्यात् । भूम्यां किंचित्तृणादिकमन्तर्धाय न साक्षाद्भूमावेव । इह कामचारे प्राप्ते दिवा शिरःप्रावरणं वर्जयेदित्युक्तम् । तस्य पर्युदासः कृतः मूत्रपुरीषयोः कर्म परिहाप्येति । ततश्च मूत्रपुरीषयोः काले स एव कामचारः स्थितः । अत आरभ्यते शिरस्तु प्रावृत्येति । एवं तर्हीदमेवास्तु, न पूर्वपर्युदासः । सोऽप्यवश्यं वक्तव्यः । अन्यथा तु शिरः प्रावृत्येत्यस्य रात्रौ चरितार्थत्वाद्दिवा प्रतिषेध एव स्यात् । गौतमस्तु रात्रौ सदैव प्रावरणमाह—न प्रावृत्याहनि शिरः पर्यटेत्प्रावृत्य रात्रौ मूत्रोच्चारे चेति ॥ १५ ॥

छायायां च मूत्रपुरीषयोः कर्म वर्जयेत् ॥ १६ ॥

न चोपजीव्य च्छायास्विति स्मृत्यन्तरे दर्शनाद्यस्यां पथिकादयो विश्राम्यन्ति सा गृह्यते । तेन च्छत्रच्छायाद्यप्रतिषेधः । मेघादिच्छायादेरप्रतिषेधोऽवर्जनीयत्वात् । अत्राऽऽपस्तम्बे विशेषः—**स्वां तु छायामवमेहेत्** ॥ छान्दसः सु(स्तु)गभावः । द्वितीयाश्रुतेः प्रतिशब्दाध्याहारः । अवमेहनं मूत्रकर्म । अनुपजीव्यत्वान्नायं पूर्वप्रतिषेधस्य विषय इति प्रतिप्रसवोऽयं न भवति । तेन सति संभवे स्वामेव च्छायां प्रत्यवमेढव्यम् । अन्यच्च-**न सोपानन्मूत्रपुरीषे कुर्यात्कृष्टे पथ्यप्सु च । तथा ष्ठीवनमैथुनयोः कर्माप्सु वर्जयेदग्निमादित्यमपो ब्राह्मणं गा देवताश्चाभिमुखो मूत्रपुरीषयोः कर्म वर्जयेत्** ॥ निष्ठीवनमास्याच्छ्लेष्मादीनामुत्सर्गः । देवताः प्रतिमाः । अन्यानि स्पष्टानि । **अश्मानं लोष्टमार्द्रानोषधिवनस्पतीनूर्ध्वानाच्छिद्य मूत्रपुरीषयोः शुन्धने वर्जयेत्** ॥ फलपाकावसाना ओषधयः । ये पुष्पैर्विना फलन्ति ते वनस्पतयः । आर्द्रानिति वचनाच्छुष्केषु न दोषः । ऊर्ध्वानिति वचनाद्वातादिनिमित्तेन भग्नेषु न दोषः । तैरश्मादिभिर्मूत्रपुरीषयोः शुन्धनं न कुर्यादिति ॥ १६ ॥

अग्निमादित्यमपो ब्राह्मणान्देवताद्वारं प्रतिवातं च शक्तिविषये नाभिप्रसारयीत ॥ १७ ॥

अग्न्यादीन्प्रति पादौ न प्रसारयेत् । शक्तिविषये सति ॥ १७ ॥

अथाप्युदाहरन्ति ॥ १८ ॥ (ख० २८) ।

इदमप्युदाहरणं शास्त्रान्तर उदाहरन्ति ॥ १८ ॥ (ख० २८) ।
तदेवोदाहरति—

प्राङ्मुखोऽन्नानि भुञ्जीतोच्चारे दक्षिणामुख उदङ्मुखो मूत्रं कुर्यात्प्रत्यक्पादावनेजनमिति ॥ १९ ॥

उच्चारः पुरीषकर्म । पादावनेजनं पादप्रक्षालनम् । भोजनादिषु चतस्रो दिशो नियम्यन्ते । मनस्तु—

आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः ।
श्रियं प्रत्यङ्मुखो भुङ्क्त ऋतं भुङ्क्त उदङ्मुखः ॥ इति ।

याज्ञवल्क्योऽपि—

दिवा संध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः ।
कुर्यान्मूत्रपुरीषे च रात्रौ चेद्दक्षिणामुखः ॥ इति ॥ १९ ॥

आराच्चाऽऽवसथान्मूत्रपुरीषे कुर्याद्दक्षिणां दिशं दक्षिणापरां वा ग्रामादावसथाद्वा ॥ २० ॥

आवसथं गृहम् । तस्य दूरतो मूत्रपुरीषे कुर्यात् । दक्षिणां दिशमिति द्वितीयानिर्देशादुपनिपत्येति गम्यते । दक्षिणापरा निर्ऋतिः । दक्षिणापरां वेत्युक्तम् । अत्रावधिर्ग्रामादावसथाद्वेति यथासंभवम् ॥ २० ॥

अस्तमिते च बहिर्ग्रामान्मूत्रपुरीषयोः कर्म वर्जयेत् ॥ २१ ॥

अस्तमित आदित्ये बहिर्ग्रामान्मूत्रपुरीषयोः कर्म न कुर्यात् । आपस्तम्बे तु विशेषः—अस्तमिते च बहिर्ग्रामादारादावसथाद्वा मूत्रपुरीषयोः कर्म वर्जयेत् [इति] । अन्तर्ग्रामेऽपि गृहस्य दूरतो न कुर्यादिति दृष्टार्थोऽयं प्रतिषेधः । चोरव्याघ्रादिशङ्कया निर्भये देशे नास्ति दोषः ॥ २१ ॥

अश्मानं लोष्टमार्द्रानोषधिवनस्पतीनूर्ध्वानाच्छिद्य मूत्रपुरीषयोः शुन्धने वर्जयेत् ॥ २२ ॥

अश्मानं लोष्टं चोत्पाद्य ताभ्यां गुदं वा लिङ्गं वा न परिमार्जयेत् ।

तथाऽऽर्द्रैरूर्ध्वस्थितैरोषधिवनस्पतिभिश्चोत्पाटितैः । स्वयं पतितैरार्द्रैरपि परिशोधने न दोषः । तथोर्ध्वस्थितैरपि शुष्कैः शोधने न दोषः ॥ २२ ॥

देवताभिधानं चाप्रयतः ॥ २३ ॥

अप्रयतः सन्देवतानामग्न्यादीनां नामाभिधानं वर्जयेत् ॥ २३ ॥

ब्राह्मणस्य गोरिति पदोपस्पर्शनम् वर्जयेत् ॥ २४ ॥

ब्राह्मणं गां च पादेन नोपस्पृशेत् । इतिशब्दः प्रकारे । विद्यावयोवृद्धानामब्राह्मणानामपि वर्जयेत् ॥ २४ ॥

हस्तेन चाकारणात् ॥ २५ ॥

कारणमभ्यङ्गकण्डूयनादि । तेन विना हस्तेनाप्युपस्पर्शनं वर्जयेत् । पूर्वोक्तानामेव ॥ २५ ॥

देवानां सुराज्ञश्च गोर्दक्षिणानां कुमार्याश्च परीवादान्वर्जयेत् ॥ २६ ॥

अग्न्यादिदेवतानां सुराज्ञश्च गोर्दक्षिणानामदक्षिणानामपि हिरण्यानां कुमार्याश्च कन्यायाश्च दोषान्सतोऽपि न कथयेत् । अध्यात्मप्रकरणे योगाङ्गतया परीवादः प्रतिषिद्धः । अनन्तरं च वक्ष्यति—क्रोधादींश्च भूतदाहीयान्दोषान्वर्जयेदिति । इदं तु वचनं गवादिषु प्रायश्चित्तातिरेकार्थम् ॥ २६ ॥

वत्सतर्तीं(न्तीं) च नोपरि गच्छेत् ॥ २७ ॥

वत्सबन्धनरज्जुं नोल्लङ्घयेत् । वत्सग्रहणं गोमात्रोपलक्षणम् ॥ २७ ॥

स्तृहतीं गां नाऽऽचक्षीत ॥ २८ ॥

स्तृहतीं सस्यधान्यादिकं भक्षयन्तीं गां स्वामिने न ब्रूयात् ॥ २८ ॥

संसृष्टां च वत्सेनानिमित्ते ॥ २९ ॥ (ख० २९) ।

यथा च गोर्वत्सेन संसृज्यते तामपि न ब्रूयात् । इयं ते गौर्वत्सेन पीयत इति । अनिमित्तमिति वचनाद्यस्य हविषे वत्सा अपाकृता धयेयुरित्यादिके निमित्ते सति नास्ति दोषः ॥ २९ ॥ (ख० २९) ।

नाधेनुरिति ब्रूयाद्धेनुभव्येत्येव ब्रूयात् ॥ ३० ॥

या च गौः पयस्विनी न भवति तामप्यधेनुरिति न ब्रूयात् । किं तर्हि धेनुर्भव्येत्येव ब्रूयात् । भविष्यद्धेनुर्धेनुर्भव्या । 'धेनोर्भव्यायाम्' मुम्वक्तव्य इति मुम्न भवति । वध्यत(न्ध्या)त्वेनाव्यय(भव्य)त्वात् । वक्तव्यत्वे च सति [*नियमेयं]पुनरधे(धे)नुदर्शनमेव वक्तव्यम् ॥ ३० ॥

---

*अधिकमिव भाति ।

न भद्रं भद्रमिति ब्रूयात् ॥ ३१ ॥

यद्भद्रं तद्भद्रमिति न ब्रूयात् ॥ ३१ ॥

किंतु—

पूर्णं (पुण्यं) प्रशस्तमित्येव ब्रूयात् ॥ ३२ ॥

पूर्णं (पुण्यं) प्रशस्तमित्यनयोरन्यतरेण शब्देन ब्रूयात् ॥ ३२ ॥

नासौ मे सपत्न इति ब्रूयाद्यदसौ मे सपत्न इति
ब्रूयाद्द्विषन्तं भ्रातृव्यं जनयेत् ॥ ३३ ॥

असौ देवदत्तो मे सपत्न इति न ब्रूयात्सदासि । किं कारणम् । यद्यसौ सपत्न इति ब्रूयाद्द्विषन्तं क्रियाशब्दोऽयम् । द्विषाणं भ्रातृव्यं जनयेत् । एवं ह्युक्तो मन्यते ऽकस्मादसावेवं ब्रूते नूनमस्य मयि द्वेषो वर्तत इति । ततस्तत्प्रीतिकारणार्थं यतमानः सपत्न एव जायत इति ॥ ३३ ॥

नेन्द्रधनुरिति परस्मै प्रब्रूयात् ॥ ३४ ॥

इन्द्रधनुराकाशे पश्यन्परस्मै तेन शब्देन च न ब्रूयात् । यद्यवश्यं वक्तव्यं मणिधनुरिति ब्रूयात् । गौतमीये तथा दर्शनात् ॥ ३४ ॥

न पततः संचक्षीत ॥ ३५ ॥

पततः पक्षिणः संघाय भूमिस्थितान्न संचक्षीत न गणयेत् । इयन्त एत इति । अपर आह—पुण्यक्षयेण स्वर्गात्पततः सुकृतिनः परस्मै न संचक्षीत । ज्योतींषि पतन्ति न कथयेदिति ॥ ३५ ॥

प्रेङ्खावन्तरेण नातिक्रामेत् ॥ ३६ ॥

प्रेङ्खौ दोलास्तम्भौ । तयोर्द्वयोर्मध्येन न गच्छेत् । तोरणस्तम्भयोरित्यपरे ॥३६॥

उद्यन्तमस्तं यन्तमादित्यं दर्शने वर्जयेत् ॥ ३७ ॥

उदयसमयेऽस्तसमये चाऽऽदित्यं न पश्येत् । मनुस्तु—

नेक्षेतोद्यन्तमादित्यं नास्तं यन्तं कदाचन ।
नोपरक्तं न वारिस्थं न मध्यं नभसो गतम् ॥ इति ॥ ३७ ॥

दिवाऽऽदित्यः सत्त्वानि गोपायति नक्तं च चन्द्रमास्तस्मादमावास्यायाᳪं रात्र्याᳪं स्वाधीय आत्मनो गुप्तिमिच्छेत्प्रायत्यब्रह्मचर्ये कालचर्ययेति ॥ ३८ ॥

दिवाऽहन्यादित्यः सत्त्वानि गोपायति प्राणिनो रक्षत्यालोकदानेन । नक्तं चन्द्रमास्तस्मादमावास्यायां रात्रौः स्वाधीयो वकारश्छान्दसः । ‘ अन्तिकबाढयोर्नेद- साधौ ’ बाढतरं भृशतरमात्मनो गुप्तिं रक्षणमिच्छेत् । केन प्रकारेण । प्रायत्यब्रह्मच- र्याभ्यां काले चर्यया च । अयं तु तावदर्थानुरूपः पाठः । अधीयमानस्तु प्रमादतश्छान्दसो वा । प्रयतस्य भावः प्रायत्यम् । नित्यात्प्रायत्यादधिकेन प्रायत्येन स्नानादिकेन ब्रह्मच- र्येण मैथुनत्यागेन काले कृतया चर्यया देवार्चनेन । इतिशब्देनान्यसत्क्रियया जपा- दिकया ॥ ३८ ॥

कस्मात्पुनरस्यां रात्रौ चन्द्रमा न गोपयतीत्याह—

सह ह्येतां रात्रिं सूर्याचन्द्रमसौ वसतः ॥ ३९ ॥

एतां रात्रिम् । अत्यन्तसंयोगे द्वितीया । सर्वामेव सूर्याचन्द्रमसौ सह वसतः । न सूर्येण सह वसतश्चन्द्रमसः प्रकाशोऽस्ति ॥ ३९ ॥

न कुसृत्या ग्रामं प्रविशेद्यदि प्रविशेन्नमो रुद्राय वास्तोष्पतय इत्येतामृचं जपेदन्यां वा रौद्रीम् ॥ ४० ॥

कुसृतिः कुमार्गः । तया ग्रामं न प्रविशेत् । यदि गत्यन्तराभावात्प्रविशेन्नमो रुद्रायेत्यादिकामृचं जपेत् । अन्यां वा रौद्रीमिमा[१] रुद्राय तवस इत्यादिकाम् । अत्र वाजसनेयिनां गृह्ये—वनं प्रवेक्ष्यन्ननुमन्त्रयते नमो रुद्राय वनसदे स्वस्ति मा संपारयेति । पन्थानमारोक्ष्यन्ननुमन्त्रयते नमो रुद्राय पथिषदे स्वस्ति मा संपारयेति । अपः प्रवेक्ष्य- न्ननुमन्त्रयते नमो रुद्रायाप्सुषदे स्वस्ति मा संपारयेति । तस्माद्यत्किंचन कुर्वन्स्यान्नमो रुद्रायेत्येव कुर्यात् । सर्वो ह्येष रुद्र इति श्रुतेरिति । भरद्वाजगृह्येऽप्यस्मिन्नेव विषये कियानेव भेदः ॥ ४० ॥

नाब्राह्मणायोच्छिष्टं प्रयच्छेद्यदि प्रयच्छेद्दन्ता- न्स्कुप्त्वा तस्मिन्नवधाय प्रयच्छेत् ॥ ४१ ॥

अब्राह्मणः शूद्रः । न शूद्रायोच्छिष्टमनुच्छिष्टं वा दद्यादिति वासिष्ठे दर्शनात् । तस्मा उच्छिष्टं न प्रयच्छेत् । इत्यनाश्रितविषयम् । यदि प्रयच्छेदिदमाश्रितविष यम् । दन्तान्नखेन स्कुप्त्वा विलिख्य तन्मलं तस्मिन्नुच्छिष्टे निधाय प्रयच्छेत् । स्कुप्त्वेति स्कुभ्नोतेः क्त्वाप्रत्ययः । छान्दसं भकारस्य बत्वम् । स्कुभ्नोतेर्वा क्त्वा । पकार उपजनः ॥ ४१ ॥

---

१ (पा० सू० ५ । ३ । ६३) ।

क्रोधादींश्च भूतदाहीयान्दोषान्वर्जयेत् ॥ ४२ ॥ (ख० ३०) ।

क्रोधादयो भूतदाहीया अध्यात्मपटले व्याख्याताः । तद्वचनं योगिविषयमित्ययोगिनोऽपि स्नातकस्य क्रोधादिनिवृत्त्यर्थमिदं वचनम् । इदमेव तर्ह्युभयार्थमस्तु योग्यर्थमयोग्यर्थं च । एवं सिद्धे क्रोधादिवचनमस्य योगाङ्गस्य(त्व)प्रतिपादनार्थम् । तेन क्रोधाद्यनुष्ठानेन योगसिद्धिरेव न भवति, न पुनः स्नातकव्रतलोपप्रायश्चित्तमिति ॥ ४२ ॥ (ख० ३०) ।

प्रवचनयुक्तो वर्षाशरदं च मैथुनं न चरेत् ॥ ४३ ॥

प्रवचनमध्यापनम् । तेन युक्तो वर्षासु शरादि च मैथुनं वर्जयेत् ॥ ४३ ॥

मिथुनीभूय न च तया सह सर्वा॰ रात्रिं॰ शयीत ॥ ४४ ॥

मैथुनं कृत्वा तया भार्यया सह तां रात्रिं सर्वां न शयीत ॥ ४४ ॥

शयानश्चाध्यापनं वर्जयेत् ॥ ४५ ॥

दिवा नक्तं च शयानस्याध्यापनप्रतिषेधः । स्वयं तु धारणार्थमधीयानस्य न दोषः ॥ ४५ ॥

न तस्यां शय्यायामध्यापयेत् ॥ ४६ ॥

यस्यां शय्यायां भार्यया सह रात्रौ शयीत तस्यां शय्यायामासीनोऽपि नाध्यापयेत् ॥ ४६ ॥

अनाविःस्रगनुलेपनः स्यात् ॥ ४७ ॥

अनाविर्भूतेऽप्रकाशिते स्रगनुलेपने यस्य स एवंभूतो न स्यात् ॥ ४७ ॥

निशायां दारं प्रत्यलंकुर्वीत ॥ ४८ ॥

दारं प्रतीति वचनादुपगमनार्थमलंकरणम् । तेन भार्याया अशक्त्यादिनोपगमनायोग्यत्वे नायं नियमः ॥ ४८ ॥

सशिरामज्जनं चाप्सु वर्जयेत् ॥ ४९ ॥

मज्जनमवमज्जनं सहशिरा वर्जयेत्सहाशिरा स्नानं न कुर्यात् । इत्यवगाहनविषयः । सर्वे स्नातकव्यतिरेके नैमित्तिकाच्च स्नातकस्य नित्यमवगाहनरूपं न भवति इत्याचार्यस्य पक्षः ॥ ४९ ॥

अस्तमिते च स्नानम् ॥ ५० ॥

अस्तमिते चाऽऽदित्ये सर्वप्रकारं(स्नानं) वर्जयेत् ॥ ५० ॥

पालाशमासनं पादुके दन्तप्रक्षालनमिति [च] वर्जयेत् ॥ ५१ ॥

पालाशमासनादि वर्जयेत् । दन्तप्रक्षालनं दन्तकाष्ठम् । इतिशब्दः प्रकार:[रे] । तेनान्यदपि गृहोपकरणं पालाशं वर्जयेत् ॥ ५१ ॥

स्तुतिं च गुरोः समक्षं यथा सुस्नातम् ॥ ५२ ॥

सुस्नातमित्यादिकां स्तुतिं गुरुसंनिधौ वर्जयेत् ॥ ५२ ॥

आ निशायां जागरणम् ॥ ५३ ॥

निशा रात्रेर्मध्यमो भागः । आ तस्माज्जागृयान्न स्वप्यात् ॥ ५३ ॥

अनध्यायो निशायामन्यत्र धर्मोपदेशाच्छिष्येभ्यः ॥ ५४ ॥

निशायामनध्यायोऽध्ययनमध्यापनं च न कुर्याच्छिष्येभ्यस्तु धर्मोपदेशोऽनुज्ञायते ॥ ५४ ॥

मनसा वा स्वयम् ॥ ५५ ॥

निशायामनध्यायस्य प्रतिप्रसवः मनसा वा स्वयं चिन्तयेदिति ॥ ५५ ॥

ऊर्ध्वं मध्यरात्रादध्यापनम् ॥ ५६ ॥

अयमपि प्रतिप्रसवः । निशि निशायाः षोडशनाडिका आरम्याध्ययनं न भवति ॥ ५६ ॥

नापररात्रमुपोत्थायानध्याय इति संविशेत् ॥ ५७ ॥

रात्रेस्तृतीयोऽपररात्रम् । ऊर्ध्वं मध्यरात्रादुपोत्थायोत्थायाध्यापयेन्नापररात्रं संविशेन्न शयीत । यद्यपि तस्मिन्नष्टम्यादिरनध्यायः प्राप्तो भवति किं पुनः स्वाध्यायः । तथा च मनुः—न निशान्त(न्ते) परिश्रान्तो ब्रह्माधीत्य पुनः स्वपेत् । इति ॥ ५७ ॥

काममधः श्शयीत ॥ ५८ ॥

अनेन स्तम्भाद्याश्रयणेनाऽऽसीनस्य स्वापोऽनुज्ञायते । तत्र रेफलोपश्छान्दसः । तथा शकारस्य द्विर्वचनम् ॥ ५८ ॥

मनसा वाऽधीयीत ॥ ५९ ॥

अयमप्यूर्ध्वरात्रादुत्थायाध्यापयतोऽनध्यायप्राप्तावेवमुच्यते । मनसा वा प्राप्तप्रदेशमधीयीत । स्वयं चिन्तयेत् । अपाश्रित्य वा स्वप्यादिति ॥ ५९ ॥

क्षुद्रान्क्षुद्राचरितांश्च देशान्न सेवेत ॥ ६० ॥

क्षुद्रानल्पकान्पुरुषान्न सेवेत । क्षुद्रैर्निषादादिभिरधिष्ठितांश्च देशान्न सेवेत ॥ ६० ॥

सभाः समाजांश्च ॥ ६१ ॥

सभाः समाजा व्याख्यातास्तान्न सेवेत ॥ ६१ ॥

समाजं चेद्गच्छेत्प्रदक्षिणीकृत्यापेयात् ॥ ६२ ॥

यद्यर्थात्समाजानगच्छेत्ततः प्रदक्षिणीकृत्यापेयाद्गच्छेत् ॥ ६२ ॥

नगरप्रवेशनानि च वर्जयेत् ॥ ६३ ॥

बहुवचननिर्देशाद्बहुकृत्वो नगरं न प्रवेष्टव्यम् । यदा कदाचिद्याद्दच्छिके प्रवेशे न प्रायश्चित्तम् ॥ ६३ ॥

प्रश्नं च न विब्रूयात् ॥ ६४ ॥

विविच्य वचनं विवचनं निर्णयः । पृष्टमर्थं न विविच्य ब्रूयादिदमित्थमिति दुर्निरूपार्थमिदं विषयमिति ॥ ६४ ॥

अथाप्युदाहरन्ति—

मूलं कूलं बृं(बृ)हति दुर्विवक्तुः प्रजां पशूनायतनं
हिनस्ति । धर्मप्रह्लादनाय कुमालनाय रुदन्हन्त(ह)·
मृत्युर्व्युवाचः(च) प्रश्नमिति ॥ ६५ ॥

दुर्निरूपमर्थं सहसा निर्णय(र्णीय) यो दुर्विवक्त्यन्यथा निर्णयति तस्य दुर्विवक्तुस्त. देव दुर्विवचनं मूलं कूलं च बृंहति । मूले पित्रादयः । कूलमागामिनी संपत् । तदुभय. मपि स बृंहत्युत्पाटयति । दन्त्योष्ठ्योर्वि(ष्ठ्यो व)कारः । किमेतावदेते(व)न । प्रजां पुत्रादि पशून्गवादिकानायतनं गृहं च हिनस्ति । अतो दुर्विवचनं (न) संभवात्प्रश्नमात्रमेव न ब्रूयादिति । अत्रेतिहासः— कस्यचिदृषेर्धर्मप्रह्लादन कुमालनश्चेति द्वौ शिष्यावा. स्ताम् । तौ कदाचिदरण्यात्समागतौ समिद्भारावाहृत्य प्रमादद्दष्टिपूत एवाचार्यगृहे प्र(प्रा)क्षिपताम् । तयोरेकेनाऽऽचार्यस्य पुत्रः शिशुराक्रान्तो मृतः । ततः शिष्यावाचार्यः प्रपच्छ केनायं मारित इति । तावुभावपि न मयेत्यूचतुः । ततः पतितस्य परित्यागमदु· ष्टस्य च परिग्रा(ग्र)हं कर्तुमशक्नुवन्नृषिर्मृत्युमाहूय पप्रच्छ केनायं व्यापादित इति । ततो धर्मसंकटपतितो मृत्यु(त्यू) रुदन्नेव प्रश्नं व्युवाच विविच्य कथितवान् । प्रल्हादन. कुमालनाय षष्ठ्यर्थे चतुर्थी । कुमालनस्य नेदं पतनीयमिति । प्रल्हादन त्वयेदं कृतमिति व्युवाच । दूरतरस्य नास्तीत्युक्तम् । तथाऽपि तर्था(पीतरस्यार्था)द्गम्यते । इति रुदन्मृत्युरुवाचेति । हत(ह)शब्द ए(ऐ)तिह्यद्योतनार्थः । प्रह्लादशब्दे हकारात्परो रेफः ॥ ६५ ॥

गार्दभं यान(मा)रोहणे विषमारोहणावरो·
हणानि च वर्जयेत् ॥ ६६ ॥

गर्दभयुक्तं यानं शकटाद्यारोहणे वर्जयेन्नाऽऽरोहेत् । तथा विष[मेषु] निम्नोन्नते. ष्वारोहणमवरोहणं च वर्जयेत् । उन्नतेष्वारोहणं निम्नेष्ववरोहणम् ॥ ६६ ॥

ब(बा)हुभ्यां च नदीतरम् ॥ ६७ ॥

तरणं तरम् । बाहुभ्यामिति वचनात्प्लवादिना न दोषः ॥ ६७ ॥

नावां(वं) च सांशयिकीम् ॥ ६८ ॥

भिद्यते न वेति संशयमापन्ना सांशयिकी । तां जीर्णां वर्जयेत् । नावामिति षष्ठ्यन्त-पाठे नावां मध्ये सांशयिकीं नावं वर्जयेत् ॥ ६८ ॥

तृणच्छेदनलोष्ठविमर्दननिष्ठीवनानि चाकारणात् ॥ ६९ ॥

तृणच्छेदनाद्यकारणाद्वर्जयेन्न कुर्यात् । निष्ठीवनस्य कारणं प्रतिश्यायादिः । इतरत्र मृग्यम् ॥ ६९ ॥

यच्चान्यत्परिचक्षते यच्चान्यत्परिचक्षते ॥ ७० ॥ (ख० ३१) ॥

इति सत्याषाढहिरण्यकेशिश्रौतसूत्रे(धर्मसूत्रापरपर्याये)
षड्विंशप्रश्नेऽष्टमः पटलः ॥ ८ ॥

यच्चान्यदेवं युक्तमाचार्याः परिचक्षते तदप्यक्षक्रीडादि वर्जयेत् । द्विरुक्तिः प्रश्नसमाप्तिकृता ॥ ७० ॥ (ख० ३१) ॥

इति सत्याषाढहिरण्यकेशिधर्मसूत्रव्याख्यायां महादेवदीक्षितविरचितायामु-
ज्ज्वलायां वृत्तौ षड्विंशप्रश्नेऽष्टमः पटलः ॥ ८ ॥

इति षड्विंशः प्रश्नः समाप्तः ॥ २६ ॥

पूर्वस्मिन्प्रश्नेऽथातः सामयाचारिकानित्युपक्रम्य निःश्रेयसमभूय इत्यन्तेन वर्णचतुष्टयधर्मानुक्त्वोपनयनं विद्यार्थस्येत्यादिपटलद्वये प्रायेण ब्रह्मचारिणो धर्मा उक्ताः । उत्तरेषु पञ्चसु सर्वाश्रमाणाम् । अष्टमे समावृत्तस्य । इदानीं पाणिग्रहणादारभ्य कर्तव्यानि कर्माणि वक्तुं प्रतिजानीते—

पाणिग्रहणादधि गृहमेधिनोर्व्रतम् ॥ १ ॥

पाणिर्यस्मिन्कर्मणि गृह्यते तत्पाणिग्रहणम् । चतुर्थीकर्मान्तो विवाह इत्यर्थः । तदादिर्पूर्वोऽवधिर्यस्यां क्रियायां सा तथा । क्रियाविशेषणत्वान्नपुंसकम् । तत्प्रभृति तदुपलक्षितकालप्रभृत्युत्तरकालमारभ्य तस्मादूर्ध्वं गृहमेधिनोर्गृहस्थाश्रमवतोर्यन्नियतं कर्तव्यम् । जातावेकवचनम् । तदुच्यते । पाणिग्रहणादिरग्निस्तमौपासनमित्याचक्षते ।

ब(बा)हुभ्यां च नदीतरम् ॥ ६७ ॥

तरणं तरम् । बाहुभ्यामिति वचनात्प्लवादिना न दोषः ॥ ६७ ॥

नावां(वं) च साꣳशयिकीम् ॥ ६८ ॥

भिद्यते न वेति संशयमापन्ना सांशयिकी । तां जीर्णां वर्जयेत् । नावामिति षष्ठ्यन्त-पाठे नावां मध्ये सांशयिकीं नावं वर्जयेत् ॥ ६८ ॥

तृणच्छेदनलोष्ठविमर्दननिष्ठीवनानि चाकारणात् ॥ ६९ ॥

तृणच्छेदनाद्यकारणाद्वर्जयेन्न कुर्यात् । निष्ठीवनस्य कारणं प्रतिश्यायादिः । इतरत्र मृग्यम् ॥ ६९ ॥

यच्चान्यत्परिचक्षते यच्चान्यत्परिचक्षते ॥ ७० ॥ (ख० ३१) ॥

इति सत्याषाढहिरण्यकेशिश्रौतसूत्रे(धर्मसूत्रापरपर्याये)
षड्विंशप्रश्नेऽष्टमः पटलः ॥ ८ ॥

यच्चान्यदेवं युक्तमाचार्याः परिचक्षते तदप्यक्षक्रीडादि वर्जयेत् । द्विरुक्तिः प्रश्नसमा-प्तिकृता ॥ ७० ॥ (ख० ३१) ॥

इति सत्याषाढहिरण्यकेशिधर्मसूत्रव्याख्यायां महादेवदीक्षितविरचितायामु-
ज्ज्वलायां वृत्तौ षड्विंशप्रश्नेऽष्टमः पटलः ॥ ८ ॥

इति षड्विंशः प्रश्नः समाप्तः ॥ २६ ॥

पूर्वस्मिन्प्रश्नेऽथातः सामयाचारिकानित्युपक्रम्य निःश्रेयसभूय इत्यन्तेन वर्णचतुष्टय-धर्मानुक्त्वोपनयनं विद्यार्थस्येत्यादिपटलद्वये प्रायेण ब्रह्मचारिणो धर्मा उक्ताः । उत्तरेषु पञ्चसु सर्वाश्रमाणाम् । अष्टमे समावृत्तस्य । इदानीं पाणिग्रहणादारभ्य कर्त-व्यानि कर्माणि वक्तुं प्रतिजानीते--

पाणिग्रहणादधि गृहमेधिनोर्व्रतम् ॥ १ ॥

पाणिर्यस्मिन्कर्मणि गृह्यते तत्पाणिग्रहणम् । चतुर्थीकर्मान्तो विवाह इत्यर्थः । तदादिर्पूर्वोऽवधिर्यस्यां क्रियायां सा तथा । क्रियाविशेषणत्वान्नपुंसकम् । तत्प्रभृति तदुपलक्षितकालप्रभृत्युत्तरकालमारभ्य तस्मादूर्ध्वं गृहमेधिनोर्गृहस्थाश्रमवतोर्यन्नियतं कर्तव्यम् । जातावेकवचनम् । तदुच्यते । पाणिग्रहणादिरग्निस्तमौपासनमित्याचक्षते ।

तस्मिन्गृह्याणि कर्माणि क्रियन्त इत्युक्तत्वात्तत्प्रभृति गृह्यकर्म गृहमेधशब्दवाच्यमिति दर्शनार्थं प्रथमं पदमनुवादे द्वितीयं संज्ञान्तरविधानायेति । भार्यादिरग्निर्दायादिर्वा ' इति शास्त्रान्तरोक्तो विकल्पो मा भूदिति च प्रयोजनमुक्तम् । गृहमेधिनोरिति द्विवचनमेकाधिकारात्पाणवव[याजवद्]द्वित्वमात्रमाह न तु व्यक्तिद्वित्वम् । तेन बहुभार्यस्यापि कर्तुर्विशेषणं विवक्षितम् । विधेयत्वात् । एकात्ययेऽन्यतरेण मा भूदिति । अनेकभार्यस्यैकस्यामपि सत्यां भवत्येव । अनेकाश्रितस्याधिकारस्य विद्यमानत्वात् । शास्त्रान्तराच्च ' हुत्वा शाकलकैर्मन्त्रैः ' इत्यादेः । वैश्वदेवं तु विधुरा अपि कुर्वन्ति ॥ १ ॥

कालयोर्भोजनम् ॥ २ ॥

कर्तव्यम् । सायं प्रातश्च नान्तरा । परिसंख्येयम् । रागप्राप्तत्वात् । मानवे च स्पष्टमेतत्—

सायं प्रातर्द्विजातीनामशनं स्मृतिचोदितम् ।
नान्तरा भोजनं कुर्यादग्निहोत्रसमो विधिः ॥ इति ।

अन्ये तु नियमं मन्यन्ते । कालयोर्विहितस्य च प्राणाग्निहोत्रस्य लोपे प्रायश्चित्तदर्शनात् । बौधायनः—

गृहस्थो ब्रह्मचारी वा योऽनश्नंस्तु तपश्चरेत् ।
प्राणाग्निहोम(त्र)लोपेन अवकीर्णी भवेत्तु सः ॥ इति ।

तेन भोजनाशक्तावन्नाभावे चोदकादिना लेह्येन वा प्राणाग्निहोत्रं नातिक्रामेत् । तदिदमाचार्यो गृहस्थमात्रे नियच्छति ब्रह्मचारिणि न ॥ २ ॥

अतृप्तिश्चान्नस्य ॥ ३ ॥

सुहितार्थयोगे करणे षष्ठी । पूरणगुणसुहितार्थेति[1] सूत्रात् । अन्नेन तृप्तिं न गच्छेत् । यावत्तृप्ति न भोक्तव्यमिति ॥ ३ ॥

पर्वसु चोभयोरुपवासः ॥ ४ ॥

पक्षसंधिः पर्व । इह तद्युक्तमहर्गृह्यते । तेषु पर्वसूभयोर्दम्पत्योरुपवासः कार्यः । उपवासो भोजनलोपः । उभयोरिति यजमानमात्रेण कृतेवैश्वदेवादिवन्न भवति । किंतु ' यावदुक्तं पत्न्या ' इति परिभाषोक्तत्वात्पृथगुपवास एवेत्यर्थः । अनेनोभयोरपि कालयोर्भोजनमित्यप्युक्तम् । अथवा कालयोरित्यारभ्यैकं सूत्रम् ॥ ४ ॥

अविशेषेणोभयोरपि कालयोः प्राप्तावाह—

१ (पा० सू० २ । २ । ११) ।

औपवस्तमेव कालान्तरे भोजनम् ॥ ५ ॥

यत्कालान्तर एककाले भोजनं तदप्यौपवस्तमेवोपवास एव । औपवस्तं तूपवास इति निष्ठासूत्रसा[धा]रणं च च्छान्दसम् । तदपि दिवा न रात्रौ । श्रौते तथा दर्शनात् । 'नैतां रात्रिमश्नाति' इति । एवं च 'तस्यौपासनेनाऽऽहिताग्नित्वं तथा पार्वणेन चरुणा दर्शपूर्णमासयाजित्वं च' इति गृह्ये यदुक्तं तत्रोपवासो व्याख्यातः ॥ ५ ॥

तृप्तिश्चान्नस्य ॥ ६ ॥

पर्वसु सकृद्भुञ्जानो(नौ) यावत्तृप्ति भुञ्जीयाताम् । [ते]न श्रौतेऽमावास्यायामेव तृप्ति. रत्र तूभयोरपि पर्वणोः ॥ ६ ॥

यच्चैतयोः प्रियं स्यात्तदेतस्मिन्नहनि भुञ्जीया. ताम् ॥ ७ ॥

एतस्मिन्नहनीति दिवा कालान्तर इत्यत्राविशेषाभिधानाद्दिवा भोक्तव्यं रात्रौ नेत्यर्थः ॥ ७ ॥

अधश्च शयीयाताम् ॥ ८ ॥

रात्रौ खट्वादा(दौ) प्राप्तं संचष्टे स्थण्डिलशायिनौ भवतः ॥ ८ ॥

मैथुनवर्जनं च ॥ ९ ॥

मैथुनवर्जनमप्येतस्मिन्नहनि कर्तव्यम् ॥ ९ ॥

श्वोभूते स्थालीपाकः ॥ १० ॥

स्थालीपाकश्चोक्त इत्यविशेषः । उक्तं गृह्ये 'नित्यमत ऊर्ध्वं पर्वस्वाग्नेयेन स्थालीपाकेन यजते' 'पत्न्यवहन्ति' श्रपयित्वा' इत्यादिना । अपरेद्युः कर्तव्यः ॥ १० ॥

तस्योपचारः ॥ ११ ॥

तस्य स्थालीपाकस्य । उपचारः प्रयोगः प्रकारश्च ॥ ११ ॥

नित्यं लोका उपदिशन्ति ॥ १२ ॥

नित्यं सार्वत्रिकमिति शिष्टा उपदिशन्ति । नित्यग्रहणं पर्वाधिकारनिवृत्त्यर्थम् ॥ १२ ॥

यस्मिन्देशेऽग्निमुपसमाधास्यत्स्या(न्स्या)त्तत्र प्रा. चीरुदीचीस्तिस्रस्तिस्रो लेखा लिखित्वाऽवोक्ष्यो.

त्सिच्यैतदुदकशेषमुत्तरेण पूर्वेण वाऽन्यदुपनिद·
ध्यात् ॥ १३ ॥

होमप्रसङ्गादिदमुच्यते । यत्र कुत्र गार्ह्यसामयाचारिके वा कर्मणि गृहेऽरण्ये वाऽग्निमुपसमाधास्यन्प्रतिष्ठापयिष्यन्स्यात्तत्र पूर्वं प्राचीः प्रागग्रास्तिस्रो लेखा लिखेदुद· उदगपवर्गाः । उदगग्रास्तिस्रः प्रागपवर्गा लेखा लिखित्वाऽद्भिरवोक्षेत । अवोक्ष्य । एतदवोक्षणोदकमग्नेरायतनस्य स्थण्डिलस्योत्तरतः पूर्वतो वोत्सिञ्चेत् । उत्सिचा(च्या)· न्यदुदकं पात्रस्थमुपदध्यात् । ॥ १३ ॥

रिक्तपात्रेऽन्यदुदकं निदध्यादित्यस्य प्रसङ्गेनाऽऽह——

नित्यमुदधानान्यद्भिररिक्तानि स्युर्गृहमेधिनोर्व्रतम् ॥ १४ ॥

गृहे यावन्त्युदधानान्युदकपात्राणि घटकरकादीनि तानि सदाऽद्भिररिक्तानि स्युः । एतदपि गृहमेधिनोर्व्रतम् । पुनर्गृहमेधिनोरिति वचनात्पूर्वसूत्रं ब्रह्मचारिविषये वानप्रस्थविषये च । पाके तु स्त्रिया न भवति । उपसमाधास्यन्निति लिङ्गस्य विव· क्षितत्वात् । ' आर्याः प्रयताः ' इत्यत्र तु भवति ॥ १४ ॥

अहन्यसंवेशनम् ॥ १५ ॥

संवेशनं निद्रा । तदहनि न कर्तव्यम् ॥ १५ ॥

ऋतौ तु संनिपातो दारेणानुव्रतम् ॥ १६ ॥

रजोदर्शनादारभ्य षोडशाहोरात्रपरिमित ऋतुः । तत्र संनिपातप्रयोगो दारेण कर्तव्यः । छान्दसमेकवचनम् । बहुवचनान्तो हि दारशब्दः । शास्त्रतो नियमो व्रतं तदनुरोधेन ।

तत्र मनुः——ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोडश स्मृताः ।
चतुर्भिरितरैः सार्धमहोभिः सद्भिर्गर्हितैः ॥
तासामाद्याश्चतस्रस्तु निन्द्या एकादशी च या ।
त्रयोदशी च शेषास्तु प्रशस्ता दश रात्रयः ॥
अमावास्यामष्टमीं च पौर्णमासीं चतुर्दशीम् ।
ब्रह्मचारी भवेन्नित्यमप्यृतौ स्नातको द्विजः ॥ इति ।

याज्ञवल्क्यस्तु——एवं गच्छन्स्त्रियं क्षामां मघां मूलं च वर्जयेत् ॥

आचार्यस्तु चतुर्थीप्रभृति गमनमाह—'चतुर्थ्यां२ स्नातां प्रयतवस्त्रामलंकृतां ब्राह्मण-संभाषामाचम्योपह्वयते ' इति । आपस्तम्बोऽपि—चतुर्थीप्रभृत्याषोडशीमुत्तरा[मुत्तरां] युग्मां प्रजानिःश्रेयसमृतुगमनमित्युपदिशतीति । तदिह षोडशरात्रिष्वादितः सर्वथा तिस्रो वर्ज्या(र्ज्या)श्चतुर्थ्येकादशी त्रयोदश्याचार्येणानुज्ञाताः । मनुना निषिद्धाः । इतरा दश तासु युग्मासु पुत्रा जायन्ते । स्त्रियोऽयुग्मासु रात्रिषु । तत्र चोत्तरामुत्तरामिति

वचनात्षोडश्यां रात्रौ मघादियोगाभावे गच्छतः सर्वत उत्कृष्टः पुत्रो भवति । चतुर्थ्यामवमः । मध्ये कल्प्यम् । एवं पञ्चदश्यामुत्कृष्टा दुहिता । पञ्चम्यामवमा । मध्ये कल्प्यम् । षोडशस्वेव गमनं गर्भहेतुः । तत्रापि प्रथमम् । एवं स्थिते नियमविधिरयं योग्यत्वे सत्यृताववश्यं संनिपतेत् । असंनिपतन्पुत्रोत्पत्तिं निरुन्धानः प्रत्यवेयादिति । तथा च दोषस्मृतिः— ऋतुस्नातां तु यो भार्यां संनिधौ नोपगच्छति ।

तस्या रजसि तन्मासं पितरस्तत्र शेरते ॥ इति ।

पुत्रगुणार्थितो वा(तया)पूर्वाः पूर्वा वर्जयतो न दोषः । अन्ये तु परिसंख्यां मन्यन्ते । ऋतौ संनिपतेन्नान्यत्रेति । तेषामृतावनियमनादगमनेऽपि दोषाभावः । दोषस्मरणमनुपपन्नं स्यात्सर्वथा विधिर्न भवति रागप्राप्तत्वात्संनिपातस्य ॥ १६ ॥

***अन्तराले वि(ऽपि)दार एव ॥ १७ ॥**

अन्तराले मध्ये । ऋत्वन्तरालेऽपि संनिपातस्य विदार एव सकामे सति । यथाऽऽत्मनो जितेन्द्रियं तथा(यतया) न तादृशपारवा(व)श्यम् । तथाऽपि भार्यायामेवेच्छन्त्यां तद्रक्षणार्थमवश्यं संनिपतेदिति वक्ष्यति । अप्रमत्ता रक्षयं(थ) तत्तुने(न्तु मे)तमित्यादि । अनुव्रतमित्यनुवृत्तेः प्रतिषिद्धेष्वेतेषु न भवति ॥ १७ ॥

ब्राह्मणवचनाच्च संवेशनम् ॥ १८ ॥

यदिदमनन्तरोक्तं संवेशनं प्रमाणम् । 'काममाविजनितोः संभवाम' इति ॥ १८ ॥

स्त्रीवाससैव संनिपातः स्यात् ॥ १९ ॥

एवकारो भिन्नक्रमः । स्त्रियो(या) भोगार्थं वासः तेन संनिपात एव स्यात् । तेन न सुप्रक्षालितेनापि ब्रह्मयज्ञादिकमिति ॥ १९ ॥

यावत्संनिपातं चैव सहचर्या ॥ २० ॥

यावत्संनिपातमेव दम्पत्योः सहाऽऽसनम् ॥ २० ॥

ततो नाना ॥ २१ ॥

ततश्च पृथक् शयीयाताम् ॥ २१ ॥

उदकोपस्पर्शनम् ॥ २२ ॥

ततो द्वयोरप्युदकोपस्पर्शनं स्नानं कर्तव्यम् । इदमृतुकाले ॥ २२ ॥

---

* अत्र 'अन्तरालेऽपि दार एव' इत्थंकारेण सूत्रेण भाव्यमिति भाति । 'ऋत्वन्तरालेऽपि संनिपातर एव सकामे सति' इत्यर्थस्य चारुतया संभाव्यमानत्वात् । दार इति बहुवचनाभावस्तु च्छान्दसः ।

अपि वा लेपान्प्रक्षाल्य पादौ चाऽऽचम्य प्रोक्ष-
णमङ्गानाम् ॥ २३ ॥

यदि वा रेतसो रजसश्च ये लेपास्तानद्भिर्मृदा च प्रक्षाल्य तथा पादौ च प्रक्षाल्याऽऽचम्याङ्गानां शिरःप्रभृतीनां प्रोक्षणं कर्तव्यम् । अनृतौ व्यवस्था । यावता प्रयतो मन्यते ॥ २३ ॥

सर्ववर्णानाꣳ स्वधर्मानुष्ठाने परमपरिमितꣳ सुखम् ॥ २४ ॥

सर्वेषां वर्णानां ब्राह्मणादीनां चतुर्णां ये स्वधर्मा वर्णप्रयुक्ता आश्रमप्रयुक्ता उभयप्रयुक्ता वा तेषामवैगुण्येनाऽऽनन्तादनुष्ठाने सति परमपरिमित सुखं परमुत्कृष्टमपरिमितमक्षयं स्वर्गाख्यं तु सुखं भवति ॥ २४ ॥

न केवलमेतावत् । किं तर्हि—

ततः परिवृत्तौ कर्मशेषेण जातिꣳ रूपं बलं मेधां
प्रज्ञां द्रव्याणि स्वधर्मानुष्ठानमिति प्रतिपद्यते तच्च-
क्रवदुभयोर्लोकयोः सुख एव वर्तते ॥ २५ ॥

ततः सुखानुभवादनन्तरं परिवृत्तिरिह लोके जन्म भवति । तस्यां च कर्मणो यः फलशेषोऽननुभुक्तांशस्तेन जातिं ब्राह्मणादिकां विशिष्टे च कुले जन्म भजति । रूपं रूपताम् । बलं प्राणाधिक्यं प्रतिपक्षनिग्रहक्षमम् । मेधां ग्रन्थग्रहणशक्तिम् । प्रज्ञामर्थग्रहणशक्तिम् । द्रव्याणि स्वर्णादीनि । धर्मानुष्ठानम् । इतिकरणाद्यत्त्वन्यदप्येवं युक्तं प्रतिपद्यते । सर्वत्र धर्मशेषो हेतुः । कर्माणि भुज्यमानानि सावशेषाणि भुज्यन्ते । ऐहिकस्य शरीरग्रहणादेरपि कर्मफलत्वाद्धर्मानुष्ठानं प्रतिपद्यत इत्युक्तम् । यदा चैवं तदा सर्ववर्णानां स्वधर्मानुष्ठानमिति प्रतिपद्यत इत्यन्तं पुनर्भवतीत्यनुक्तमिति प्रसिद्धम् । तत्तस्माच्चक्रवदुभयोर्लोकयोरिह चामुष्मिंश्च सुख एव वर्तते । न जातु दुःखे दुःखानुबन्धे नैवानुवृत्तिर्भवतीत्यर्थः॥ २५ ॥

शरीरोत्पत्तिसंस्कारा अप्यवस्थापेक्षा इति दर्शयितुं दृष्टान्तमाह—

यथौषधिवनस्पतीनां बीजस्य क्षेत्रकर्मविशेषे
फलवृद्धिरेवम् ॥ २६ ॥

चलोपो द्रष्टव्यः । यथा चौषधीनां व्रीह्यादीनां वनस्पतीनां चाऽऽम्रादीनां बीजस्य [च] क्षेत्रविशेषाच्च कर्मविशेषाच्च संस्कारविशेषाच्च कृष्यादेश्च विशेषे फलवृद्धिर्भवति । एवं व्रीहियवा ऊषर उप्ता न प्ररोहन्ति । कृष्यादिपरिनिर्मितसुक्षेत्र उप्ताः स्तम्बकरयो भवन्ति । एवं पुरुषेऽपि गर्भाधानादिसंस्कारसंपन्ने द्रष्टव्यम् ॥ २६ ॥

एतेन दोषफलवृद्धिर्निरुक्ता ॥ २७ ॥

एतेनैव न्यायेन दुष्कर्मफलवृद्धिरप्युक्ता वेदितव्या । तत्रोहेन पठनीयम्—सर्ववर्णानां स्वधर्माननुष्ठाने परमपरिमितं दुःखम् । ततः परिवृत्तौ कर्मफलदोषेण दुष्टां जात्यादि-कामद्रव्यान्तामधर्मानुष्ठानमिति प्रतिपद्यते । यथौषधिवनस्पतीनां बीजस्य क्षेत्रकर्मविशे-षाभावे फलहानिरेवमिति ॥ २७ ॥

दोषपरिवृद्धावुदाहरणमाह—

स्तेनोऽभिशस्तो ब्राह्मणो राजन्यो वैश्यो वा पर-स्मिँल्लोकेऽपरिमिते निरये वृत्ते जायते चाण्डालो ब्राह्मणः पौल्कसो राजन्यो वैणो वैश्यः ॥ २८ ॥

स्तेनः स्वर्णचोरः । अभिशस्तो ब्रह्महा स्तेनोऽभिशस्तो ब्राह्मणादिरमुष्मिँल्लोकेऽपरि-मिते निरये दोषफलमनुभूय तस्मिन्वृत्ते परिक्षीणे ब्राह्मणश्चाण्डालो जायते । राजन्यः-पौल्कसः । पुल्कस एव पौल्कसः । प्रज्ञादित्वादण् । वैश्यो वैणो जायते । वेणुर्तर्नकः । स एव वैणः ॥ २८ ॥

एवमेतेन वर्णपरिध्वंसा दोषफलैः कर्मभिर्दोषफ-लासु योनिषु जायन्ते वर्णपरिध्वंसायाम् ॥ २९ ॥

यथा वर्णपरिध्वंसा वर्णेभ्यः प्रच्यवनम् । तस्यां वर्णपरिध्वंसायां यथा ब्राह्मणादय-श्चण्डाला जायन्ते एतेन प्रकारेण स्तेनाभिशस्ताभ्यामन्येऽपि दोषफलकर्मभिर्दोषफलासु सूकरादिषु योनिषु जायन्ते । परिध्वंसाः स्वजातिपरिभ्रष्टाः सन्त इत्यर्थः । तत्तथाऽव-गन्तव्या इति ॥ २९ ॥

चाण्डालोपस्पर्शने संभाषायां दर्शने च दोषस्तत्र प्रायश्चित्तम् ॥ ३० ॥

चाण्डालोपस्पर्शने दोषो भवति । तथा संभाषायां दर्शने च । उपसमस्तमपि चाण्डा-लग्रहणमभिसंबध्यते । तत्र सर्वत्र प्रायश्चित्तं वक्ष्यते ॥ ३० ॥

अवगाहनमपामुपस्पर्शने संभाषायां ब्राह्मणसंभाषा दर्शने ज्योतिषां दर्शनम् ॥ ३१ ॥ (ख० १) ।

उपस्पर्शने सत्यवगाहनं प्रायश्चितम् । ऋजुनी उत्तरे । अप्रकरणे प्रायश्चित्ताभिधान स्वकर्मप्रच्युतानां निन्दार्थम् । निन्दितश्चण्डालः यस्य दर्शनेऽपि प्रायश्चित्तं स वा एष जायते स्वकर्मप्रच्युतो ब्राह्मण इति ॥ ३१ ॥ (ख० १) ।

आर्याः प्रयता वैश्वदेवेऽन्नꣳ सꣳस्कर्तारः स्युः ॥ ३२ ॥

अन्नं भक्ष्यं भोज्यं पेयादिकं संस्कुर्युः । न स्वयं नापि स्त्रियः ॥ ३२ ॥

भाषां कासं क्षवथुमित्यभिमुखोऽन्नं वर्जयेत् ॥ ३३ ॥

भाषा शब्दोच्चारणम् । कासः कण्ठे घुरुघुराशब्दः । क्षवथुः क्षुत् । एतत्रितयमन्नाभिमुखो न कुर्यात् । संस्कर्तारः स्युरिति बहुवचने प्रकृते वर्जयेदित्येकवचनं प्रत्येकमुपदेश्यान्(शार्थम्) ॥ ३३ ॥

केशानङ्गं वाससश्चाऽऽलभ्याप उपस्पृशेत् ॥ ३४ ॥

केशादीनात्मदीयानन्यदीयान्वाऽऽलभ्य स्पृष्ट्वाऽप उपस्पृशेत् । नेदं स्नानं किं तर्हि स्पर्शनम् । केशालम्भे पूर्वमप्युपस्पर्शनं विहितम् । इदं तु वचनं तत्रोक्तवैकल्पिकं शकृदाद्युपस्पर्शने मा भूदिति ॥ ३४ ।

आर्याधिष्ठिता वा शूद्राः सꣳस्कर्तारः स्युः ॥ ३५ ॥

त्रैवर्णिकैरधिष्ठिताः शूद्राः संस्कर्तारः स्युः । प्रकृतत्वादन्नस्येति गम्यते ॥ ३५ ॥

तेषाꣳ स एवाऽऽचमनकल्पः ॥ ३६ ॥

तेषां शूद्राणामन्नसंस्कारेऽधिकृतानां स एवाऽऽचमनकल्पो वेदितव्यो यस्यान्नं पचति । यदि ब्राह्मणस्य हृदयंगमाभिरद्भिः, यदि क्षत्रियस्य कण्ठगताभिरद्भिः, यदि वैश्यस्य तालुगताभिरद्भिरिन्द्रियोपस्पर्शनं च भवति ॥ ३६ ॥

अधिकमहरहः केशश्मश्रुलोमनखवापनम् ॥ ३७ ॥

शूद्राः पचन्तः प्रत्यहं केशादि वपेयुः । इदमेषामधिकमार्येभ्यः ॥ ३७ ॥

उदकोपस्पर्शनं च सह वाससा ॥ ३८ ॥

सहैव च वाससा स्नानं कुर्युः । आर्याणां तु परिहितं वासो निधाय कौपीनाच्छादनमात्रेणापि स्नानं भवति । शूद्राणामपि पाकादन्यत्र । तथा च मनुः—'सवासोऽपि सहाजस्त्रं विज्ञायते जलाशये' इति ॥ ३८ ॥

अपि वाऽष्टमीष्वेव पर्वसु वा वपेरन् ॥ ३९ ॥

यदि वाऽष्टमीष्वेव वपेरन्केशादीन्पर्वस्वेव वा प्रत्यहं वा वपेरन् । अन्तर्भावितण्यर्थो वावमे(पये)युरित्यर्थः । तथा च लोमनखवापनमिति पूर्ववर्णच(ण्णिच्)प्रयुक्तः (क्तम्) ॥ ३९ ॥

परोक्षमन्नꣳ सꣳस्कृतमग्नावधिश्रित्याद्भिरवो(द्भिः प्रो)क्षेत्तदे(दे)व पवित्रमित्याचक्षते ॥ ४० ॥

यदि शूद्राः परोक्षमन्नं संस्कुर्युरार्यैरनाधिष्ठितास्तदा तत्परोक्षमन्नं संस्कृतमाहृतं स्वयमग्नावधिश्रयेत् । अधिश्रित्याद्भिः प्रोक्षेत् । प्रोक्षितमन्नं भूतं देवपवित्रमित्याचक्षते । देवानामपि तत्पवित्रं किं पुनर्मनुष्याणामिति ॥ ४० ॥

सिद्धेऽन्ने तिष्ठन्भूतमिति स्वामिने प्रब्रूयात् ॥ ४१ ॥

सिद्धे पक्केऽन्ने तिष्ठन्वा(पा)चकोऽधिष्ठितो भूतमिति प्रब्रूयात् । कस्मै । यस्य तदन्नं तस्मै स्वामिने भूतमिति । निष्पन्नमित्यर्थः ॥ ४१ ॥

तत्सुभूतमिति प्रतिवचनः ॥ ४२ ॥

तत्सुभूतमित्यादि प्रतिवचनो मन्त्रः । तदन्नं सुभूतं सुनिष्पन्नम् ॥ ४२ ॥

गृहमेधिनो यदशनीयस्य होमा बलयश्च स्वर्गपुष्टिसंयुक्ताः ॥ ४३ ॥

गृहमेधिनो यदशनीयं पक्कमपक्कं वोपस्थितं तस्यैकदेशेन होमा बलयश्च वक्ष्यमाणाः कर्तव्याः । स्वर्गः पुष्टिश्च तेषां फलमिति ॥ ४३ ॥

तेषामुपयोगे द्वादशाहं ब्रह्मचर्यमधःशय्या क्षारलवणमधुमांसवर्जनं च ॥ ४४ ॥

तेषां होमानां च बलीनां च ये मन्त्रास्तेषामुपयोगे नियमपूर्वके ग्रहणे द्वादशाहं ब्रह्मचर्यं मैथुनवर्जमधःशय्या स्थण्डिलशायित्वं क्षारलवणादिवर्जनं च भवति । उपयोक्तुरेव व्रतम् । अन्ये तु पत्न्या अपीच्छन्ति । उपयोगः प्रथमः प्रयोगः । तत्र च पत्न्या अपि सहाधिकार इति वदन्तः ॥ ४४ ॥

उत्तमस्यैकरात्रमुपवासः ॥ ४५ ॥

उत्तमस्य ‘ उत्तमेन वैहायसम् ’ इति वक्ष्यमाणस्य ‘ ये भूताः प्रचरन्ति ’ इत्यस्यैकरात्रमुपवासः कर्तव्यः ॥ ४५ ॥

बलीनां तस्य तस्य देशसंस्कारो हस्तेन परिमृज्यावोक्ष्य न्युप्य पश्चात्परिषेचनम् ॥ ४६ ॥

बलीनां तस्य तस्य बलै(ले)र्देशसंस्कारः कर्तव्यः । कः पुनरसौ । हस्तेन परिमार्जनमवोक्षणं च । तत्कृत्वा बलीनां निवपनं न्युप्य पश्चात्परिषेचनं कर्तव्यम् । उपदेशग्रहणादेव सिद्धे पश्चाद्ग्रहणं मध्ये गन्धमाल्यादिदानार्थमित्याहुः । तस्य तस्येति वचनं

त्स्यापि संभवे सकृदेव परिमार्जनमवोक्षणं च मा भूदेकस्मिन्देशे समवेतानामपि पृथक्पृथक् यथा स्यादिति ॥ ४६ ॥

औपासने पचने वा षड्भिराद्यैः प्रतिमन्त्रꣳ हस्तेनैता आहुतीर्जुहुयात् ॥ ४७ ॥

यत्र पच्यते स पचनाग्निः । औपासनवतामौपासने विधुरस्य पचन इति व्यवस्थितो विकल्पः । अन्ये तु तुल्यविकल्पं मन्यन्ते । यदैकपाकिनामपि भ्रात्रादीनां पृथक्पृथग्वैश्वदेवादिकं तदा पचन एव षड्भिराद्यैः ' अग्नये स्वाहा, विश्वेभ्यो देवेभ्यः स्वाहा, ध्रुवाय भूमाय स्वाहा, ध्रुवक्षितये स्वाहा, अच्युतक्षितये स्वाहा, अग्नये स्विष्टकृते स्वाहेत्येतैः । एते मन्त्रा उपनिषद्भागे पठिताः । यद्यपि सोमाय स्वाहेति पाठे न पठितं तथाऽप्योषधिहविष्केषु सर्वत्र तस्य प्रवृत्तिरिति वदन्तः सोमाय स्वाहेति द्वितीयां जुह्वति । [स्विष्ट]कृत्त्वात्तमपि सप्तमं जुह्वति, अग्नये स्विष्टकृते स्वाहेति । आचार्यस्तु ' अग्नये स्वाहा ' इत्यादि स्विष्टकृदन्ताः षडाहुतीर्मन्यते । हस्तग्रहणं दर्व्यादिनिवृत्त्यर्थम् । केचित्तु ' सूर्याय स्वाहा, प्रजापतये स्वाहा ' इति द्वे आहुती जुह्वति । ' औपासनदेवताभ्यश्च ' इत्याश्वलायनस्मरणात् । उभयतः परिषेचनं यथापुरस्तात् । ' अन्वमꣳस्थाः प्रासावीः ' इति मन्त्रान्तान्सन्नमतीति गृह्योक्तविधिनाऽत्रानुक्तत्वात् ॥ ४७ ॥

एवं बलीनां देशे देशे समवेतानाꣳ सकृत्सकृदन्ते परिषेचनम् ॥ ४८ ॥

यथा षण्णामाहुतीनां परिषेचनतन्त्रं विभवात् । एवं बलयोऽप्येकदेशसमवेताः ' उत्तरैर्ब्रह्मसदने ' इत्यादयस्तेषां यदन्ते परिषेचनं प्राप्तं पश्चात्परिषेचनं यथा षण्णामित्यनेन विहितं सकृत्सर्वान्ते सकृत्सकृत्कर्तव्यं न प्रत्येकं पृथगिति । असत्यस्मिन्सूत्रे पूर्वस्य तस्य तस्येति वचनाद्यथा परिमार्जनमवोक्षणं च प्रत्येकं पृथग्भवति तथा परिषेचनमपि स्यात् । अत्र चोपदेशवशादेव ये एकदेशबलयस्तेषामेव सकृदन्ते परिषेचनं न याद‍ृच्छिकसम्वाये । तेन यद्यप्यगारस्योत्तरप्रदेशः शय्यादेशस्तथाऽपि कामलिङ्गस्य पृथक्परिषेचनं भवति ॥ ४८ ॥

सति सूपे सꣳसृष्टेन कार्याः ॥ ४९ ॥

सति सूपे तत्संसृष्टा(ष्टा) बलयः कार्याः । अन्ये त्वन्यैरपि व्यञ्जनैः संसर्गमिच्छन्ति

न्ति । तथा बौधायनः—'काममितरेष्वायतनेषु' इति । एष एवव्यञ्जनसंस्कारः सूपस्यापि । व्यञ्जनेन संसृष्टेनान्नेन बलयः कार्याः सति संभव इत्थमिति ॥ ४९ ॥

अपरेणाग्निं सप्तमाष्टमाभ्यामुदगपवर्गम् ॥ ५० ॥

अपरेणाग्निमग्नेः पश्चात्सप्तमाष्टमाभ्यां 'धर्माय स्वाहा, अधर्माय स्वाहा' इत्येताभ्यां बलिहरणं कर्तव्यम् । उदगपवर्गं न प्रागपवर्गम् ॥ ५० ॥

उदधानसंनिधौ नवमेन ॥ ५१ ॥

उदकं यत्र धीयते तदुदधानं मणिकाख्यम् । तस्य संनिधौ नवमेन 'अद्भ्यः स्वाहा' इत्यनेन ॥ ५१ ॥

मध्येऽगारस्य दशमैकादशाभ्यां प्रागपवर्गम् ॥ ५२ ॥

'ओषधिवनस्पतिभ्यः स्वाहा, रक्षोदेवयजनेभ्यः स्वाहा' इत्येताभ्याम् ॥ ५२ ॥

उत्तरपूर्वार्धेऽगारस्योत्तरैश्चतुर्भिः ॥ ५३ ॥

'गृह्याभ्यः स्वाहा, अवसानेभ्यः स्वाहा, अवसानपतिभ्यः स्वाहा, सर्वभूतेभ्यः स्वाहा' इत्येतैः प्रागपवर्गमित्येव ॥ ५३ ॥

शय्यादेशे कामलिङ्गेन ॥ ५४ ॥

'कामाय स्वाहा' इति ॥ ५४ ॥

देहल्यामन्तरिक्षलिङ्गेन ॥ ५५ ॥

देहली द्वारस्याधस्तात् । तस्याधोवेदिकेत्येके । अन्ये त्वन्तर्द्वारस्य च ग्रहणम् । तत्र 'अन्तरिक्षाय स्वाहा' इति ॥ ५५ ॥

उत्तरेणापिधान्याम् ॥ ५६ ॥

येनापिधीयते द्वारं साऽपिधानी कपाटम् । तदर्गलमित्यन्ये । तत्र 'यदेजति जगति [यच्च चेष्टति नाम्नो भागो यन्नाम्ने] स्वाहा' इति ॥ ५६ ॥

उत्तरैर्ब्रह्मसदने ॥ ५७ ॥

अगारस्यो(स्ये)त्यनुवृत्तेः(वर्तते) । तस्य यो ब्रह्मसदनाख्यो देशो वास्तुविद्याप्रसिद्धो मध्येऽगारस्य तत्रोत्तरैर्दशभिः 'पृथिव्यै स्वा०, अन्तरिक्षाय०, दिवे०, सूर्याय०, चन्द्रमसे०, नक्षत्रेभ्य०, इन्द्राय०, बृहस्पतये०, प्रजापतये०, ब्रह्मणे स्वाहा' इत्येतैः प्रागपवर्गमित्येव । अपर आह—मध्येऽगारस्येत्यत्र देशस्योपयुक्तत्वाद्ब्रह्म(ह्मा) यत्र सीदति गार्ह्ये[षु] कर्मसु, अग्नेर्दक्षिणतः स ब्रह्मसदनस्तत्रेति ॥ ५७ ॥

दक्षिणतः पितृलिङ्गेन प्राचीनावीत्यवाचीनपाणिर्दध्यात् ॥५८॥

अनन्तराणां बलीनां दक्षिणतः ' स्वधा पितृभ्यः ' इत्यनेन बलिं कुर्यात् । प्राचीनावीत्यवाचीनपाणिश्च भूत्वा दक्षिणं पाणिमुत्तानं कृत्वाऽङ्गुष्ठतर्जन्योरन्तरालेन ।।५८।।

रौद्र उत्तरो यथादेवतम् ।। ५९ ।।

पितृबलेरुत्तरतो रौद्रबलिर्यथादेवतम् । प्राचीनावीत्यवाचीनपाणिरिति नानुवर्तत इत्यर्थः । ' नमो रुद्राय पशुपतये स्वाहा ' इति । तत्र यद्यपि पशुपतिलिङ्गमप्यस्ति तथाऽपि रुद्रस्यैव विशेषणमिति रौद्र इति व्यपदेश्यत्वेनोपपन्नं देवतास्मरणमपि रुद्रायेत्येव कुर्वन्ति । रुद्राय पशुपतय इत्येके । केचित्तूत्तरो मन्त्रो रौद्रः । स [न] पशुपतिदेवत्य इति व्याचक्षते । तेषां देयः (शः) प्राग्वोदग्वा पित्र्यात् ।। ५९ ।।

तयोर्नाना परिषेचनं धर्मभेदात् ।। ६० ।।

तयोरनन्तरयोरन्त्ययोरेकस्मिन्देशे समवेतयोरपि नाना पृथक्परिषेचनं कर्तव्यम् । कुतः । धर्मभेदात् । पित्र्यस्याप्रदक्षिणं परिषेचनम् । इतरस्य दैवत्वात्प्रदक्षिणमिति ।। ६० ।।

नक्तमेवोत्तमेन वैहायसः ।। ६१ ।।

उत्तमेन

' ये भूताः प्रचरन्ति नक्तं बलिमिच्छन्तो वितुदस्य प्रेष्याः ।
तेभ्यो बलिं पुष्टिकामो हरामि मयि पुष्टिं पुष्टिपतिर्दधातु स्वाहा '

इत्यनेन नक्तम् । ये भूताः प्रचरन्ति दिवा बलिमिति दिवा । एवं पदत्यागेन मन्त्रपाठः । आश्वलायनोऽपि—दिवाचारिभ्यो नक्तंचारिभ्य इति नक्तमेव वैहायसो रात्रावेव वैहायसः कर्तव्यः । रात्रा आकाश एव देयः । दिवा भूमौ । तथा च बोधायनः— अथाऽऽकाश उत्क्षिपति ' ये भूताः प्रचरन्ति नक्तम् ' इति । अपर आह—एवकारो भिन्नक्रमः नक्तमुत्तमेन बलिरिति । तत्तदरूपत(त्र वक्ष्यन्त)राणां रात्रौनिवृत्तिरिति ।। ६१ ।।

एतानव्यग्रो यथोपदेशं कुरुते नित्यः स्वर्गः पुष्टिश्च ।। ६२ ।।

य एताननन्तरोक्तान्होमान्बलींश्चाव्यग्रः समाहितमना भूत्वा यथोपदेशमुपदेशानतिक्रमेण कुरुते तस्य नित्यः स्वर्गः पुष्टिश्च नित्या । ' स्वर्गपुष्टिसंयुक्ताः ' इति सत्पूर्वमुक्तं तस्यार्थवादता मा भूदिति पुनर्वचनम् । पुष्टिस्वर्गौ नित्यावेव भवतः । न प्रक्षेऽपि कर्मान्तरैर्बाधनमिति ।। ६२ ।।

---

१ ' गृहमेधिनो यदशनीयस्य होमा बलयश्च स्वर्गपुष्टिसंयुक्ताः ' इत्यत्रेति शेषः ।

अग्रं च देयम् ॥ ६३ ॥

बलिहरणानन्तरमग्रं च देयं देवं (व) पितृभूतमनुष्येभ्यः । चकाराद्देते मन्त्राः— 'देवेभ्यः स्वाहा, पितृभ्यः स्वधाऽस्तु, भूतेभ्यो नमः, मनुष्येभ्यो हन्त' इति ॥ १३ ॥

अतिथीनेवाग्रे भोजयेत् ॥ ६४ ॥

अतिथीन्वक्ष्यति । तानेवाग्रे भोजयेत् । न स्वयं सहसा भुञ्जीत प्रागेव । एवमतिथिव्यतिरिक्तानन्यानपि भोजयितव्यान्पश्चाद्भोजयेत ॥ १४ ॥

कुमारान्रोगसंयुक्तांश्चान्तर्वत्नीः ॥ ६५ ॥

ये च गृहवर्तिनः कुमारादयस्तानप्यग्रे भोजयेत् । आपस्तम्बस्तु—' बालान्वृद्धान्रोगसंयुक्तान्स्त्रीश्चान्तर्वत्नीः' अन्तर्वत्नीग्रहणादेव सिद्धे स्त्रीग्रहणं स्वस्रादीनामपि ग्रहणार्थम् । अन्तर्वत्नीग्रहणं स(र्वत्र) च पूर्वा(जा)र्थम् ॥ १५ ॥

काले स्वामिनावन्नार्थिनं न प्रत्याचक्षीयाताम् ॥ ६६ ॥

काले वैश्वदेवान्तेऽन्नार्थिनमुपस्थितं स्वामिनौ गृहपती न प्रत्याचक्षीयाताम् । अवश्यं किंचित्तस्मै देयमिति ॥ १६ ॥

अभावे किं कर्तव्य(व्यमि)तामित्याह—

अभावे तृणानि भूमिरुदकं कल्याणी वागित्येतानि
वै सतोऽगारे न क्षीयन्ते कदाचनेति ॥ ६७ ॥

वैशब्दः प्रसिद्धौ । अत एव उपचाराः कर्तव्याः । इतिशब्दप्रयोगादेवं धर्मज्ञा उपदिशन्तीति ॥ १७ ॥

एवंवृत्तावनन्तलोकौ भवतः ॥ ६८ ॥

यौ गृहमेधिनावेवं तदेवंवृत्तौ भवतस्तयोरनन्ता लोका भवन्ति । ज्योतिष्टोमादिभ्योऽपि हि कतिपयदिनसाध्येभ्यो दुष्करमेवैतद्व्रतम् ॥ १८ ॥

ब्राह्मणायानधीयानायाऽऽसनमुदकं भोजनमिति
देयं न प्रत्युत्तिष्ठेत् ॥ ६९ ॥

यद्यनधीयानो ब्राह्मणोऽतिथिरागच्छेत्तदा तस्मा आसनादिकं देयम् । प्रत्युत्थानं न कर्तव्यम् । अस्मादेव ज्ञायतेऽधीयानाय प्रत्युत्थेयमिति ॥ १९ ॥

---

१ 'ग्रासप्रमाणा भिक्षा स्यादग्रं ग्रासचतुष्टयम् । अग्रं चतुर्गुणं प्राहुर्हन्तकारं द्विजोत्तमाः' ॥ इति (मार्क० पु० अ० २९ श्लो० ३७) अग्रप्रमाणमुक्तम् ।

अभिवादनायैवोत्तिष्ठेदि(द)त्यभिवाद्यश्चेत् ॥ ७० ॥

। प्रत्युत्थानायोत्तिष्ठेत् । अप्यत्यामिवाद्यश्चेदातिथिस्तर्ह्यमिवादनार्थमेवोत्तिष्ठेत् ॥७०॥

राजन्यवैश्यौ च ॥ ७१ ॥ (ख० २)

अधीयानावपि नोत्तिष्ठेत् । अतिथिपूजा कार्यैव ॥ ७१ ॥ (ख० २) ।

शूद्रमभ्यागतं कर्मणि नियुञ्ज्यादथास्मै [दद्यात्] ॥ ७२ ॥

यदि शूद्रो द्विजानतिथिरभ्यागच्छति तमुदकाहरणादौ कर्मणि नियुञ्जीत । अथे- तस्मिन्कृते तस्मै भोजनं दद्यात् ॥ ७२ ॥

दासा वा स्वामिकुलादाहृत्यातिथिवच्छूद्रं भोज- येयुः ॥ ७३ ॥

अभ्यागते(अथवा येऽस्य) गृहमेधिनो दासास्ते स्वामिकुलादाहृत्य शूद्रमतिथिं भोजयेयुः । अतिथिवद्भोजयेयुरिति । वत्करणं सादरभोजनमात्रं न पूजा कार्येति ॥ ७३ ॥

नित्यमुत्तरं वासः कार्यम् ॥ ७४ ॥

' उपासने गुरूणाम् ' इत्यादिना केषुचित्कालेषु यज्ञोपवीतं विहितम् । इह तु प्रकरणाद्गृहस्थस्य नित्यमुत्तरं वासो धार्यमित्युच्यते । तत्र मनुः—' कार्पासमुपवीतं स्या- द्विप्रस्योर्ध्ववृतं त्रिवृत् ' इति । बौधायनस्तु—कौशसूत्रं वा त्रिवृद्यज्ञोपवीतमिति ॥७४॥

अपि वा सूत्रमेवोपवीतार्थे ॥ ७५ ॥

अपि वा सूत्रमेव सर्वेषामुपवीतार्थ उपवीतकृत्ये भवति । न वाससैवेति नियमः । कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृदित्यादि मनूक्तं द्रष्टव्यम् ॥ ७५ ॥

यत्र भुज्यते तत्समू(मु)ह्य निर्हृत्यावोक्ष्य तं देशम- मत्रेभ्यो लेपान्संकृष्याद्भिः संमृज्य शुचौ देशे रु- द्राय निनयेदेवं वास्तु शिवं भवति ॥ ७६ ॥

यत्र स्थाने भुज्यते तत्समू(मु)ह्य निर्हृत्यावोक्ष्य तं देशममत्रेभ्यो लेपान्संकृष्य समू- ह्न्या तत्रोच्छिष्टादिकं समूहीकृत्य निर्हरेदन्यतः । निर्हृत्य तं देशमवोक्षेत् । ततोऽम- त्रेभ्यो येषु पाकः कृतस्तान्यमत्राणि तेभ्योऽन्नलेपानन्ननलेपांश्च संकृष्य काष्ठादिनाऽ- पकृष्याद्भिः संमृज्योत्तरतः शुचौ देशे रुद्रायेदमस्त्विति निनयेत् । एवं कृते वास्तु शिवं समृद्धं भवति ॥ ७६ ॥

---

१ ' उपसर्गाद्ध्रस्व ऊहतेः ' (पा० सू० ७ । ४ । २३) इत्यनेन ह्रस्वः ।

ब्राह्मण आचार्यः स्मर्यते तु ॥ ७७ ॥

तुशब्दोऽवधारणार्थो भिन्नक्रमश्च । ब्राह्मण एव सर्वेषामाचार्याणां स्मर्यते धर्मशास्त्रेषु । इहापि वक्ष्यति ' स्वकर्म ब्राह्मणस्य ' इति । अनुवादोऽयम् ॥ ७७ ॥

आपदि राजन्यवैश्यावधीयानावपि न प्रत्युत्तिष्ठेद्ब्राह्मण आसनादिकं तु देयमिति कल्पान्तरं वक्तुं तदाह—

आपदि ब्राह्मणेन राजन्ये वैश्ये वाऽध्ययनम् ॥ ७८ ॥

कर्तव्यमित्यध्याहारः । ब्राह्मणस्याध्यापयितुरलाभ आपत् । तत्र ब्राह्मणेन राजन्ये वैश्ये वाऽध्ययनं कर्तव्यं न त्वनधीयानेन स्थातव्यम् । [ब्राह्मणे ने]ति वचनाद्राजन्यवैश्ययोर्नायमनुकल्पः ॥ ७८ ॥

अनुगमनं च पश्चात् ॥ ७९ ॥

पृष्ठतः कर्तव्यं यावदध्ययनम् । पश्चाद्ग्रहणं लज्जादिना कियत्यपि पार्श्वगतिर्मा भूदिति । सर्वशुश्रूषाप्रसक्ते नियमः । ब्राह्मणस्यानुगमनमेव शुश्रूषेति । गौतमः—अनुगमनं शुश्रूषेति ॥ ७९ ॥

अ(त)त ऊर्ध्वं ब्राह्मण एवाग्रगतो स्यात् ॥ ८० ॥

ततोऽध्ययनादूर्ध्वं समाप्तेऽध्ययने ब्राह्मण एवाग्रतो गच्छेत् ॥ ८० ॥

सर्वविद्यानामप्युपनिषदानु(मु)पाकृत्यानध्ययनं तदहः ॥ ८१ ॥

कर्माणि षष्ठी । सर्वविद्या अप्युपनिषद उपाकृत्याध्येतुमारभ्य तदहरनध्ययनम् । तस्मिन्नहन्यध्ययनं न कर्तव्यम् । उपनिषद्ग्रहणं प्राधान्यख्यापनार्थम् । ब्राह्मणा आयाता वासिष्ठोऽप्यायात इतिवत् ॥ ८१ ॥

अधीत्य नाभिक्रमणꣳ सद्यः ॥ ८२ ॥

अधीत्य 'अधीत्य वेदꣳ स्नानम्' इत्यवसर आचार्यसकाशात्सद्योऽभिक्रमणं न कर्तव्यं नापगन्तव्यम् । प्रायेण तु मकारात्परमिकारमधीयते । तत्राप्येष एवार्थः । इकारस्तु च्छान्दसोऽपपाठो वा उपाकरणात्परमिति ॥ ८२ ॥

यदि त्वरेत गुरोः समीक्षायाꣳ स्वाध्यायमधीत्य कामं गच्छेदेवमुभयोः शिवं भवति ॥ ८३ ॥

यदि त्वरा तदाऽऽचार्यस्य समीक्षायां संदर्शने संश्रवे स्वाध्यायं प्रश्नावरमधीत्य यथाकामं गच्छेत् । एवं कृत उभयोः शिष्याचार्ययोः शिवं भवति ॥ ८३ ॥

समावृत्तं चेदाचार्योऽभ्यागच्छेत्तमभिमुखोऽभ्यागम्योपसंगृह्य न बीभत्समान उदकमुपस्पृशेत्सान्त्वयित्वा पूजयेत् ॥ ८४ ॥

समावृत्तं चेच्छिष्यं कृतदारमाचार्योऽभ्यागच्छेदतिथिधर्मेण तमभिमुखोऽभ्यागम्य तमुपसंगृह्य यद्यपि तस्य चाण्डालादिस्पर्शः संभाव्य ते] तथाऽपि न बीभत्समान उदकमुपस्पृशेन्न स्नायात् उपसंग्रहणे यौ धूलिधूसरौ पादौ स्पृष्ट्वा न बीभत्समान उदकमुपस्पृशेत् । सान्त्वयित्वा पूजयेत् । आपस्तम्बे विशेषः—ततस्तं पुरस्कृत्य गृहप्रवेशेऽग्रे कृत्वा पूजासाधनान्युपस्थाप्येति स्पष्टम् ॥ ८४ ॥

यथोपदेशम् ॥ ८५ ॥

गृह्योक्तेन मार्गेण मधुपर्केण पूजयेत् । पूजाविधानं गृह्योक्तस्यानुवादः ॥ ८५ ॥

आसनादिषु विशेषं वक्तुमाह—

आसने भोजने भक्ष्ये शय्यायां वासासि वा संनिहिते हीनतरवृत्तिः स्यात् ॥ ८६ ॥

संनिहित आचार्ये तस्मिन्नेव गृहेऽय(पै)वरकादिकं प्रविष्ट आसनादिषु हीनतरवृत्तिः स्यात् । तन्निर्देशान्नीच आसने गुणतोऽपि निकृष्ट आसीत । एवं भोजनादिष्वपि द्रष्टव्यम् ॥ ८६ ॥

तिष्ठन्सव्येन पाणिना दक्षिणं बाहुमुपसंगृह्याऽऽचार्यमाचामयेत् ॥ ८७॥

तिष्ठन्निति प्रह्व उच्यते । स्थानयोगात् । न हि साक्षात्तिष्ठन्नाचमयितुं प्रभवति । सव्येन पाणिना दक्षिणमालभ्य दक्षिणेन करकादि गृहीत्वाऽऽचार्यमाचामयेत्स्वयमेव शिष्यः । एवं हि सधर्मता भवति । आचार्ये प्रकृते पुनराचार्यग्रहणमातिथ्यादन्यथाप्याचार्यमाचामयते(त्)वमाचामयेदिति ॥ ८७ ॥

अन्यं वा समुदेतम् ॥ ८८ ॥

वाशब्दः समुच्चये । अन्यमप्येवमाचामयेत् । चेत्समुदेतः कुलशीलविद्यावृत्तैरुपेतो भवति ॥ ८८ ॥

स्थानासनचङ्क्रमणस्मितेष्वनुचिकीर्षन् ॥ ८९ ॥

व्यवहितमपि स्यादित्यपेक्षते । चिकीर्षया करणं लक्ष्यते । स्थानासनादिष्वाचार्यस्य पश्चाद्भावी स्यान्न पूर्वभावी न युगपद्भावी ॥ ८९ ॥

---

१ अपव्रियन्ते संभज्यन्ते लोका अत्र, अपवरकोऽन्तर्गृहम् । 'प्रह्ववृद्निवि...' (पा॰ सू॰ ३।३।५८) त्यप् । ततः स्वार्थे कः । 'दीपोऽपवरकस्यान्ते वर्तते तत्प्रभ बहिः' ।

संनिहितोच्चैर्मूत्रपुरीषवातकर्मोर्भाषाहासष्ठीवनदन्तस्कवननिःशृङ्खणभ्रूक्षेपतालनिष्ट्यानीति ॥ ९० ॥

वातकर्मापानवायोरुत्सर्गः । उच्चैर्भाषा महता स्था(स्व)नेन संभाषणं केनापि । हासो हसनम् । ष्ठीवनं श्लेष्मादिनिरसनम् । दन्तस्कवनं दन्तमलापकर्षणम् । परस्परं घट्टनमित्यन्ये । निःशृङ्खणं स्वनासिकामलनिःसारणम् । भ्रूक्षेपणं भ्रु(भ्रू)विक्षेपः । तालं हस्तयोरास्फालनम् । निष्ट्यमङ्गुलिस्फोटन(नम्) । इतिशब्दादन्यदपि स्वैरासनादिकं वर्जयेदित्यपेक्षते । एतानि मूत्रकर्मादीन्याचार्यस्य संनिधौ न कुर्यादिति ॥ ९० ॥

दारे प्रजायां चोपस्पर्शनभाषविस्रम्भपूर्वाः परिवर्जयेत् ॥९१॥

उपस्पर्शनमालिङ्गनाघ्राणादि । भाषाः संभाषा वादप्रभृतयः । एता अप्याचार्ये संनिहिते दारे पू(प्र)जाविषयो(ये)ऽपि विस्रम्भं न कुर्यात् । ज्वरादिपरीक्षायां न दोषः॥९१॥

वाक्येन वाक्यस्य प्रतीघातमाचार्यस्य वर्जयेत् ॥ ९२ ॥

समीचीनस्येतरस्य वाऽऽत्मीयेन वाक्येन तादृशेन प्रतीघातं न कुर्यात् ॥ ९२ ॥

श्रेयसां च ॥ ९३ ॥

अन्येषामपि प्रशस्ततराणां [वाक्यं]वाक्येन न प्रतिहन्यात् ॥ ९३ ॥

ब्राह्मणदेवतासर्वभूतपरीवादाक्रोशांश्च वर्जयेत् ॥ ९४ ॥

ब्राह्मणदेवताग्रहणमादरार्थम् । अधिकदोषख्यापनाय सर्वेषामेव भूतानामपि तिरश्चां परीवादान् दोषवादानाक्रोशानशी(श्ली)लवादांश्च वर्जयेत् । परीवादस्य पुनःपुनर्वचनमतिशयेन वर्जनार्थम् ॥ ९४ ॥

विद्यया च विद्यानाम् ॥ ९५ ॥

परीवादाक्रोशांश्च वर्जयेत् । ऋग्वेद एव श्रोत्रसुखः । अन्ये श्रवणकटुका इति परीवादः । तैत्तिरीयकमुच्छिष्टशाखा । याज्ञवल्क्यादीनि ब्राह्मणानीदानींतनानीत्यादय आक्रोशाः ॥ ९५ ॥

यया विद्यया न विरोचेत पुनराचार्यं गत्वा नियमेन साधयेत् ॥ ९६ ॥

यया विद्ययाऽधीतया श्रुतया वा न विरोचेत न यशस्वी स्यात्तामित्यर्थाद्गम्यते तां विद्यां पुनः साधयेत् । यथा सम्यक् सिद्धो(द्धा) भवति तथा कुर्यात् । कथम् । आचार्यं तमेवान्यं वा गत्वाऽपूर्वाधिको[गमे] विद्यार्थस्य यो नियम उक्तस्तेन शुश्रूषादिना पुनस्तां विद्यां साधयेत् ॥ ९६ ॥

न चास्य समीपे जप्याग्निपरिसृजने कुर्यात् ॥ ९७ ॥

अस्याऽऽचार्यस्य संनिधौ जप्यमग्निकार्यादिकमग्निशुश्रूषां न कुर्यात् । परिमृजनशब्देन परिचर्या लक्ष्यते ॥ ९७ ॥

अस्मिन्विषयेऽध्यापयितुर्नियममाह—

उपाकरणाद्योत्सर्जनादध्यापयितुर्नियमो न नखलोमापाकरणं श्राद्धं माऽंसं मैथुनमिति वर्जयेत् ॥ ९८ ॥

लोमोपाकरणं लोमवापनम् । इदमनाहिताग्निविषयम् । आहिताग्नेस्तु 'अप्यल्पलोमानि वापयेत' इति वाजसनेयकमित्यापस्तम्बोक्तेः ॥ ९८ ॥

ऋ[1]त्वे वा जायाम् ॥ ९९ ॥

ऋतुकाले वा जायामुपेयात् । छान्दसत्वाद्यलोप ऋत्व इति रूपसिद्धिः ॥ ९९ ॥

यथागमं शिष्येभ्यो विद्यासंप्रदाने वर्तमाने नियमेषु च युक्तः स्यात्तथा गृहमेध एवं वर्तमानः पूर्वापरान्संबन्धानात्मानं च क्षेमे युनक्ति ॥ १०० ॥

पूर्वोक्तप्रकारेण शास्त्रान्तरप्रकारेण च नियमे वर्तमाने सति नियमान् कुर्यात् । तद्वदेव गृहस्थाश्रमे नियमान्कुर्यात् । एवं युक्तो वर्तमानः पूर्वापरान्पूर्वांश्च पितृपितामहप्रपितामहानपरांश्च पुत्रपौत्रप्रपौत्रान्संबन्धान्संबन्धिनः पुरुषानात्मानं च क्षेमेऽभयस्थाने नाकस्य पृष्ठे युनक्ति स्थापयति ॥ १०० ॥

मनसा वाचा प्राणेन चक्षुस्त्वक्शिश्नोदरालं(र)म्भणान्यास्रावान्परिमृजानोऽमृतत्वाय कल्पते ॥ ॥ १०१ ॥ (ख० ३) ।

यैः पुरुष(ष)आस्राव्यते बहिराकृष्यते त आस्रावाः शब्दादयो विषयाः । तान्मनसा वाचा वागिन्द्रियेण प्राणेन प्रयत्नेन परिमृजानः परिहरन्नसंपादयन्मोक्षाय कल्पते । विषयानासक्तस्यैवान्तःकरणैकाग्र्येण ज्ञानलाभान्मुक्तिरित्यर्थः । तेषां विषयाणां बहिःसारणहेतुमाह चक्षुरित्यादिना—चक्षुषि त्वचि शिश्न उदरे चाऽऽत्मत्वमारोप्य तदर्थ-

---

१ अत्र ऋतुशब्दाद्भवार्थे 'भवे छन्दसि (पा० सू० ४ । ४ । ११०) ।' इत्यनेन यप्रत्यये 'ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानि च्छन्दसि (पा० सू० ६ । ४ । १७५)' इति सूत्रेण ऋत्व्यमिति प्राप्तं परं यकारलोपश्छान्दस इत्यर्थः ।

तयाऽऽरभ्यन्ते । ततस्तानि चक्षुरादीन्यारम्भणानि प्रापकानि(णि) येषां तान् । शारीरशिश्नोदरार्था न(हि)विषयाकाङ्क्षा । नाऽऽत्मार्थम् । तस्याऽऽत्मनः प्राप्तये तत्त्यागः कार्य इत्यर्थः ॥ १०१ ॥ (ख० ३) ।

येन कृतावसथः स्यादतिथिर्न तं प्रत्युत्तिष्ठेदनु (नू)त्तिष्ठेद्वा पुरस्तादभिवादितः ॥ १०२ ॥

येन गृहस्थेनातिथिः कृतावसथः स्यात्कृतावासो दत्तावासः स्यात्सोऽतिथिस्तस्मिन्नहनि तं गृहस्थं न प्रत्युत्तिष्ठेन्न प्रतिगच्छेन्नाप्यनूत्तिष्ठेत । तमनुलक्षीकृत्य न तिष्ठेत् । द्वितीययाऽन्तारिक्ष्यानिति वचनाद्यद्द्वितीयादिद्व्य(त्र्य)हःसु च तं (न)प्रत्युत्तिष्ठेन्नाप्यासनात् । योऽतिथिस्तस्मिन्नहनि पूर्वमेवाभिवादितः । अ[न]भिवादिते तु प्रत्यभिवादनाय प्रत्युत्तिष्ठेदनूत्तिष्ठेच्च ॥ १०२ ॥

शेषभोज्यतिथीनाꣳ स्यात् ॥ १०३ ॥

अतिथीनेवाग्रे भोजयेदित्येव सिद्धे वचनमिदं प्रमादाद्यदन्नं न दत्तमतिथये तन्न भुञ्जीतेत्येवमर्थम् ॥ १०३ ॥

न रसान्गृहे भुञ्जीतानवशेष्य(ष)मतिथिभ्यः ॥१०४॥

आगामिभ्योऽतिथिभ्यो यथा न किंचिद्गृहेऽवशिष्यते तथा गव्यादयो रसा न भोज्याः । सद्यः संपादयितुमशक्यत्वात् ॥ १०४ ॥

नाऽऽत्मार्थमभिरूपमन्नं पाचयेत् ॥ १०५ ॥

आत्मार्थमुद्दिश्याभिरूपमन्नमपूपादि न पाचयेत् ॥ १०५ ॥

विशेषेणापुमान् ॥ १०६ ॥

गृहस्थपुरुषादन्यो न सर्वथा पाचयेत् ॥ १०६ ॥

गोमधुपर्कार्हो वेदाध्यायः समुदेतः ॥ १०७ ॥

साङ्गवेदस्याध्येता वेदाध्यायः । समुदेतः कुलशीलसंपन्नः । स मधुपर्कमर्हति । गां च दक्षिणाम् ॥ १०७ ॥

आचार्य ऋत्विक् स्नातकः श्वशुरो राजा वा धर्मयुक्तः ॥ १०८ ॥

अवेदाध्याय(या) अप्याचार्यादयो मधुपर्कार्हाः । अत एव ज्ञायत ,एकदेशाध्यायिनावप्यृत्विगाचार्यौ भवत इति । धर्मयुक्त इति राज्ञो विशेषणम् । वाशब्दः समुच्चये ॥ १०८ ॥

आचार्यायर्त्विजे स्नातकाय राज्ञ इति परिसंवत्स-
रादुपतिष्ठद्भ्यो गौर्मधुपर्कश्च ॥ १०९ ॥

आचार्यादिभ्यः कृतमधुपर्केभ्यः संवत्सरादूर्ध्वमागतेभ्यो मधुपर्को गौर्दक्षिणा च । पूर्वमागतेभ्यो न तत्र गौर्दक्षिणा विधीयते ॥ १०९ ॥

कोऽसौ मधुपर्क इत्याह—

दधिमधुसꣳसृष्टं मधुपर्कः पयो वा मधुसꣳ-
सृष्टम् ॥ ११० ॥

गृह्योक्तयोस्त्रिवृत्पाङ्क्तयोरभावेऽत्रापूर्वयोर्विधानम् ॥ ११० ॥

अभाव उदकम् ॥ १११ ॥

दधिपयसोरभाव उदकमपि देयम् । मधुसंसृष्टमित्येके । नेत्यन्ये । पूर्वत्र पुनर्मधुसंसृष्टग्रहणात् ॥ १११ ॥

वेदाध्याय इत्यत्र विवक्षितं वेदमाह—

षडङ्गो वेदः ॥ ११२ ॥

षड्भिरङ्गैर्युक्तो वेदोऽत्र गृह्यते ॥ ११२ ॥

कानि तान्यङ्गानीत्याह—

छन्दःकल्पो व्याकरणं ज्योतिषं निरुक्तं शीक्षा
छन्दोविचितिरिति ॥ ११३ ॥

छन्दो वेदस्तं कल्पयती(ति) प्रतिशाखं शाखान्तराधीतेन न्यायप्राप्तेन स्वाङ्गकलापेनोपेतस्य कर्मणः प्रयोगकल्पनयोपस्कुरुत इति च्छन्दःकल्पः सूत्राणि । व्याकरणं, अर्थविशेषमाश्रित्य पदमन्वाचक्षाणानां पदपदार्थप्रतिपादनेन वेदस्योपकारकं विद्यास्थानम् । सूर्यादिज्योतींष्यधिकृत्य प्रवृत्तं शास्त्रं ज्योतिषम् । आदिवृद्ध्यभावे यत्नः कर्तव्यः । तदप्यध्ययनोपयोगिनमनुष्ठानोपयोगिनं च कालविशेषं प्रतिपादयदुपकारकम् । निरुक्तमपि व्याकरणस्यैव कात्स्न्र्यम् । शीक्षा वर्णानां स्थानप्रयत्नादिकमध्ययनकाले कर्मणि च मन्त्राणामुच्चारणप्रकारं च दर्शयति । पृषोदरादित्वादादेर्दीर्घः । गायत्र्यादीनि च्छन्दांसि यया विचीयन्ते विचित्य ज्ञायन्ते सा छन्दोविचितिरिति । एतान्यङ्गान्यङ्गसंस्तवादङ्गत्वम् ।

---

१ संज्ञापूर्वकशास्त्रस्यानित्यत्वादत्र वृद्ध्यभावोऽभ्युपगन्तव्यः ।

' मुखं व्याकरणं तस्य ज्योतिषं नेत्रमुच्यते ।
निरुक्तं श्रोत्रमुद्दिष्टं छन्दसां विचितिः पदे ॥
शीक्षा घ्राणं तु वेदस्य हस्तौ कल्पान्प्रचक्षते ' ॥ इति ।

उपकारकत्वाच्च, उक्त उ[प]कारः ॥ ११३ ॥

अत्र चोदयति—

शब्दार्थारम्भणानां तु कर्मणा॰ समाम्नायसमाप्तौ वेदशब्दस्तत्र संख्या विप्रतिषिद्धा ॥ ११४ ॥

शब्दार्थतया यान्यारभ्यन्ते न प्रत्यक्षादिप्रमाणगोचरतया तानि शब्दार्थारम्भणानि कर्माणि वैदिकान्यग्निहोत्रादीनि । तेषां समाम्नाय उपदेशः । तस्य समाप्तौ स यावता ग्रन्थजातेन समाप्तोऽनुष्ठानपर्यन्तो भवति । तत्र वेदशब्दो वर्तते । वेदयति धर्मं विन्दन्त्यनेनेति वा धर्ममिति । न च ब्राह्मणमात्रेणानुष्ठानपर्यन्त उपदेशो भवति । किं तु कल्पसूत्रैरपि सह । ततश्च तेषामपि वेदस्वरूप एवानुप्रवेशात्पञ्चैवाङ्गानि ॥ ११४ ॥

अत्र षट्संख्या विप्रतिषिद्धेति परिहरति—

अङ्गानां च प्रधानैरव्यपदेश इति न्यायवित्समयः ॥ ११५ ॥

अङ्गान्येव कल्पसूत्राणि न वेदरूपाणि। पौरुषेयत्वस्मरणात् । कतिपयान्येव हि तेषु ब्राह्मणवाक्यानि। भूयिष्ठानि स्ववाक्यानि। अङ्गानां च तेषां प्रधानवाचिभिः शब्दैश्छन्दो वेदो ब्राह्मणमित्यादिभिर्व्यपदेशो न न्यायवित्सिद्धान्तः । ताविमौ पूर्वपक्षसिद्धान्तौ कल्पसूत्राधिकरणे स्पष्टं द्रष्टव्यौ यत्तूक्तं न मन्त्रब्राह्मणमात्रेण पूर्वे(र्ण) उपदेश इति। नैष स्थाणोरपराधो यदेनमधो(न्धो) न पश्यति। पुरुषापराधः स भवति । अङ्गं तु(ङ्गत्वं) भवानाचष्ट कल्पसूत्राणामियं प्रयोगकल्पना कृतस्येति न्यायोपबृंहिताभ्यां मन्त्रब्राह्मणाभ्यामिति वक्तव्यम् । नान्या गतिः । एवं सति भवानपि यततां तादृश्य(शः) स्यामिति । ततो मन्त्रब्राह्मणाभ्यामेव पूर्णमे(म)वमो(मो)त्स्यत इति ॥ ११५ ॥

अतिथिं निराकृत्य यत्रगते भोजने स्मरेत्ततो विरम्योपोष्य श्वोभूते यथामनसं तर्पयित्वा स॰ साधयेत् ॥ ११६ ॥

अतिथिमागतं केनचित्कारणेन निराकृत्य भोजने प्रवृत्तो यत्रगते यदवस्थाप्राप्तभोजनेऽविद्यया योऽसौ निराकृत इति तत्रैव भोजनाद्विरम्य तस्मिन्नहन्युपोष्य परेद्युस्तमन्विष्य यथामनसं यथेच्छं तर्पयित्वा संसाधयेत् ॥ ११६ ॥

आ कुत इत्याह—

यानवन्तमा यानात् ॥ ११७ ॥

स चेदतिथिर्यानवान्भवति न(तं) प्राकृतस्याऽऽरोहणादनुव्रजेत् ॥ ११७ ॥

यावन्नानुजानीयादितरः ॥ ११८ ॥

इतरो यानरहितः स यावन्नानुजानीयाद्गच्छति तावदनुव्रजेत् ॥ ११८ ॥

अप्रतीहा(भा)यां सीम्नो निवर्तेत ॥ ११९ ॥

यदि तस्यान्यपरि(र)तयाऽनुज्ञायामप्रतीहा(भा)बुद्धिर्न जायते ततः सीम्नि प्राप्तायां ततो निवर्तेत । प्रतेर्दीर्घश्छान्दसः । संसाधयेदित्यादि सर्वातिथिसाधारणं तं(न) निराकृतविषयमात्रम् ॥ ११९ ॥

सर्वान्वैश्वदेवे भागिनः कुर्वीताऽऽश्वचाण्डालेभ्यः ॥ १२० ॥

वैश्वदेवान्ते भोजनार्थमुपस्थितान्सर्वानेव भागिनः कुर्वीताऽऽश्वचाण्डालेभ्यः । अभिविधावाङ् । तेभ्यः किंचिद्देयम् । तथा च मनुः—

'शुनां च पतितानां च श्वपचां पापरोगिणाम् ।
वायसानां कृमीणां च शनकैर्निक्षिपेद्भुवि ॥ इति ॥ १२० ॥

नानर्हद्भ्यो ददातीत्येके ॥ १२१ ॥

अनर्हद्भ्यश्चण्डालादिभ्यो न दद्यादित्येके मन्यन्ते । तत्र दानेऽभ्युदयः । अदानेऽप्रत्यवायः ॥ १२१ ॥

उपेतः स्त्रीणामनुपेतस्य चोच्छिष्टं वर्जयेत् ॥ १२२ ॥

उपेतः कृतोपनयनः (नोऽ)समावृत्तः । स्त्रीणामनुपनीतस्य चोच्छिष्टं न भुञ्जीत । एवं सति समावृत्तस्य चोच्छिष्टं भुञ्जानस्य न दोषः स्यात् । एवं तर्ह्युपेत आऽन्तात्कृतदारश्च स्त्रीणामनुपेतस्य चोच्छिष्टं वर्जयेत् । एवमप्युपेतस्य कस्यचिदपि यदुच्छिष्टं तद्भोजने न दोषः स्यात् । पितुर्ज्येष्ठस्य चोच्छिष्टं भोक्तव्यमित्येतन्नियमार्थं भविष्यति पितुरेवेति भ्रातुरेवेति । यद्येवं सूत्रमेवेदमनर्थकं तस्मादेव नियमादन्यत्राप्रसङ्गः । इदं तर्ह्य(र्हि) प्रयोजनम् । यथा पिताऽनुपेतः पुत्रस्तु प्रायश्चित्तं कृत्वा कृतोपनयनस्तदा संप्रति पितुरनुपेतस्य चोच्छिष्टं प्रतिषिध्यते । एवं ज्येष्ठेऽपि द्रष्टव्यम् । एतदपि नास्ति प्रयोजनम् । उक्तं हि—'धर्मविप्रतिपत्तावभोज्यम्' इति । 'तेषामभ्यागमनं भोजनं विद्या(वा)हमिति वर्जयेत्' इति । तथा स्त्रीणामित्येतत्तु मातुरुच्छिष्टस्य प्रतिषेधार्थम् । कथं प्रसङ्गः—'मातरि पितर्याचार्यवच्छ(च्छु)श्रूषा' इति वचनात् । 'यदुच्छिष्टं प्राश्नाति हविरुच्छिष्टमेव तत्' इत्याचार्योच्छिष्टस्य हविष्ट्वेन संस्तवाच्च । एवमपि 'पितुर्ज्येष्ठस्य

च' इत्यत्र पितृग्रहणादेव सिद्धम् । तस्मात्केषुचिज्जनपदेषु भार्यया सह भोजनमाचरन्ति तस्य दुराचारत्वमनेन प्रतिप(पा)द्यते ॥ १२२ ॥

सर्वाण्युदकपूर्वाणि दानानि ॥ १२३ ॥

सर्वाणीति वचनाद्भिक्षाऽप्युदकपूर्वैव देया ॥ १२३ ॥

यथाश्रुति विहारे च ॥ १२४ ॥

एव चार्थः । विहारे यज्ञकर्मणि यानि दानानि दक्षिणादीनि तानि यथाश्रुत्येव नोदकपूर्वाणि ॥ १२४ ॥

ये च भृत्या नित्यास्तेषामनुपरोधेन संविभागो विहितः ॥ १२५ ॥

ये नित्या नियता भृत्या दासकर्मका(कै)रादयस्तेषामुपरोधो न यथा भवति तथा वैश्वदेवान्त आगतेभ्यः संविभागः कर्तव्यः ॥ १२५ ॥

काममात्मानं भार्यां पुत्रं वोपरुन्ध्यान्नत्वेव दासं कर्मकार(क)रम् ॥ १२६ ॥

दासो भूत्वा यः कर्म करोति स दासकर्मका(क)रः । तमात्माद्युपरोधेनापि नोपरुन्ध्यात् । किं पुनरागता(मा)र्थे तम(मु)परुन्ध्यादिति ॥ १२६ ॥

तथा चाऽऽत्मन उपरोधं कुर्वीत यथा कर्मसु समर्थः स्यात् ॥ १२७ ॥

कर्मस्वग्निहोत्रादिष्वार्जनेषु च यथा स्वयं समर्थो भवति तथाऽऽत्मानमुपरुन्ध्यात्कुटुम्बी ॥ १२७ ॥

अथाप्युदाहरन्ति—अष्टौ ग्रासा मुनेर्भक्ष्याः षोडशारण्यवासिनः ।
द्वात्रिंशतं गृहस्थस्यापरिमितं ब्रह्मचारिणः ॥
आहिताग्निरनड्वांश्च ब्रह्मचारी च ते त्रयः ।
अश्नन्त एव सिध्यन्ति नैषां सिद्धिरनश्नताम् ॥

इति ॥ १२८ ॥ (ख० ४) ॥

इति सत्याषाढहिरण्यकेशिश्रौतसूत्रे(१ र्मसूत्रापरपर्याये)
सप्तविंशप्रश्ने प्रथमः पटलः ॥ १ ॥

---

१ 'कर्मणि भृतौ' (पा० सू० पा० ३।२।२२) इति करोतेष्टः । 'भृतको भृतिभुक्कर्मकरो-वैतानिकोऽपि सः' इत्यमरः ।

अथैतस्मिन्नात्मानं नोपरुन्ध्यादिति विषये श्लोकावुदाहरन्ति । मुनेः सन्यासिनो भक्ष्या अष्टौ ग्रासाः । अ(आ)स्याविकारेण । अरण्यवासी वानप्रस्थः । तस्य षोडश । द्वात्रिंशतं द्वात्रिंशत्प्रथमार्थे द्वितीया । गृहस्थस्य ग्रासा द्वात्रिंशत् । ब्रह्मचारिणो विद्यार्थस्य नैष्ठिकस्य च ग्रासनियमो नास्ति । द्वितीयेन श्लोकेन कालयोर्भोजनमित्ययमपि नियमो नास्तीति पठ्यते । अनडुद्ग्रहणं दृष्टान्तार्थः(र्थम्) । सिध्यति(न्ति) स्वकार्यक्षमा भवन्ति ॥ १२८ ॥ (ख० ४) ॥

इति सत्याषाढहिरण्यकेशिधर्मसूत्रव्याख्यायां महादेवदीक्षितविरचितायामुज्ज्वलायां वृत्तौ सप्तविंशप्रश्ने प्रथमः पटलः ॥ १ ॥

अथ द्वितीयः पटलः ।

जात्याचारसंशये धर्मार्थमागतमग्निमुपसमाधाय जातिमाचारं च पृच्छेत् ॥ १ ॥

अविज्ञातपूर्वो यो धर्मार्थमध्ययनार्थमागच्छेदुपासन्नोऽस्मि भगवन्मैत्रेण चक्षुषा पश्य शिवेन मनसा मे गृहाण प्रसीद मामध्यापयेति तज्जात्याचारसंशये सत्यग्निमुपसमाधाय यत्र क्वचाग्निमुपसमाधास्यन्त्स्यादन्यदुपनिदध्यादित्यन्तं कृत्वा गृह्योक्तं न्युप्योपसमादधातीत्यन्तं च कृत्वा तत्संनिधौ जातिमाचारं च पृच्छेत्—किंगोत्रोऽसि सोम्य कमाचारं चरसीति ॥ १ ॥

साधुतां चेत्प्रतिजानीतेऽग्निरुपद्रष्टा वायुरुपश्रोताऽऽदित्योऽनुख्याता साधुतां प्रतिजानीते साधवस्मा अस्तु वितथ एष एनस इत्युक्त्वा शास्तुं प्रतिपद्येत ॥ २ ॥

एतस्मात्केवलमनधीतवेद इति ततोऽग्निरुपद्रष्टेत्यादि कर्मान्तमुक्त्वा शास्तुं शासितुमध्यापयितुं धर्मा(र्मा)श्चोपदेष्टुं प्रतिपद्येतोपक्रमेत ॥ २ ॥

अग्निरिव ज्वलन्नतिथिरभ्यागच्छति ॥ ३ ॥

पञ्चयज्ञान्तेऽतिथीनेवाग्रे भोजयेदित्युक्तम् । तत्सप्रकारं वक्तुं तस्यावश्यं(श्य)कर्तव्यतामनेनाऽऽह—अतिथिर्गृहानभ्यागच्छत्, अ(न्न)ग्निरिव ज्वलन्नतिथिरभ्यागच्छति । तस्मादसौ भोजनादिभिरवश्यं तर्पयितव्यः । निराशस्तु गच्छन्गृहं दहेदिति ॥ ३ ॥

इदानीमतिथिलक्षणं वक्तुं तदुपयोगि श्रोत्रियलक्षणमाह

धर्मेण वेदानामेकाः शाखामधीत्य श्रोत्रियो भवति ॥ ४ ॥

विद्यार्थस्य यो नियमः स धर्मः । तेन वेदानां यां कांचन शाखामधीत्य श्रोत्रि
भवति । पुरुषस्य हि प्रतिवेदमेका शाखा भवति । याः (या) पूर्वैः परिगृहीताऽध्यय
नुष्ठानाभ्यां सा प्रतिवेदं स्वशाखा । तामधीत्य श्रोत्रियो भवतीति ननु(तु) प्रतिवे
कैक(का)मधीत्य श्रोत्रिय इति । लोकविरोधात् । लोके हि यां कांचनैकामधीय
श्रोत्रिय इति प्रसिद्धः ॥ ४ ॥

अतिथिलक्षणमाह—

स्वधर्मयुक्तं कुटुम्बिनमभ्यागच्छन्धर्मपुरस्कारो नान्नप्रयोजनः सोऽतिथिर्भवति ॥ ५ ॥

आदितो यच्छब्दो द्रष्टव्यः । अन्ते स इति दर्शनात् । मध्ये श्रोत्रियलक्षणोपदे
त्तदुपजीवनेन सूत्रं योज्यम् । यः श्रोत्रियः स्वधर्मयुक्तः स्वधर्मनिरतं कुटुम्बिनं भार्य
सह वसन्तम् । गृहस्थाश्रमान्तरनिरासार्थमिदमुक्तम् । न हि ते पच्य(च)माना भवन्
भिक्षवो हि ते । अभ्यागच्छन्नुद्दिश्याऽऽगच्छन्धर्मपुरस्क(स्का)रः । आचार्यस्या(याद्य
भिक्षणं धर्मः । तत्पुरस्कारः । कर्मण्यण् । धर्मप्रयोजनो नान्नप्रयोजनः । य एवंभू
सोऽतिथिर्भवतीति ॥ ५ ॥

तस्य पूजायां शान्तिः स्वर्गश्च ॥ ६ ॥

तस्यातिथेः पूजायां कृतायां शान्तिरुपद्रवाणामभाव इति । मर्त्ये(प्रेत्य)
स्वर्गभावः ॥ ६ ॥

तमभिमुखोऽभ्यागम्य यथावयः समेत्योपस्थाप्याथ तमाहारयेत् ॥ ७ ॥

तमतिथिमभिमुखोऽभ्यागच्छेत् । अभ्यागम्य यथा वयसोऽनुरूपं समेत्य प्रत्युत्थान
मिवादना[दिना] समेयात्सह गच्छेत् । समेत्य च शिष्यान्वोपस्थाप्य तं प्रति तस्मिन्
गते तस्याऽऽसनमाहारयेच्छिष्यादिभिः । अभावे स्वयमेवाऽऽहरेत् ॥ ७ ॥

न बहुपादमासनं भवतीत्येके ॥ ८ ॥

शक्तौ सत्यां बहुपादमासनं न देयम् । बहुपादमेव पीठादिकं न देयं मन्यन्ते स्व
बहुपादं मन्यते ॥ ८ ॥

अथास्य पादौ प्रक्षालयेच्छूद्रमिथुनावित्येके ॥ ९ ॥

अथ गृह्योक्तविधेरनन्तरमस्य पादौ स्वयं प्रक्षालयेत् । शूद्रा(द्रौ) प्रक्षालये
त्येके मन्यन्ते । दासवत इदमुक्तम् ॥ ९ ॥

अत्र विशेषः—

अन्यतरोऽभिषेचने स्यात् ॥ १० ॥

अभिषेचनं करकादिना जलावसेकः । तमेकः कुर्यादितरः प्रक्षालनम् ॥ १० ॥

अथास्योदकमाहारयेन्मृन्मयेनेत्येके ॥ ११ ॥

मृन्मयेन पात्रेण तस्योदकमाहर्तव्यमित्येके मन्यन्ते । स्वमतं तु तैजसेन ॥ ११ ॥

नोदकमाहारयेदसमावृत्तः ॥ १२ ॥

असमावृत्तो ब्रह्मच(चा)र्याचार्यप्रेषितः । स्वयमेव वाऽतिथिरागच्छति तदा नासावुद-माहारयेत् । नासावुदकाहरणस्य प्रयोजके(कोऽ)स्मा उदकमाहर्तव्यमिति ॥ १२ ॥

अध्ययनसांवृत्तिश्चात्राधिका ॥ १३ ॥

अत्रासमावृत्तेऽतिथावध्ययनसंवृत्तिश्चाधिका तस्मादतिथेः । अध्ययनस्य सह नि-पादनमध्ययनसंवृत्तिः । यः प्रदेशस्तस्याऽऽगच्छति स तेन सह कियन्तंचित्कालं वर्तव्य इति । प्रसिद्धे तु पाठे पूर्वपादान्तस्य समोऽकारस्य च्छान्दसो दीर्घः ॥ १३ ॥

प्रसङ्गादाह—

नास्तमित आदित्य उदकानयनं विद्यते ॥ १४ ॥

नद्यादिभ्योऽहोरात्रपर्याप्तमुदकं दिवैव संभरणीयमित्यर्थात्सिध्यति ॥ १४ ॥

सान्त्वयित्वा भोजयेच्छक्तिविषयेणाद्भिरवरार्ध्येन ॥ १५ ॥

ततः पादप्रक्षालनस्य समध्ययनस्य वाऽनन्तरमतिथिं प्रियवचनेन सान्त्वयेत् । सान्त्वयित्वा गव्यादिभी रसैः फलादिभिश्च भक्ष्यैस्तस्याशक्तावन्ततोऽद्भिरपि तावद्भो-जयेत्तृप्तिं कुर्यात् । अवरार्ध्येनेति जघन्यकल्पना(नां) सूचयति । अप्यन्तत इत्यर्थः ॥ १५ ॥

आवसथं दद्यादुपरिशय्यामास्तरणोपधानं सावस्तरण-मभ्यञ्जनं च ॥ १६ ॥

आवसथो विश्रमस्थानम् । उपरिशय्या खट्वा । आस्तरणं तूलिका । उपधामुपबर्ह-णम् । अवस्तरणमुपपटः । तत्सहितमुपधानमास्तरणं च । अभ्यञ्जनं पादयोस्तैलं घृतं वा । एतत्सर्वं दद्यात् । भोजनात्पूर्वमूर्ध्वं वाऽपेक्षिते काले ॥ १६ ॥

अन्नसंस्कर्तारमाहूय व्रीहीन् यवान्वा तदर्थान्नि-र्वपेत् ॥ १७ ॥

यः पचति तमन्नसंस्कर्तारमाहूय तदर्थानतिथ्यर्थान्व्रीहीन्यवान्वा निर्वपेत्पृथग्दद्या-दमुष्मै पचेति । व्रीहियवग्रहणमुपलक्षणम् । इदं भुक्तवत्सु सर्वेष्वतिथावुपस्थिते द्रष्ट-व्यम् ॥ १७ ॥

भोजनकाले त्या(त्वा)ह—

उद्धृतान्यन्नान्यवेक्षेतेदं भूया(यः३) इदं भूया(यः३)
इति ॥ १८ ॥

यावन्तो भोक्तारस्तावन्त्यन्नान्युद्धृत्य पृथक्पात्रेषु कुर्यात् । स्वयं संविभागं कृत्वा तान्यन्नान्यवेक्षेत किमिदं प्रभूतमिदं वेति । विचारे प्लुतः । पूर्वं तु भाषायामिति ॥ १८ ॥

भूय उद्धरेत्येव ब्रूयात् ॥ १९ ॥

पूर्वोक्तप्रकारेणाऽऽतिथ्यमवेक्ष्य भूयः सुष्ठुत उद्धरेत्येव ब्रूयात् ॥ १९ ॥

द्विषन्द्विषतो वा नान्नमद्याद्दोषेण वा मीमांꣳसमा-
नस्य मीमाꣳसितस्य वा ॥ २० ॥

यः स्वयमतिथिं द्विषन्भवति यो वाऽऽत्मानं द्वेष्टि यो वाऽऽत्मानं दोषेण मीमांसमान आत्मनि दोषं संभावयति यो वा दोषेण मीमांसितो यत्र लौकिको दोषं संभावयति तस्य सर्वस्यान्नं नाश्नीयात् ॥ २० ॥

अत्र हेतुः—

पाप्मानꣳ हि स तस्य भक्षयतीति ब्राह्मणम् ॥ २१ ॥ (ख० ५) ।

[य]एवंविधस्यान्नमश्नाति स तस्य पाप्मानमेव भक्षयतीति श्रुतिः ॥ २१ ॥ (ख० ५) ।

स एष प्राजापत्यः कुटुम्बिनो यज्ञो नित्यं प्रततः ॥ २२ ॥

स एष भक्षितो मनुष्ययज्ञः प्राजापत्यः प्रजापतिना दृष्टस्तद्दैवत्यो वा । कुटुम्बिनो नित्यं प्रततो यज्ञो नाग्निष्टोमादिवत्कादाचित्कः ॥ २२ ॥

तस्याग्नीनापादयति—

योऽतिथीनामग्निः स आहवनीयो यः कुटुम्बे स
गार्हपत्यो यस्मिन्पच्यते सोऽन्वाहार्यपचनः ॥ २३ ॥

योऽतिथीनां जाठराग्निः स आहवनीयः । तद्धि (तत्र हि) हूयते । यः कुटुम्बे गृहेऽग्निरौपासनः स गार्हपत्यः । नित्यधार्यत्वात् । यस्मिन्पच्यत एवाग्नौ सोऽन्वाहार्यपचनः दक्षिणाग्निः । तत्रान्वाहार्यः पच्यते ॥ २३ ॥

ऊर्जं पुष्टिं प्रजां पशूनिष्टापूर्तमिति गृहाणामश्नाति
यः पूर्वोऽतिथेरश्नाति ॥ २४ ॥

योऽतिथेः पूर्वमश्नाति स गृहाणां कुलस्य संबन्ध्यूर्जादिकमश्नाति भक्षयति विनाशयति । ऊर्गन्नम् । इष्टमग्निहोत्रादि । पूर्तं स्मार्तकर्म तथा कूपखननादि । अन्ये प्रसिद्धाः ॥ २४ ॥

(१ पा० सू० ८ । २ । ९८) ।

पयसोपसिक्तमन्नमग्निष्टोमसंमितं मधुनाऽतिरात्रसं-
मितं मांसेन द्वादशाहसंमितमुदकेन प्रजावृद्धिरा-
युषश्च ॥ २५ ॥

पयसोपासिक्तं यदन्नमग्निष्टोमसमं तुल्यम् । सर्पिषोपसिक्तमन्नमिति प्रकृतमनुवर्तते । मांसेन सह दत्तमुदकेन प्रजावृद्धिर्भवति । आयुषश्च । समस्तमपि वृद्धिरिति संब-ध्यते ॥ २५ ॥

प्रिया अप्रियाश्चातिथयः स्वर्गं लोकं गमयन्तीति ॥ २६ ॥

अप्रिया उदासीनाः । अद्विषन्तो(द्विषतो) निषिद्धत्वात् ॥ २६ ॥

यत्प्रातर्मध्यंदिने सायमिति ददाति सवनान्येव तानि ॥ २७ ॥

त्रिषु कालेषु दीयमानान्यन्नान्यस्य यज्ञस्य प्रातःसवनादीनि त्रीणि भवन्ति । तस्मात्सर्वेषु कालेषु दातव्यमिति ॥ २७ ॥

यदनुतिष्ठत्युदवस्यत्येव तत् ॥ २८ ॥

यद्गन्तुमुत्तिष्ठन्तमनूत्तिष्ठति तदुदवस्यत्येव । उदवसानीया साऽस्य यज्ञस्येति । प्राये-णोच्छब्दं न पठन्ति । केवलमनुशब्दमेव पठन्ति । तत्राप्ययमर्थः । स एव ॥ २८ ॥

यत्सान्त(न्त्व)यित्वा भोजयति सा दक्षिणा प्रशस्ता ॥ २९ ॥

यत्सान्त(न्त्व)यित्वा प्रशंसन्ति सा दक्षिणा ॥ २९ ॥

यत्संसाधयति ते विष्णुक्रमाः ॥ ३० ॥

संसाधनमनुव्रजनम् ॥ ३० ॥

यदुपावर्तते सोऽवभृथ इति हि ब्राह्मणम् ॥ ३१ ॥

उपावर्तनमनुव्रज्य प्रत्यावर्तनम् । इति ब्राह्मणमित्यस्य सर्वेण संबन्धः ॥ ३१ ॥

आहिताग्निं चेदतिथिरभ्यागच्छेत्स्वयमेनमभ्यु-
देत्य ब्रूयाद्व्रात्य क्वावात्सीरिति व्रात्योदकं
व्रात्य तर्पयन्त्स्त्वति ॥ ३२ ॥

यद्याहिताग्निमुद्दिश्यातिथिरागच्छेत्तत एनमतिथिं स्वयमेवाभिमुखमुपसर्पेत् । अत्र स्वय-मिति वचनादनाहिताग्निरन्येन शिष्यादिना कारयन्नपि न दुष्यति । अभ्युदेत्य ब्रूयात् । व्रात्य क्वावात्सीरिति कुशलप्रश्नः । व्रते साधुः व्रात्यः । एष एव व्रात्य इति पूजावि-धानम् । क्व पूर्वस्यां रात्रौ स्थितोऽवात्सीरिति । व्रात्योदकमित्युदकदानम् । व्रात्य तर्पयन्स्त्विति रसादिभिस्तर्पयति । अनुस्वारसकारौ छान्दसौ । क्रियाभेदात्प्र-तिमन्त्रमितिकारः । एतत्सर्वेषु कर्तव्यम् ॥ ३२ ॥

पुराऽग्निहोत्रस्य होमादुपाꣳशु जपेद्व्रात्य यथा ते प्रियं तथाऽस्त्विति व्रात्य यथा ते वशस्तथाऽस्त्विति व्रात्य यथा ते कामस्तथाऽस्त्विति व्रात्य यथा ते निकामस्तथाऽस्त्विति ॥ ३३ ॥

स यदि होमकालेऽप्यासीत तदा पुरा होमादु(द)परेणाग्निं दर्भेषु सादयित्वा व्रात्य यथा ते प्रियमित्यादिकान्मन्त्रानुपांशु जपेत् ब्रूयात् । तत्र प्रियमिति मन्त्रः । इतिशब्दप्रयोगादर्थभेदाच्चतुर्णां विकल्पः । समुच्चय इत्यन्ये । अत्र चाध्वर्युर्यजमानो वा यो होता स जपेत्ततो जुहुयात् ॥ ३३ ॥

यदि सायमहुतेऽग्निहोत्रेऽतिथिरभ्यागच्छेत्स्वयमेनमभ्युदेत्य ब्रूयात् । व्रात्य(त्या)तिसृज होष्यामीत्यतिसृष्टेन होतव्यम् । अनतिसृष्टश्चेज्जुहुयादो(दो)षं ब्राह्मणमाह ॥ ३४ ॥

सायमहुतेऽग्निहोत्रे संति यद्यतिथिरागच्छेत्स्वयमेनमभ्युदेत्य ब्रूयाद्व्रात्यातिसृजानुमानीहि होष्यामीति । ततो व्रात्योऽतिसृजेत् । अतिसृष्टेन होतव्यम् । यदि पुनरनतिसृष्टो नानुज्ञातो जुहुयात्तस्य दोषं ब्राह्मणवाक्यमाह । तत्र पठितं प्रत्येतव्यम् । अत्र पक्षे स्वयं होमो नियतः ॥ ३४ ॥

एकरात्रं चेदतिथीन्वासयेत्पार्थिवाँल्लोकानभिजयाति द्वितीययाऽन्तरिक्ष्याꣳस्तृतीयया दिव्याꣳश्चतुर्थ्या परावतो लोकानपरिमिताभिरपरिमिताँल्लोकानभिजयतीति ब्राह्मणम् ॥ ३५ ॥

(य) एकरात्रमतिथीन्गृहे वासयति स पृथिव्यां मया(वा)ल्लोकानभिजयाति । द्वितीयया राज्याऽन्तरिक्ष्यान् । तृतीयया दिव्यान् । चतुर्थ्या परावतः । सुखस्य परा मात्रा येषु लोकेषु तानभिजयाति । अपारिमितामि(भी) रात्रीभिरपरिमिताँल्लोकानभिजयाति । स्वयमनीरितत्वाद्ब्राह्मणं भवतीति ॥ ३५ ॥

असमुदेतश्चेदतिथिरभ्यागच्छेदासनमुदकं भोजनं श्रोत्रियाय ददामीति दद्यादेवमस्य समृद्धं भवति ॥ ३६ ॥ (ख० ६)॥

इति सत्याषाढहिरण्यकेशिश्रौतसूत्रे (धर्मसूत्रापरपर्याये) सप्तविंशप्रश्ने द्वितीयः पटलः ॥ २ ॥

विद्यया कुलशीलाभ्यां चासंपन्नोऽसमुदेतः। स चेदतिथिधर्मेणाऽऽगच्छति तस्यान्नादिकमेव देयं न मधुपर्कादिकम् । आसनादिकं तदपि श्रोत्रियाय ददामीति दद्यात् । एवमश्रोत्रियाय दत्तं तदपि समृद्धमधिकगुणं भवति ॥ ३१ ॥ (ख० १) ॥

इति सत्याषाढहिरण्यकेशिधर्मसूत्रव्याख्यायां महादेवदीक्षितविरचितायामुज्ज्वलायां वृत्तौ सप्तविंशप्रश्ने द्वितीयः पटलः ॥ २ ॥

अथ तृतीयः पटलः ।

सवर्णापूर्वशास्त्रविहितायां यथर्तु गच्छतः पुत्रास्तेषां कर्मभिः संबन्धः ॥ १ ॥

सवर्णा चापूर्वा च शास्त्रविहिता चेति कर्मधारयः । सवर्णा सजातीया । ब्राह्मणस्य ब्राह्मणीत्यादि । अपूर्वाऽन्यस्मा अदत्ता न विद्यते पूर्वं पतिरस्या इति । शास्त्रविहिता या शास्त्रोक्तेन विवाहसंस्कारेण संस्कृता । असगोत्राय दुहितरं प्रयच्छेदित्यादि शास्त्रानुगुणा वा । एवंभूतायां यथर्तु गृह्योक्तेन ऋतुगमनकल्पेन गच्छतो ये पुत्रा जायन्ते तेषां 'स्वकर्म ब्राह्मणस्य' इत्यादिना पूर्वमुक्तैः कर्मभिः संबन्धो भवति । गच्छत(थ) इति थकारोऽपपाठः ॥ १ ॥

दायेन चाव्यतिक्रमश्चोभयोः ॥ २ ॥

उभयोर्मातापित्रोर्दायेन च तेषां संबन्धो भवति । अव्यतिक्रमश्च ।[च इति] चेदर्थे । अव्यतिक्रमश्चेद्यदि ते मातरं पितरं न व्यतिक्रमेयुः । व्यतिक्रमे तु दायहानिरिति । अपर आह— उभयोरपि दायेन तेषां व्यतिक्रमो न कर्तव्योऽवश्यं देयो दाय इति ॥ २ ॥

पूर्ववत्यामसंस्कृतायां वर्णान्तरे च मैथुने दोषः ॥ ३ ॥

पूर्ववती, अन्येन पाणिग्रहणेन तद्वि(द्व)ती या । असंकृता विवाहसंस्कारविरहिता । वर्णान्तरं ब्राह्मणादेः क्षत्रियादि। पूर्ववत्यादिषु मैथुने सति दोषो भवति । कस्य तयोरेव मिथुनीभवि(व)तोः ॥ ३ ॥

तत्रापि दोषवान्पुत्र एवोत्पादि(दयि)तुः पुत्र एवेति ब्राह्मणम् ॥ ४ ॥

षष्ठ्यम्यास्तमिल् । ‘ इतराभ्योऽपि दृश्यन्ते ’ इत्याभ्यामप्युभाभ्यां पुत्र एवातिशयेन दोषवान् । तत्र पूर्ववत्यामुत्पन्नौ कुण्डगोलकौ । ‘ पत्यौ जीवति कुण्डः स्यान्मृते भर्तरि गोलकः । असंस्कृतायामुत्पन्नस्य नामान्तरं नास्ति । किंतु दुष्टत्वमेव । वर्णान्तरे तु जात्यन्तरम् । तत्र गौतमः—अनुलोमा(मा अ)नन्तरैकान्तराभ्यन्तरासु जाताः सवर्णा-म्बष्ठोग्रनिषाददौष्यन्तपारशवाः । प्रतिलोमास्तु सूतमागधायोगवक्षत(त्तृ)वैदेहकचण्डाला इति । एवकारो दुहितृनिवृत्त्यर्थः । तथा च वसिष्ठः—पतितेनोत्पन्नः पतितो भवत्य-न्यत्र स्त्रियाः । सा हि परगामिनी । तामतिरिक्थामुपेयादिति । स्त्रीरत्नं दुष्कला-दपीति मनुः ॥ ४ ॥

पुत्रेभ्यो दायविभागं वक्ष्यन्नन्यस्य भार्यायामन्येनोत्पादितः पुत्रः किमुत्पादयितु-राहोस्विदुज्झितक्षेत्रिण इति विचारे निर्णयमाह—

उत्पादयितुः पुत्र इति ब्राह्मणम् ॥ ५ ॥

न केवलं ब्राह्मणमेव यै(वै)दिकीगाथामप्युदाहरन्ति । विचार्यम् ॥ १ ॥

इदानीमेवाहमीर्ष्यामि स्त्रीणां जनको नो पुरा
यदा यमस्य सादने जनयितुः पुत्रमब्रुवन् ।
रेतोधाः पुत्रं नयति परेत्य यमसादने तस्माद्भार्या१
रक्षन्ति बिभ्यन्तः पररेतसः । अप्रमत्ता रक्षथ
तन्तुमेतं मा वः क्षेत्रे परबीजानि वाप्सुर्जनयितुः
पुत्रो भवति सांपराये मोघं वेत्ता कुरुते तन्तु-
मेतमिति ॥ ६ ॥

जनयितुः क्षेत्रिणो वा पुत्र इति विवादे पराजितस्य क्षेत्रियो(णो) वचनम् । एता-वन्तं कालमहं जनको मन्यमान इदानीमेव स्त्रीणामीर्ष्यामि । परपुरुषसंसर्गेण संभवेत् । कदा, इदानीं यमस्य सादने पितृलोके जनयितुः पुत्रो भवति । पुत्रकृत्यं परलोकं गतस्य जनयितुरेव न क्षेत्रिण इत्यब्रुवन्धर्मज्ञाः । मृषा र(स) नार्थः । किंचिद्विशेषेणोच्यन्ते(ते) रेतोधा बीजप्रदः पुत्रं नयति । पुत्रदत्तपिण्डादिकमात्मानं प्रत्येति(प्रापयति) परेत्य मृत्वा । यमसा-दने पितृलोके । तस्मात्कारणाद्भार्या रक्षन्ति पररेतसो बिभ्यन्तः । छान्दसोऽनुस्वारः । अतो यूयमप्यवहिता भूत्वा, एवं(तं) तन्तुं प्रजासंतानं रक्षथ । लोडर्थे लट् । रक्षथ(त) कोऽर्थः । वो युष्माकं क्षेत्रे परेषां बीजानि [मा] वाप्सुः । व्यत्ययेन कर्मणि कर्तृ-प्रत्ययः । मा वप्सत, उप्तानि मा भूवन् । यस्मात्सांपराये परलोके जनयितुरेव पुत्र-

१ (पा॰ सू॰ ५ । ३ । १४) ।

फलं भवति। वेत्ता तु भार्याया लब्धा क्षेत्री व्यर्थमेव तन्तुमेतं कुरुते, आत्मसात्करोति । इतिशब्दो गाथासमाप्तौ । एतच्च क्षेत्रिणोऽनुज्ञानमन्तरेण पुत्रोत्पादनविषयम् । यदा तु क्षेत्री वन्ध्यो रुग्णो वा प्रार्थयते मम क्षेत्रे पुत्रमुत्पादयतेति यदा वा संतानक्षये विधवां नियुङ्क्ते यथा विचित्रवीर्यस्य क्षेत्रे सत्यवतीवाक्याद्व्यासेनोत्पन्नः पुत्र उभयोरपि पुत्रो भवति बीजिनः क्षेत्रिणश्च । तथा चाऽऽचार्योऽपि गृह्य आह—यदि द्विपिता स्यादेकैकस्मिन्पिण्डे द्वौ द्वावुपलक्षयेदिति । याज्ञवल्क्योऽप्याह—

अपुत्रेण परक्षेत्रे ति(नि)योगोत्पादितः सुतः ।
उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मतः ॥ इति ।

नारदोऽपि—द्व्यामुष्यायणको दद्याद्वाभ्यां पिण्डोदके पृथक् ।
रिक्थ्यादर्धं समादद्याद्बीजक्षेत्रिययो(त्रवतो)स्तथा ॥ इति ।

यदि पूर्ववत्यादिषु दोषः कथं तर्हि [उतथ्य]भारद्वाजौ व्यत्यस्य भार्ये जग्मुः(ग्मतुः)। वसिष्ठश्चाण्डालीमक्ष(क्ष)मालाम् । [प्रजापतिश्च] स्वां दुहितरम् ॥ ६ ॥

दृष्टो धर्मव्यतिक्रमः साहसं च पूर्वेषाम् ॥ ७ ॥

सत्यं दृष्टोऽयमाचारः पूर्वेषाम् । स तु धर्मव्यतिक्रमो न धर्मः । गृह्यमाणा(ण)कारणत्वात् ॥ ७ ॥

न चैतावदेव साहसं च पूर्वेषां दृष्टम् । यथा जामदग्न्येन रामेण पितृवचनादविचारेण मातुः शिरश्छिन्नमिति किमिदानीं तेषामपि दोषः । नेत्याह—

तेषां तेजोविशेषेण प्रत्यवायो न विद्यते ॥ ८ ॥

तादृशां(शं) तेषां तेजः । सदैवंविधैरपि पाप्मभिर्न प्रत्यवयन्ति । तद्यथैषीकातूलमग्नौ प्रहूयत एवं ह्येषां पाप्मानः प्रहूयन्ते ॥ ८ ॥

न चैतावताऽर्वाचीनानामपि तथा प्रसङ्ग इत्याह—

तदन्वीक्ष्य प्रयुञ्जानः सीदत्यवरः ॥ ९ ॥

तदिति 'नपुंसकमनपुंसकेन' इत्येकशेष एकवद्भावश्च । तं व्यतिक्रमं तत्र(च्च) साहसमन्वीक्ष्य प्रयुञ्जानोऽवर इदानींतनः सीदति प्रत्यवैति । न ह्यग्निः सर्वं दहतीत्यस्माकमपि तथा शक्तिरिति ॥ ९ ॥

अत्र प्रसङ्गेनाऽऽह—

---

१ 'अक्षमाला वसिष्ठेन संयुक्ताऽधमयोनिजा' इति (म० स्मृ० ९ । २३) । २ (पा० सू० १ । २ । ६९) ।

दानं च क्रयधर्मश्चापत्यस्य च न विद्यते ॥ १० ॥

दानग्रहणेन विक्रयोऽपि गृह्यते । त्यागसाम्यात् । क्रयधर्म इति च प्रतिग्रहस्यापि ग्रहणम् । धर्मग्रहणात्स्वीकारसाम्याच्च । अपत्यस्य दानप्रतिग्रहक्रयविक्रया न कर्तव्या इति । द्वादशविधपुत्रविषये दत्तक्रीतयोरपि पुत्रयोर्मन्वादिभिः पठितत्वान्नायं सामान्येन प्रतिषेधः । किं तर्हि । ज्येष्ठपुत्रविषय एकपुत्रविषयः स्त्रीविषयो वा । तथा वसिष्ठः— न ज्येष्ठं पुत्रं दद्यात्प्रतिगृह्णीयाद्वा स हि संतानाय पूर्वेषाम् । न स्त्री पुत्रं दद्यात्प्रतिगृह्णीयाद्वाऽन्यत्रानुज्ञानाद्भर्तुः । पुत्रं प्रतिग्रहीष्यन्बन्धूनाहूय राजनि चाऽऽवेद्य निवेशनस्य मध्ये व्याहृतेषु । याज्ञवल्क्यः—'नाशि(रित)वयं व्रतलोपश्च सुतानां चैव विक्रयः' इति । बह्वृचब्राह्मणो(णे)ऽपि शुनःशेपाख्याने दृश्यते—'स ज्येष्ठं पुत्रं निगृह्णीत (ह्णान) उवाच' इत्यादि । पुत्रप्रकरणेऽपत्यशब्दोपादाने(नं) म ज्येष्ठपुत्रविषयत्वस्य लिङ्गम् । न पतत्यनेनेत्यपत्यमिति ।

ऋणमस्मिन्सं नय[त]त्यमृतत्वं च गच्छति ।
पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखम् ॥ इति ॥ १० ॥

विवाहे दुहितृमते दानं काम्यं धर्मार्थं श्रूयते तस्माद्दुहितृमतेऽधिरथं शतं देयं तन्मिथुया कुर्यादिति तस्यां क्रयशब्दः संस्तुतिमात्रं धर्मार्थं संबन्धः ॥ ११ ॥

आर्षे विवाहे दुहितृमते दानं क्वचिद्वेदे श्रूयते । तस्माद्दुहितृमते रथेनाधिकं गवां शतं देयम् । तच्च दुहितृमान्मिथुया कुर्यान्मिथ्या कुर्यात् । मा देवानां मिथुयाकर्मागधेयमिति हि श्रूयते । मिथ्या कुर्यादिति कोऽर्थः । वरायैव पुनर्दद्यादिति । तदिदं दानं काम्यं कामनिमित्तं 'यथा युक्तो विवाहस्तथा युक्ता प्रजा भवति' इति ऋषितुल्याः पुत्रा यथा स्युरिति । ततश्च धर्मार्थ(र्थं) न क्रमार्थम् । वस्तुतस्तस्यां विवाहक्रियायां क्रयशब्दः क्वचित्स्मृतौ दृश्यते [स] संस्तुतिमात्रम् । द्रव्यप्रधानसाम्यात् । न मुख्यक्रयप्रतिपादनार्थम् । कुतः । यस्माद्धर्मार्थे संबन्धः । अत्र शेषः पूरणीयः (दं)पत्योरिति । आर्षेयदुहितृमते मिथुनौ गावौ देयाविति । अत्राप्येष एव न्यायः । अत्र मनुः—

यासामाददते शुल्कं ज्ञातयो न स विक्रयः ।
अर्हणं तत्(तत्)कुमारीणामान(नृ)शंस्यं च केवलम् ॥ इति ।

१ आद्यान्तिमचकारद्वयं क. पुस्तके न दृश्यते ।

एतच्च सर्वदानं क्रये धर्मस्य विद्यत इत्यत्र व्यभिचारनिवृत्त्यर्थमित्युक्तम् ॥ ११ ॥

अथ दायविभागः—

एकधनेन ज्येष्ठं तोषयित्वा जीवन्पुत्रेभ्यो
दायं विभजेत्समं क्लीबमुन्मत्तं पतितं च परि-
हाप्य ॥ १२ ॥

एकेन प्रधानेन केनचिद्धनेन गवादिना ज्येष्ठपुत्रं तोषयित्वा तृप्तिं कृत्वा जीवन्नेव पुत्रेभ्यो दायं विभजेत् । समं क्लीबमुत्प(न्म)त्तं पतितं च परिहाप्य । आत्मना परस्परं च । तेषां सामान्याभिधानात् । क्रम(मा)गतं च स्वयमावर्जितं च क्लीबादीन्वर्जयित्वा । क्लीबादिग्रहणं जात्यन्धादीनामप्युपलक्षणम् । यथाऽऽह मनुः—

अनर्हौ(नंशौ) क्लीबपतितौ जात्यन्धबधिरौ तथा ।
उन्मत्तजडमूकाश्च ये केचन निरिन्द्रियाः ॥ इति ।

अन्धादीनां पुत्रसद्भावे तेंऽशहराः । एवमुन्मत्तपतितौ । क्लीबादयस्तु भर्तव्याः । अत्र विभागकालः स्मृत्यन्तरवशाद्ग्राह्यः । तत्र नारदः—

मातुर्निवृत्ते रजसि प्रत्तासु भगिनीषु च ।
निवृत्ते वाऽपि मर(रम)णात्पितर्युपरतस्पृहे ॥ इति ।

यदा च पुत्राणां पृथक्धर्मानुष्ठाने शक्तिसंबन्धस्ततः सोऽपि कालः । तस्मिन्या: (न्धर्माः) पृथक् क्रियते(न्त) इति दर्शनात् । जीवन्निति वचनाज्जीवन्नेवावश्यं पुत्रान्विभजेत् । एष धर्म इति प्रतिपादनाय । अन्यथा तदनर्थकम् । अजीवतोऽप्रसङ्गात् । स्मृत्यन्तरेषु स्वयमर्जिते पितुरिति(च्छ)या विषमविभागो दर्शितः । न स धर्म इत्याचार्यस्य पक्षः । भार्याया अप्यंशो न प्रदर्शितः । आत्मन एवांशस्तस्या [अ]पीति मन्यते । वक्ष्यति च ‘ जायापत्योर्न विभागो विद्यते ’ इति । केचित्तु पितुर्द्वावंशावित्याहुः— ‘ द्वावंशौ प्रतिपद्येत विभजन्नात्मनः पिता ’ इति । दृष्ट्वा(र्शना)त् । अयमप्याचार्यपक्षो न भवति । यथा पुत्राणामेक एवांशः सभार्याणां तथा पितुरपीति । यद्वा पुत्राणामेवांशसाम्यमात्मनस्त्वधिको न दोषाय । अत्र हारीतः—पिताऽऽग्रयणः पुत्रा इतरे ग्रहाः, यदाऽऽग्रयणः स्कन्देदुपदस्येदितरेभ्यो गृह्णीयादिति । विभागादूर्ध्वं पित्रोर्जीवनाभावे पुत्रभागेभ्यो ग्राह्यमित्युक्तं भवति । इति वा विभागः ॥ १२ ॥

मृते कुटुम्बिनि तद्धनस्य [गतिमाह]—

पुत्राभावे सपिण्डो यः प्रत्यासन्नः ॥ १३ ॥

पुत्राभाव इति वचनात्सत्सु पुत्रेषु त एव गृह्णीयुरविशेषात्समम् । तत्र नारदीये विशेषः—

यच्छिष्टं प्रीतिदायेभ्यो दत्त्वर्णं पैतृकं च यत् ।
भ्रातृभिस्तद्विभक्तव्यमृणी स्यादन्यथा पिता ॥ इति ।

कात्यायनस्तु—

भ्राता(त्रा) पितृव्यमातृभ्यां कुटुम्बार्थमृणं कृतम् ।
विभागकाले देयं तद्रिक्थिभिः सर्वमेव हि ॥ इति ।
पितुरूर्ध्वं विभजतां माताऽप्यंशं समं हरेत् ॥

इति याज्ञवल्क्यवचनं तदत्र नोक्तम् । पुत्रैरेव वृत्तिरस्या इति । तथा च मनुः—

पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
पुत्रस्तु स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हति ॥ इति ।

एवं मातुरप्यभावे तद्धनं भर्तुः कुललब्धं स्वयमर्जितं पुत्रा अप्रत्ताश्चेद्दुहितरः समं गृह्णीयुः ।

स्त्रीधनं तदपत्यानां दुहिता च तदंशिनी ।
अप्रत्ता चेत्समूढा तु लभते सा न मातृकम् ॥ इति ।

बृहस्पतिः—पितृकुललब्धं च (त्वा)प्रत्ता एव दुहितरः ।
मातुस्तु पैतृकं यत्स्यात्कुमारीभाग एव सः ॥ इति मनुः ।
अप्रत्ता दुहितरः पुत्राश्च व्यचरं(भजं)स्तदा ।
जनन्यां संस्थितायां तु समं सर्वे सहोदराः ॥
भजेरन्मातृकं रिक्थं भगिन्यश्च सनाभयः ॥ इति च मानवे ।

अत्र व्यासः—असंस्कृतास्तु ये पुत्राः पैतृकादेव ते धनात् ।
संस्कार्या भ्रातृभिर्ज्येष्ठैः कन्यकाश्च तथाविधाः ॥ इति ।

अत्र क्रमविवाहे बृहस्पतिः—

ब्रह्मक्षत्रियविट्शूद्रा विप्रोत्पन्नास्त्वनुक्रमात् ।
चतुस्त्रिद्व्येकभागेन भजेयुस्ते यथाक्रमम् ॥
क्षत्रजास्त्रिद्व्येकभागा विट्शूद्रौ द्व्येकभागिनौ ॥ इति ।

मानवे च स्पष्टमुक्तम्—

सर्वं वा रिक्थजातं तद्दशधा प्रविभज्य तु ।
सम्यग्विभागं कुर्वीत विधिनाऽनेन धर्मवित् ॥
चतुरोंऽशान्हरेद्विप्रस्त्रीनंशान्क्षत्रियासुतः ।
वैश्यपुत्रो हरेद्द्व्यंशमंशं शूद्रसुतो हरेत् ॥
यस्य तु ब्राह्मणी वन्ध्या मृता वा तत्र तु प्रजाः ।
क्षत्रियादिसुतास्त्रीणि क्रमाद्वि(त्रि)द्वे(द्व्ये)कभागतः ॥

यस्य त्वेकस्यामेव पुत्रः स सर्वं हरेच्छूद्रा पुत्रवती । यथाऽऽह देवलः—

अ(आ)नुलोम्येकपुत्रस्तु पितुः सर्वस्वमाप्नुयात् ।
निषाद एकपुत्रस्तु विप्रस्यैव तृतीयभाक् ॥
द्वौ सकुल्पः(ल्यः) सपिण्डो वा स्वधादाता स्वयं हरेत् ॥ इति ।

निषादः पारशवः । क्षेत्रविषये बृहस्पतिः—

न प्रतिग्रहभूर्देया क्षत्रियादिसुताय वै ।
यद्यप्यस्य पिता दद्यान्मृते विप्रासुतो हरेत् ॥
शूद्रो द्विजातिभिर्जातो न भूमेर्भागमर्हति ।
स्वजातावाप्नुयात्सर्वमिति धर्मो व्यवस्थितः ॥ इति ।

याज्ञवल्क्योऽपि—

जातो हि दास्यां शूद्रेण कामतोंऽशो(श)हरो भवेत् ।
मृते पितरि कुर्युस्ते(तं) भ्रातरस्त्वर्धभागिनः(कम्) ॥ इति ।

भार्याविषये विष्णुः—

मातरः पुत्रभागानुसारतो भागहारिणः (ण्यः) ॥ इति ।
औरसः पुत्रिकाबीजः क्षेत्रजः पुत्रिकासुतः ।
पौनर्भवश्च कानीनः सहोढो रू(गू)ढसंभवः ॥
दत्तः क्रीतः स्वयंदत्तः कृत्रिमश्चापि विद्धकः ।
यत्र क्वोपा(त्पा)दितश्च पुत्राख्या दश पञ्च च ॥
अनेनैव क्रमेणैषां पूर्वाभावे परः परः ।
पिण्डदोंऽशहरश्चेति प्रयाणे(प्रायेण) स्मृतिषु स्थितिः ॥

तत्रौरसो धर्मपत्नीजः 'सवर्णापूर्वशास्त्रविहितायाम्' इति पूर्वमुक्तः । गौतमः—
पितोत्सृजेत्पुत्रिकामनपत्ये(त्यो)ऽग्निं प्रजापतिः(?) वाप्साऽस्मदर्थमपत्यमिति संवाद्येति ।

बृहस्पतिः—एक एवौरसः पित्र्ये धने स्वामी प्रकीर्तितः ।
तत्तुल्या पुत्रिका प्रोक्ता भर्तव्यास्त्वपरः(रे) स्मृताः ॥ इति ।

अत्र मनुः—पुत्रिकायां कृतायां तु यदि पुत्रो न (ऽनु)जायते ।
समस्तत्र विभागः स्याज्ज्येष्ठता नास्ति हि स्त्रियाः ॥ इति ।

याज्ञवल्क्यः—अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः ।
उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मतः ॥ इति ।
अयमेक एवोत्पादयितुर्बीजक्षेपस्तु क्षेत्रजः ।

बृहस्पतिः—पौत्रो यः पुत्रिकापुत्रः स्वर्गप्राप्तिकरावुभौ ।
रिक्थे पिण्डाम्बुदाने च समौ संपरिकीर्तितौ ॥ इति ।

कश्यपः-सप्त पौनर्भवाः कन्या वर्जनीयाः कुलाधमाः ।
वाचा दत्ता मनोदत्ता कृतकौतुकमङ्गला ॥
उदकस्पर्शिता या च या च पाणिगृहीतिका ।
अग्निं परिगता या च पुनर्भूप्रसवा च या ॥ इति ।

कात्यायनः—क्लीबं विहाय पतितं या पुनर्लभते पतिम् ।
तस्यां पौनर्भवो जातो व्यक्तमुत्पादकस्य सः ॥ इति ।

मनुः—पुत्र(पितृ)वेश्मनि कन्या तु यं पुत्रं जनयेद्रहः ।
तं कानीनं वदेन्नाम्ना वोढुः कन्यासमुद्भवः ॥ इति ।

नारदः—कानीनश्च सहोढश्च गूढायां यश्च जायते ।
तेषां वोढा पिता ज्ञेयस्ते च भागहराः पितुः ॥ इति ।

वसिष्ठः—अप्रत्ता दुहिता यस्य पुत्रं विन्देत तुल्यतः ।
पौत्री मातामहस्तेन नू(द)द्यात्पिण्डं हरेद्धनम् ॥ इति ।

अनूढायामेव मृतायां मातामहस्यासौ पुत्रः । अन्यथा वोढुः ।

मनुः—या गर्भिणी संस्क्रियते ज्ञाताऽज्ञाता सती पुनः ।
वोढुः स गर्भे(र्भो) भवति सहोढ इति चोच्यते ।
उत्पद्यते गृहे यस्य न च ज्ञायेत कस्य सः ।
स गृहे गूढ उत्पन्नस्तस्य स्याद्यस्य तल्पजः ॥ इति ।

दत्तः पूर्वमेवोक्तः । पैठीनसिः—'अथ दत्तक्रीतकृत्रिमपुत्रिकापुत्राः परपरिग्रहण(णे) प्रायेण(आर्षेयेण) जातास्तेऽसंग(ह)तकुलीना द्व्यामुष्यायणा भवन्तीति ।

भ्रातृणामेकजातानामेकश्चेत्पुत्रवान् भवेत् ।
सर्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवीत् ॥
क्रीणीयाद्यस्त्वपत्यार्थे मातापित्रोर्यमन्तिकात् ।
स क्रीतकः सुतस्तस्य सदृशोऽसदृशोऽपि वा ॥
मातापितृविहीनो यस्त्यक्तो वा स्यादकारणात् ।
समान(आत्मानं) स्पर्शयेद्यस्य स्वयंदत्तस्तु स स्मृतः ॥ इति ।
सदृशं तु प्रकुर्यात्तं(द्यं) गुणदोषविवर्जितम् ।
पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयस्तु कृत्रिमः ॥
मातापितृभ्यामुत्सृष्टं तयोरन्यतरेण वा ।
स(यं) पुत्रं परिगृह्णीदपि(प)विद्धः स उच्यते ॥

सर्व एते सजातीयाः । 'सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः' इति याज्ञवल्क्यवचनात् । विष्णुः—

यत्र क्वचनोत्पादितस्तु द्वादश इति ।

याज्ञवल्क्यः—पिण्डदोंऽशहरश्चैषां पूर्वाभावे परः परः ॥ इति ।

मनुः—श्रेयसः श्रेयसोऽभावे पापीयान् रिक्थमर्हति ॥ इति ।

नारदः—क्रमादेते प्रवर्तन्ते मृते पितरि तद्धने ।
ज्यायसोऽज्यायसो भावे जघन्यस्तदवाप्नुयात् ॥

देवलः—सर्वे ह्यनौरसस्यैते पुत्रा द(दा)यहराः स्मृताः ।
औरसेषु न तुल्यं ते तेषु ज्येष्ठा (ज्यैष्ठ्यं) न तिष्ठति ।
तेषां सवर्णा ये पुत्रास्ते तृतीयांशभागिनः ।
शेषास्तमुपजीवेयुर्ग्रासाच्छादनसंभृताः ॥ इति ।

मनुः—षष्ठं तु क्षेत्रजस्यांशं प्रदद्यात्पैतृकाद्धनात् ।
औरसो विभजन्दायं पित्र्यं पञ्चममेव वा ॥ इति ।

बृहस्पतिः—क्षेत्रजाद्याः सुतास्त्वन्ये पञ्चषट्सप्तभागिनः ॥ इति ।

हारीतः—विभजिष्यमाणा एकविंशं कानीनाय दद्यादन्तिमं(द्विंशं) पौनर्भवाय्यैकोनविंशं द्व्यामुष्यायणायाष्टादशं क्षेत्रजाय सप्तदशं पुत्रिकागर्भपुत्रायेतरानौरसायेति । वसिष्ठः—पुत्रं प्रतिग्रहीष्यन्निति प्रक्रम्य तस्मिंश्चित्प्रतिगृहीत औरस उत्पद्यते चतुर्थभागिति । एवमेतेषु शास्त्रेषु विद्यमानेषु यदाचार्येण पूर्वमुक्तं 'तेषां कर्मभिः

संबन्धो दायेनाव्यतिक्रमश्च ' इति तद्धर्मपत्नीजेष्विति क्षेत्रजादीनां समांशहरत्वप्रतिषेधपरं वेदितव्यम् । अथाविभज्यम् । मनुः—

अनुपघ्नन् पितृद्रव्यं श्रमेण यदुपार्जितम् ।
स्वयमीहितलब्धं तन्नाकामो दातुमर्हति ॥ इति ।

कात्यायनः—न(ना)विद्यानां [तु] वैद्येन देयं विद्याधनात्क्वचित् ।
समं विद्याधिकानां तु देयं वैद्येन तद्धनम् ॥
परभक्तप्रदानेन प्राप्तविद्यो यदाऽन्यतः ।
तथा प्राप्तं तु विधिना विद्याप्राप्तं तदुच्यते ॥ इति ।

व्यासः—पितामहपितृभ्यां च दत्तं मात्रा च यद्भवेत् ।
तस्य तन्नापहर्तव्यं शौर्यभार्याधनं भवेत् ॥ इति ।

याज्ञवल्क्यः—क्रमादभ्यागतं द्रव्यं द्रु(हृ)तमभ्युद्धरेत्तु यः ।
दायादेभ्यो [न] तद्दद्याद्विद्यया लब्धमेव च ॥
येभ्यो(पत्यौ) जीवति यत्स्त्रीभिरलंकारो त्धृ(धृ)तो भवेत् ।
न तं भजेरन्दायादा भज्ज(भज)माना: पतन्ति ते ॥

व्यासः—साधारणं समाश्रित्य यत्किंचिद्वाहनायुधम् ।
शौर्यादिनाऽऽप्नोति धनं भ्रातरस्तत्र भागिनः ॥
तस्य भागद्वयं देयं शेषास्तु समभागिनः ॥ इति पुत्रविभागः ।

तदभावे तु मृतस्य यः प्रत्यासन्नः सपिण्डः स किं दायं लभेतेति वक्ष्यमाणेन संबन्धः । “ लेपभागाश्चतुर्थाद्याः पिण्डदस्तेषां साष्टादशं क्षेत्रजाय सप्तदशं पुत्रिकागर्भपुत्रायेतरानौरसायेति । वसिष्ठः—पुत्रं प्रतिग्रहीष्यन्निति प्रक्रम्य तस्मिंश्चेत्प्रतिगृहीते चौरस उत्पद्यते चतुर्थभागिति । एवमेतेषु शास्त्रेषु विद्यमानेषु यदाचार्येण पूर्वमुक्तं तेषां कर्मभिः संबन्धो दायेनाव्यतिक्रमश्चेति ” ।

लेपभागाश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः ।
सप्तमः पिण्डदस्तेषां सापिण्ड्यं साप्तपौरुषम् ॥ इति । सपिण्डलक्षणम् ।

तेषु यो यः प्रत्यासन्नः स स गृह्णीयात् । भार्या तु रिक्थग्राहिणः सपिण्डा रक्षेयुर्न तु दायाद्या(दा) इत्याचार्यस्य पक्षः । श्रूयते हि तस्मात्स्त्रियो निरिन्द्रिया अदायादी(दा) इति । मनुरपि—

---

१ इत आरभ्य 'दायेनाव्यतिक्रमश्चेति' इत्यन्तो ग्रन्थो द्विर्लिखित इति । भाति अप्रासङ्गिकत्वात् ।

निरिन्द्रिया अदायादाः स्त्रियो नित्यमिति श्रुतिः ॥ इति ।

अत्र सपिण्डाद्यभावे बृहस्पतिः—

अपु(न्य)त्र ब्राह्मणात्किंतु राजा धर्मपरायणः ।
तत्स्त्रीणां जीवनं दद्यादेष न्या(दा)यविधिः स्मृतः ॥
अन्नार्थं तण्डुलप्रस्थमपराह्णे तु साधनम् ।
वसनं द्विपणक्रीतं देयमेतत्त्रिमासतः ॥
एतावदेव साध्वीनां चोदितं विधवाश(ध)नम् ।
वसनस्याशनस्यैव [तथैव] रजकस्य च ॥
व्ययं व्यपोह्य तच्छिष्टं दायदानं प्रकल्पयेत् ।
धूमावसानिकं श्राद्धं संध्यायां स्नानतत्परा ॥
वसनाशनवासांसि विगणस्य(व्य)[धवे] मृते ॥ इति ।

व्यासः—द्विसाहस्रात्परो दायः स्त्रियै दद्याद्धनस्य तु ।
यत्तद्भर्त्रा धनं दत्तं सा यथाकाममाप्नुयात् ॥

पणानां द्वे सहस्रे तु परिमाणाय द्विसाहस्रः । एवं वरो दायः स्त्रिया नाधिक इति । एतदग्रभूते ज्ञातयश्च न रक्षेयुरिति ए(शङ्कायां) पत्नी दुहितरश्चेत्यादि यानि पत्न्या दायप्राप्तिपराणि तान्यप्येवमेव द्रष्टव्यानि । अत्र पितरि भ्रातरि च सोदर्ये जीवति सोदर्यो भ्राता गृह्णीयादित्येके । तथा च शङ्खः—'अपुत्रस्य स्वर्यातस्य भ्रातृगामी द्रव्यं तदभावे मातापितरौ लभेयातां पत्नी वा ज्येष्ठा' इति ।

देवलः—ततो दायमपुत्रस्य विभजेरन्सहोदराः ।
कुल्या दुहितरो वाऽपि ह्री(ध्रि)यमाणः पिता(ताऽ)पि च ॥
सवर्णा भ्रातरो माता भार्या चेति त(य)थाक्रमम् ॥ इति ।

याज्ञवल्क्यः—संसृष्टिनस्तु संसृष्टी सोदरस्य तु सोदरः ।
दद्याच्चापहरेच्चांशं जातस्य च मृतस्य च ॥
अन्योदर्यस्तु संसृष्टी नान्योदर्यधनं हरेत् ।
संसृष्ट्यपि च आदद्यात्सोदर्ये नान्यमातृकः ॥ इति ।

सोदर्येऽपि विशेषवचनात्पत्नीदुहितरश्चेत्यत्र भ्रातृग्रहणमपि भिन्नोदरविषयमपि प्रत्यासत्तिविषयात्पितैवेति वयम् । तदभावे भ्राता सोदर्यः । तदभावे तत्पुत्राः । तदभावे भिन्नोदराः । तदभावे पितृव्य इत्यादि द्रष्टव्यम् । मात्रादयोऽपि स्त्रियो जीवनमात्रं लभेरन्निति ॥ १२ ॥

तदभाव आचार्य आचार्याभावेऽन्तेवासी हृत्वा तदर्थेषु धर्मकृत्येषु वोपयोजयेत् ॥ १४ ॥

सपिण्डाभाव आचार्यो धनं हरेत् । तस्याभावेऽन्तेवासी हरेत् । हृत्वा च तदर्थेषु धर्मकृत्येषु तटाकखननादिषूपयोजयेत् । वाशब्दात्स्वयं नोपभुञ्जीत ॥ १४ ॥

दुहिता वा ॥ १५ ॥

[दुहिता वा] दायं हरेत् । पुत्राभाव इत्येके । अनन्तरोक्तविषयमित्यन्ये ॥१५॥

सर्वाभावे राजा दायꣳ हरेत् ॥ १६ ॥

सर्वग्रहणाद्बन्धूनां सगोत्राणां चाप्यभावे ॥ १६ ॥

ज्येष्ठो दायाद इत्येके ॥ १७ ॥

एके मन्यन्ते ज्येष्ठ एव पुत्रो दायहरः । इतरे तमुपजीवेयुः । सोऽपि तान् बिभृयात् पितेव परिपालयेदिति । तथा च गौतमः—सर्वा(वं) पूर्वजस्येतरान्बिभृयात् । इति ॥ १७ ॥

देशविशेषे सुवर्णं कृष्णा गावः कृष्णं भौमं ज्येष्ठस्य ॥ १८ ॥

क्वचिद्देशे सुवर्णादि ज्येष्ठस्य भाग इत्याहुः । भूमौ जातं भौमं धान्यं माषादि । कृष्णायसमित्यन्ये ॥ १८ ॥

रथः पितुः परिभाण्डं च गृहे ॥ १९ ॥

रथः पितुरंते(शः) गृहे च यत्परिभाण्डमुपकरणं पीठादि तदपि ॥१९॥

अलंकारो भार्याया ज्ञातिधनं चेत्येके ॥ २० ॥

भार्यायास्तु भृतालंकारोंऽशो ज्ञातिभ्यः पितृभ्यश्च यल्लब्धं धनं तच्चेत्येके मन्यन्ते ॥ २० ॥

तच्छास्त्रैर्विप्रतिषिद्धम् ॥ २१ ॥

॥ २१ ॥

ज्येष्ठो दायाद इत्युक्तं तच्छास्त्रविरुद्धं दर्शयति—

मनुः पुत्रेभ्यो दायं व्यभजदित्यविशेषेण श्रूयते ॥ २२ ॥

पुत्रेभ्य इति बहुवचननिर्देशादविशेषश्रवणं तत्र चोद्यम् ॥ २२ ॥

अथापि तस्माज्ज्येष्ठं पुत्रं धनेन निरवसाययन्तीत्येकवच्छ्रूयते ॥ २३ ॥

अथापीति ननु चेत्यर्थः । ज्येष्ठं पुत्रं धनेन निरवसाययन्[न्ति पृथक्कुर्व]न्तीत्ये-कवच्छ्रूयते यथैक एव ज्येष्ठो दायादस्तदनुरूपमपि श्रूयत इति ॥ २३ ॥

परिहरति—

तथाऽपि नित्यानुवादमविधिमाहुर्न्यायविदो यथा तस्मादजावयः पशूनाꣳ सह चरन्तीति तस्मात्स्ना-तकस्य मुखꣳ रेफायतीव तस्माद्बस्त[श्च] श्रोत्रियश्च स्त्रीकामतमाविति ॥ २४ ॥

तथेति परिहारोपक्रमे । पशूनां मध्येऽजाश्चावयश्च जातिभेदेऽपि सह चरन्ति । रेफा शोभा । इह तु तद्वत्यवे(मे)दोपचारः । तत्स्पष्टं स्नातकस्य मुखं कुण्डलादिना शोभते । इवशब्दो वाक्यालंकारे । श्रोत्रियस्य स्त्रीकामतमत्व[माचा]र्यकुले चिरकालं ब्रह्मचारि-वासात् । यथैतानि वाक्यानि दृष्टभावमनुतिष्ठन्ति न किंचिद्विदधाति । तथा तस्माज्ज्ये-ष्ठं पुत्रमित्यादिकमपीति न्यायविद आहुः । न च केवलमयमेवानुवादः किं तर्हि ' मनुः पुत्रेभ्यः ' इत्यप्यनुवाद एव ॥ २४ ॥

सर्वे हि धर्मयुक्ता भागिनः ॥ २५ ॥

हिशब्दो हेतौ । यस्मादेतावनुवादौ न कस्यचिद्विधायकौ तस्माद्धि धर्मयुक्ताः पुत्राः सर्व एव ते भागिनः ॥ २५ ॥

यस्त्वधर्मेण द्रव्याणि प्रतिपादयेज्ज्येष्ठोऽपि तम-भागं कुर्यात्[1] ॥ २६ ॥ (ख० ७) ।

यस्तु ज्येष्ठोऽप्यधर्मेण प्रतिपादयति द्रव्याणि विनियुङ्क्ते तावद्विभागेऽपि न दद्यात् । ऊर्ध्वं विभागे तु भ्रातरः । अपिशब्दात्किं तु नान्यमिति ज्येष्ठस्य प्राधान्यं ख्या-प्यते ॥ २६ ॥ (ख० ७) ।

' जीवत्पु(न्पु)त्रेभ्यो दायं विभजेत् ' इत्यत्र भार्याया भागो न प्रदर्शितस्तत्र कारणमाह—

जायापत्योर्न विभागो विद्यते पाणिग्रहणाद्धि सहत्वं कर्मसु ॥ २७ ॥

कर्मार्थं द्रव्यम् । जायायाश्च न पृथक्कर्मस्वधिकारः । किं तर्हि । सहभावेन । ' य-स्त्वया धर्मश्च[रित]व्यः सोऽनया सह ' इति वचनात् । तत्किं पृथग्द्रव्येणेति ॥ २७ ॥

१ क. पुस्तके 'कुर्वीत ' इति पाठः ।

तथा पुण्यक्रियासु(फलेषु) ॥ २८ ॥

पुण्यफलेषु स्वर्गादिष्वपि तथा सहत्वमेव । 'दिवि ज्योतिरजरमारभेताम्' इत्यादिभ्यो मन्त्रलिङ्गेभ्यः ॥ २८ ॥

द्रव्यपरिग्रहेषु च ॥ २९ ॥

द्रव्यार्जनेष्वपि सहत्वमेव । तत्पतिरार्जयति जाया गृहे निर्वहतीति योगक्षेमावुभावाध(भयाय)त्ताविति द्रव्यपरिग्रहे सहत्वम् ॥ २९ ॥

एतदेवोपपादयति—

न हि भर्तृविप्रवासे स्त्रियो(स्त्रिया) नैमित्तिके
दाने स्तेयमित्युपदिशन्ति ॥ ३० ॥

हि यस्माद्भर्तुर्विप्रवासे सति च्छिन्दत्प्राणि दद्यादित्यादिकदाने कृते भार्याया न स्तेयमित्युपदिशन्ति धर्मज्ञाः । यदि भर्तुरेव द्रव्यं स्यात्स्यादेव स्तेयम् । नैमित्तिके दान इति वचनाद्व्ययान्तरे स्तेयं भवत्येव । एतदेव द्रव्ये साधारणेऽपि दम्पत्योर्वैषम्यं यत्पतिर्यथेष्टं विनियुङ्क्ते जाया त्वेतावदेवेति । न च पत्युः स्त(स्व)द्रव्यस्य विनियोगः(गे) जायाया अनुग(म)त्यपेक्षा । स्वतन्त्रत्वात् । स्वतन्त्रोऽप्यसौ गृहे यथा राजा राष्ट्रे । अत एव भार्याया न स्तेयशङ्का न भर्तुः ॥ ३० ॥

एतेन देशकुलधर्मा व्याख्याताः ॥ ३१ ॥

'ज्येष्ठो दाया[दः' इत्या]दिकं शास्त्रविप्रतिषेधादप्रमाणकमित्युक्तम् । एतेन देशकुलधर्माश्च व्याख्याताः । शास्त्रविप्रतिषिद्धा मातुलसुतापरिणयनादयोऽप्रमाणं विपरीताः प्रमाणमिति । गौतमोऽप्याह—देशकुलधर्माश्चाऽऽम्नैरेव(र्माः शास्त्रैरवि)रुद्धाः प्रमाणमिति ॥ ३१ ॥

मातुश्च योनिसंबन्धेभ्यः पितुश्चाऽऽसप्तमात्पुरुषाद्यावता वा संबन्धो ज्ञायते तेषां प्रेतेषूदकोपस्पर्शनं गर्भान्वर्जयित्वा परिसंवत्सरान् ॥ ३२ ॥

मातुर्योनिसंबन्धा मातुलादयः । पितुश्चाऽऽसप्तमात्पुरुषात्संबन्धाः सपिण्डाः । यावता वा सापिण्ड्यान्तरेण संबन्धो ज्ञायते स्मर्यते तज्जन्म(ना)नाम्ना चामुष्मायमस्मा(स्म)त्कूटस्थस्य वंश्यः । एवमेवंनामेति । तथा च मनुः—

सपिण्डता नु (तु) पुरुषे सप्तमे विनिवर्तते ।
समानोदकभावस्तु जन्मनाम्नोरवेदत (ने) ॥ इति ।

तेषां प्रेतेषु मृतेषूदकोपस्पर्शनं मरणनिमित्तं स्नानं कर्तव्यम् । गर्भान्बालान्परिसंवत्सरान्वर्जयित्वा । बालेषु मृतेषु स्नानं न कर्तव्यमिति ॥ ३२ ॥

मातापितरावेव तेषु ॥ ३३ ॥

तेषु बालेषु मृतेषु मातापितरावेवोदकोपस्पर्शनं कुर्याताम् ॥ ३३ ॥

हर्तारश्च ॥ ३४ ॥

ये च तान्बालान्मृतान्हरन्ति निर्हरन्ति तेऽप्युदकोपस्पर्शनं कुर्युरिति ॥ ३४ ॥

भार्यायां परमगुरुसंस्थायां चाऽऽकालमभोजनम् ॥ ३५ ॥

भार्या पत्नी । परमगुरव आचार्यमातापितरः । संस्था मरणम् । भार्यायां संस्थितायां परमगुरूणां च संस्थायां सत्यां न केवलमुदकोपस्पर्शनं किं तर्ह्यपरेद्युरा तस्मात्कालादभोजनम् ॥ ३५ ॥

आतुरव्यञ्जनानि कुर्वते ॥ ३६ ॥

आतुरत्वं व्यज्यते यैस्तानि कुर्वीरन्भार्यादिमरणे ॥ ३६ ॥

कानि पुनस्तानि—

केशान्प्रकीर्य पांसूनोप्यैकवाससः सकृदवगाह्य
तत्संस्थमुदकमुत्सिच्योत्तीर्योपविशन्ति ॥ ३७ ॥

केशान्प्रकीर्य पांसूनावपन्ति । ओप्यैकवाससोऽनुत्तरीयाः । सकृदवमज्य(ज्ज्य) प्रेतदिक्संस्थमुदकमूर्ध्वमुत्सिच्यामुकगोत्रायामुष्मै प्रेताय तिलोदकमुपतिष्ठत्वित्युत्सिञ्चेयुराचारात् । उदकादुत्तीर्य तीर उपविशन्ति दक्षिणामुखा एव ॥ ३७ ॥

एवं त्रिः ॥ ३८ ॥

एवमुक्तप्रकारेण त्रिरवमज्यो(ज्ज्यो)पविशेयुः ॥ ३८ ॥

अप्रतीक्षा ग्राममुपयन्ति यत्तत्र स्त्रिय आहुस्तत्कुर्वन्ति ॥ ३९ ॥

अप्रतीक्षमाणाः पृष्ठतोऽनिरीक्षमाणा ग्राममुपयन्ति । अनेन बहिरिदं कर्मेत्यम्वगयते । यत्तत्र मृतविषये स्त्रियः कर्तव्यमाहुस्तत्कुर्वन्ति । अग्न्युपस्पर्शनं गवालम्भनादि । स्त्रियः [इति] स्मृतीनां ग्रहणमिति प्रामाणिका व्याचक्षते ॥ ३९ ॥

इतरेषु चैक एतदेवोपदिशन्ति ॥ ४० ॥

आकालमभोजनमित्यादि यदुक्तमेतदितरेषु भार्यादिभ्योऽन्येष्वपि सपिण्डेषु मृतेषु कर्तव्यमित्येक आचार्या उपदिशन्ति ॥ ४० ॥

एतस्मिन्कालेऽमात्याः केशश्मश्रूणि वापयन्ते ॥ ४१ ॥

अमात्याः सपिण्डाः । स्पष्टमन्यत् ॥ ४१ ॥

न समावृत्ता वापयेरन् ॥ ४२ ॥

पूर्वापवादोऽयम् । अमात्येष्वपि गुरुकुलात्समावृत्ताः स्नातका न केशादि वापयेरन् ॥ ४२ ॥

न विहारिण इत्येके ॥ ४३ ॥

विहारिणो बालाः । तेऽपि न ॥ ४३ ॥

अनशनानध्ययनोदचःशय्योदकस्पर्शनान्याकाल-मनूचानेषु द्व्यहं त्र्यहं षडहं द्वादशाहं वा गुरुष्व-म(न)शनं(न)वर्जं संवत्सरं मातापितर्याचार्य इत्ये-के ॥ ४४ ॥

अत्र व्याख्यानं त्रुटितं भाति ॥ ४४ ॥

ब्राह्मणाञ्छुचीन्मन्त्रवतः सर्वकृत्येषु भोजयेत् ॥ ४५ ॥

एकान्ते विधिप्रतिषेधानुसारिणः शुचयः । तान् । मन्त्रवतोऽधीतवेदान् । श्रौतेषु गार्ह्येषु स्मार्तेषु च कर्मसु दैवेषु पित्र्येषु मानुषेषु भोजयेत् । ‘ अन्ते ततो ब्राह्मणभोजनम् ’ इति स्मृत्यन्तरे दर्शनात् ॥ ४५ ॥

देशतः कालतः शौचतः सम्यक्प्रतिगृ(ग्र)हीतृत इति दानानि प्रतिपादयेत् ॥ ४६ ॥

सप्तम्यर्थे तसिल् । देशः प्रयागादिः । कालः सूर्यग्रहणादिः । शौचं कृच्छ्रादिसमाप्तिः । समीचीनः प्रतिग्रहीता ‘ तुल्यगुणेषु [व]योवृद्धः श्रेयान् ’ इत्यादिः । एतेषु दानानि देयानि प्रतिपादयेद्दद्यादिति ॥ ४६ ॥

यस्याग्नौ न हूयते यस्य चाग्रं न दीयते न तद्भोक्तव्यम् ॥ ४७ ॥

यस्यान्नस्यैकदेशोऽग्नौ न हूयते यस्य चोद्धृतस्याग्रं न दीयते न तद्भोक्तव्यम् ॥ ४७ ॥

न क्षारलवणहोमो विद्यते ॥ ४८ ॥

यद्भक्ष्यमाणमन्नं पश्यतो लालोत्पद्यते तत्क्षारं सुध(धा)क्रिकुचादि । क्षारलवणसंसृष्टं न तद्धोतव्यम् ॥ ४८ ॥

तथाऽयज्ञसंसृष्टस्य ॥ ४९ ॥

प(अव)रान्नमित्यापस्तम्बः । अयज्ञं कुलत्थान्नम् । तत्संसृष्टस्यान्नस्य होमो न विद्यते ॥ ४९ ॥

अथ यस्यैवंविधमेव भोज्यमुपस्थितं तस्य कथं भोजनं तत्राऽऽह—

अहविष्यस्य होम उदीचीनं [उष्णं] भस्मापोह्य तस्मि-
ञ्जुहुयाद्धुतमहुतं चाग्नौ भवति ॥ ५० ॥

औपासनात्पचनाद्वाऽग्नेरुदीचीनं भस्मापोह्योष्णं तस्मिन्भस्मनि जुहुयाद्वैश्वदेवहोमोक्त-मन्त्रक्रम इति ॥ ५० ॥

उत्तरे द्वे सूत्रे स्पष्टार्थे—

न स्त्री जुहुयात् ॥ ५१ ॥

नानुपेतः ॥ ५२ ॥

॥ ५१ ॥ ५२ ॥

आऽन्नप्राशनाद्गर्भा नाप्रयता भवन्ति ॥ ५३ ॥

अन्नप्राशनात्प्राक् गर्भा बाला अप्रयता न भवन्ति रजस्वलादिस्पर्शेऽपि । गौतम-स्त्वपां मार्जनमिच्छति । यथाऽऽह—अपां मार्जनं(न)प्रधावनावोक्षणेभ्य इति ॥ ५३ ॥

आ परिसंवत्सरादित्येके ॥ ५४ ॥

यावत्संवत्सरो न पूर्येत तावन्नाप्रयता गर्भा इत्येके मन्यन्ते ॥ ५४ ॥

यावता वा दिशो न प्रजानीयुः ॥ ५५ ॥

यावद्दिग्भागज्ञानं नास्ति तावन्नाप्रयता भवन्ति ॥ ५५ ॥

ओपनयनादित्येके ॥ ५६ ॥

उपनयनादर्वाङ् नाप्रयता इत्यपरे मन्यन्ते ॥ ५६ ॥

तत्रोपपत्तिः—

अत्र ह्यधिकारः शास्त्रैर्भवतीति ॥ ५७ ॥

यस्मादत्रोपनयने विधिनिषेधशास्त्रैरधिकारो भवति । इतिकरणं हेतौ ॥ ५७ ॥

सा निष्ठा ॥ ५८ ॥

उपनयनमपि परामृशतः स्वशब्दस्य निष्ठाशब्दसामानाधिकरण्यात्स्त्रीलिङ्गता । सा निष्ठा तदुपनयनमवसानमनधिकारस्येति ॥ ५८ ॥

स्मृतिश्च ॥ ५९ ॥ (ख० ८) ॥

इति सत्याषाढहिरण्यकेशिश्रौतसूत्रे(धर्मसूत्रापरपर्याये)
सप्तविंशप्रश्ने तृतीयः पटलः ॥ ३ ॥

अस्मिन्नर्थे स्मृतिरपि भवति—प्रागुपनयनात्कामचारवादभक्षइति ॥५९॥(ख०८)॥

इति सत्याषाढहिरण्यकेशिधर्मसूत्रव्याख्यायां महादेवदीक्षितविरचिताया-
मुज्ज्वलायां वृत्तौ सप्तविंशप्रश्ने तृतीयः पटलः ॥ ३ ॥

अथ चतुर्थः पटलः ।

भिक्षणे निमित्तमाचार्यो विवाहो यज्ञो माता-
पित्रोर्बुभूषा(र्षा)त्मभे(भै)षज्यमिच्छतश्चार्हतश्च
नियमविलोपे ॥ १ ॥

भिक्षणं याचनम् । तत्राऽऽचार्यो निमित्तम् । बुभूषा(र्षा) पोषणेच्छा । स्वस्य व्याध्या-
दिप्रतीकारमिच्छतः । अर्हतो विद्यावतोऽग्निहोत्रादौ नियमे योग्यस्यार्थाभाव-
स्तल्लोपः ॥ १ ॥

तत्र गुणान्समीक्ष्य यथाशक्ति देयम् ॥ २ ॥

तत्रैवंभूते भिक्षणे याचमानानां श्रुतवित्तादिकान्गुणान्समीक्ष्य शक्त्यनुरूपमवश्यं देयम् । अदानेन प्रत्यवायात् । गौतमस्तु निमित्तान्तरमप्याह—'गुर्वर्थनिवेशौषधाय वृत्तं क्षीणं यक्ष्यमाणाध्ययनाध्वसंयोगवैश्वजितेषु द्रव्यसंविभागो बहिर्वेदिभिक्षमाणेषु कृता-न्नमितरेषु' इति । वैश्वजितो विश्वजिद्यागस्य कर्ता सर्वस्वदक्षिणः ॥ २ ॥

इन्द्रियप्रीत्यर्थस्य तु भिक्षणमनिमित्तं न तदा-
द्रियेत ॥ ३ ॥

इन्द्रियद्वाराऽऽत्मनः प्रीतिरिन्द्रियप्रीतिः । तामर्थयमानो यो भिक्षेत स्रक्चन्दनादि तन्मूल्यं वा । तस्य तद्भिक्षणं नियमेन दानस्य निमित्तं न भवति । तस्मान्न तदाद्रि-येत । अन्नदानेऽपि न प्रत्यवायः । अन्नप्राप्त्यभावात् । विवाहो द्वि[ती]यो न निमि-त्तम् । तस्यां प्रथमायां धर्मप्र[जा]६(सं)पन्नायाम् । तदर्थमिदं वचनम् ॥ ३ ॥

स्वकर्म ब्राह्मणस्याध्ययनमध्यापनं यज्ञो याजनं
दानं प्रतिग्रहणं दायाद्यं शिलोञ्छः ॥ ४ ॥

सर्ववर्णानां स्वधर्मानुष्ठानं(न) इत्युक्तम् । ते स्वधर्मा उच्यन्ते । पुत्रादिभ्यो दीयत इति दायः । तमादत्त इति दायादः । तस्य भावो दायाद्यं दायस्वीकारः । क्षेत्रादिषु पतितानि मञ्जरीभूतानि ततश्च्युतानि वा ध(धा)न्यानि शिलशब्दार्थः । तेषामुञ्छनमङ्गुलीभिर्नखैर्वाऽऽदानं शिलोञ्छः । एतान्यप्यध्ययनादीन्यष्टौ ब्राह्मणस्य स्वकर्म । तेषु यज्ञदानाध्ययनानि त्रिणि द्विजातिसमानकर्तव्यानि नियम्यन्ते । इतरा- ण्वा(ण्य)र्थितया द्रव्यार्जनं(ने) प्रवृत्तस्योपायान्तरानिवृत्त्यर्थान्युपदिश्यन्ते । अध्या- पनादिभिरेव द्रव्यमार्जयेन्न चौर्यादिभिरिति ॥ ४ ॥

अन्यच्चापरिगृहीतम् ॥ ५ ॥

यच्चाप्यन्यत्केनाप्यपरिगृहीतमारण्यं मूलफलादि तेनापि जीवेदिति प्रकरणाद्गम्यते । एतेन विधिर्व्याख्यातः ॥ ५ ॥

एतान्येव क्षत्रियस्याध्यापनयाजनप्रतिग्रहणानी- ति परिहाप्य दण्डयुद्धाधिकानि ॥ ६ ॥

एतान्येव क्षत्रियस्य स्वकर्म, अध्यापनादीनि त्रीणि वर्जयित्वा दण्डलब्धयुद्धं चाधिकम् ॥ ६ ॥

क्षत्रियवद्वैश्यस्य दण्डयुद्धवर्जं कृषिगोरक्ष(क्ष्य)- वणिज्याधिकम् ॥ ७ ॥

गवां रक्ष्यं गोरक्ष्यम् । भावे ण्यत् । वणिजो भावो वणिज्या क्रयविक्रयव्यवहारः । कुसीदं [च] । 'दूतवणिग्भ्यां च' इति यः ॥ ७ ॥

ना[न]नूचानमृत्विजं वृणीते न पणमानम् ॥ ८ ॥

साङ्गस्य वेदस्याध्येता प्रवक्ता चानूचानः । ए(अ)तादृशमृत्विजं न वृणीते । नाप्येतावद्देयमिति परिभाषा भाष(रिभाष)माणम् ॥ ८ ॥

अयाज्योऽनधीयानः ॥ ९ ॥

अनधीतवेदं न याजयेत । तदानीमपेक्षितं मन्त्रं यथाशक्ति वाचयन् ॥ ९ ॥

क्षत्रियस्य युद्धं स्वकर्मेत्युक्तं तत्कथं कर्तव्यमित्याह—

युद्धे तद्योगा यथोपायमुपदिशन्ति तथा प्रति पत्तव्यम् ॥ १० ॥

युद्धविषये तथा तथा प्रतिपत्तव्यं यथा तद्योगा इत्युपायमुपदिशन्ति । तस्मिन्युद्धकर्मणि युद्धशास्त्रे येषां येषामभियोगाः ॥ १० ॥

न्यस्तायुधप्रकीर्णकेशप्राञ्जलिपराश(ङा)वृत्तानामार्या वधं परिचक्षते ॥ ११ ॥

न्यस्तायुधस्त्यक्तायुधः। प्रकीर्णकेशः केशानपि नियन्तुमक्षमः। प्राञ्जलिः कृताञ्जलिः। पराशवृत्तः पराङ्मुखः। सर्वे एते हीनाः। एतेषां युद्धे वधमार्याः स(सं)गर्हते(न्ते)। परिगणनादन्येषां वधे न दोषः। तथा च गौतमः—'न दोषो हिंसायामाहवे' इति। न्यस्तायुधः प्रकीर्णकेश इति केचित्पठन्ति सोऽपपाठः ॥ ११ ॥

शास्त्रैरधिगतानामिन्द्रियदौर्बल्याद्विप्रतिपन्नानां शास्ता निर्वेषमुपदिशेद्यथाकर्म यथोक्तम् ॥ १२ ॥

यथाशास्त्रं गर्भाधानादिभिः संस्कारैः संस्कृताः शास्त्रैरधिगता अधिकृतास्तेषामिन्द्रियदौर्बल्यादजितेन्द्रियतया विप्रतिपन्नानां स्वकर्मतश्च्युतानां निषिद्धेषु च प्रवृत्तानां शास्ता शासिताऽऽचार्यादिर्निर्वेषं प्रायश्चित्तमुपादिशेत्। यथाकर्म कर्मानुरूपम्। यथोक्तं धर्मशास्त्रेषु ॥ १२ ॥

तस्य चेच्छास्त्रमतिप्रवर्तेरन् राजानं गमयेत् ॥ १३ ॥

तस्य चेच्छास्त्रं शासनमतिप्रवर्तेरन्ननि(ति)वर्तेरन्(न्न) तत्र तिष्ठेयुः। स राजानं गमयेत्। एवमसौ करोतीति ॥ १३ ॥

राजा पुरोहितं धर्मार्थकुशलम् ॥ १४ ॥

स राजा धर्मशास्त्रेषु चार्थशास्त्रेषु च कुशलं पुरोहितं गमयेत्। विनीयतामसाविति ॥ १४ ॥

स ब्राह्मणान्नियच्छेत् ॥ १५ ॥

स पुरोहितो ब्राह्मणाश्चेदतिक्रमकारिणस्तान्नियच्छेत्। अनुरूपेषु प्रायश्चित्तेषु नियुञ्ज्यात् ॥ १५ ॥

अथ यदि तत्र ते न तिष्ठेयुस्तदा किं कर्तव्यमित्यत आह—

बलविशेषेण वधदास्यवर्जं नियमैरुपशोषयेत् ॥ १६ ॥

नियमैस्ततस्तान्बन्धनोपवासादिभिरुपशोषयेत्। बलविशेषेण बलानुरूपम्। वधदास्यवर्जम्। वधस्ताडनादिः। वधं दास्यं च वर्जयित्वा। सर्वमन्यद्बन्धनादिकं बलानुरूपं कारयेत्। यावत्ते मन्येरंश्चरेम प्रायश्चित्तम् ॥ १६ ॥

एवं ब्राह्मणविषयमुक्तमितरेष्वाह

इतरेषां वर्णानामाप्राणवियोगात् समवेक्ष्य तेषां कर्माणि दण्डाय प्रतिपद्येत ॥ १७ ॥

इतरेषां ब्राह्मणव्यतिरिक्तानां राजा पुरोहितेनोक्तं दण्डं स्वयमेव प्रतिपद्येत । तेषां कर्माणि समवेक्ष्य तदनुरूपमाप्राणवियोगात् । अभिविधावाकारः ॥ १७ ॥

न संदेहे दण्डं कुर्यात् ॥ १८ ॥

अपराधसंदेहे राजा दण्डं न कुर्यात् ॥ १८ ॥

किंतु—

सुविचितं कृत्वा दण्डं देवप्रश्नेभ्यो दण्डाय प्रतिपद्येत ॥ १९ ॥

आ देवप्रश्नेभ्यः साक्षिप्रश्नादिभिः शपथान्तैः सुविचितं यथा भवति तथा विचार्य निरूप्य राजा दण्डाय प्रतिपद्येतोपक्रमेत् ॥ १९ ॥

एवं कुर्वतः फलमाह—

एवं वर्तमानो राजोभौ लोकावभिजयति ॥२०॥

एवं पूर्वोक्तेन धर्मेण वर्तमानः । अत्र मनुः—

अदण्ड्यान्दण्डयन्राजा दण्ड्यांश्चैवाप्यदण्डयन् ।
अयशो महदाप्नोति प्रेत्य स्वर्गात्प्रहीयते ॥ इति ॥ २० ॥

गच्छतां प्रतिगच्छतां मृदि(?) पथि च समवाये केन कस्मै पन्था देय इत्याह—

राज्ञः पन्था ब्राह्मणेनासमेत्य ॥ २१ ॥

राजा चाभिषिक्तः । स यदि ब्राह्मणेन समेतो न भवति तदा तस्य पन्था दातव्यः । क्षत्रियैरप्यनभिषिक्तैः । एतदर्थमेवेदं वचनम् । अन्यत्र वर्णज्यायसो वक्ष्यमाणेनैव सिद्धम् ॥ २१ ॥

समेत्य तु ब्राह्मणस्यैव पन्थाः ॥ २२ ॥

आपदि शिष्यभूतब्राह्मणविषयमिदम् । शिष्यभूतेन ब्राह्मणेन समेत्य तस्यैव राज्ञा पन्था देय इति ॥ २२ ॥

यानस्यान्धस्य भाराभिनिहितस्याऽऽतुरस्य स्त्रिया
इति सर्वैर्दातव्यः ॥ २३ ॥

इतिशब्दात्स्थविरबालकृशादिभ्यश्च ॥ २३ ॥

अशिष्टपतितमत्तोन्मत्तानां[मात्म]स्वस्त्ययनार्थेन
दातव्यः ॥ २४ ॥ (ख० ९) ।

अशिष्टो मूर्खः । अन्ये प्रसिद्धाः । एतेषां सर्वैरेव जातीयैरुत्कृष्टैरपकृष्टैर्वर्णैश्च दातव्यः । आत्मस्वस्त्ययनमात्मत्राणम् । तेन प्रयोजनेन तदर्थं न त्वदृष्टार्थमित्यर्थः । अत्र कौण्डिन्येन देशस्य पथः प्रमाणमुक्तम्—'पञ्चारत्नी रथपथश्चत्वारो हस्तिपथः । द्वौ क्षुद्रपशुमनुष्याणाम्' इति ॥ २४ ॥ (ख० ९) ।

धर्मचर्यया जघन्यो वर्णः पूर्वं पूर्वं वर्णमापद्यते जातिपरिवृत्तौ ॥ २५ ॥

धर्मचर्यया स्वधर्मानुष्ठानेन जघन्यो वर्णः शूद्रादिः पूर्वं पूर्वं वैश्यादिमापद्यते प्राप्नोति । जन्मपरिवर्तनेन शूद्रो वैश्यो जायते । तत्रापि स्वधर्मनिष्ठः क्षत्रियो जायते । तत्रापि स्वधर्मपरो ब्राह्मण इति । एवं क्षत्रियवैश्ययोरपि द्रष्टव्यम् ॥ २५ ॥

अधर्मचर्यया पूर्वो जघन्यं वर्णमापद्यते जातिपरिवृत्तौ ॥ २६ ॥

पूर्वेण गतम् । महापातकव्यतिरिक्ताधर्मानुष्ठानविषयमेतत् । महापातकेषु 'स्तेनोऽभिशस्तः' इत्यादिना नीचजातिप्राप्तेरुक्तत्वात् ॥ २६ ॥

धर्मप्रजासंपन्ने दारे नान्यां कुर्वीत ॥ २७ ॥

श्रौतेषु गार्ह्येषु स्मार्तेषु कर्मसु श्रद्धा शक्तिश्च धर्मसंपत्तिः । प्रजासंपत्तिः पुत्रवत्त्वम् । एवंभूते दारे सति नान्याम् । दार इति प्रकृतम् । अन्यामिति स्त्रीलिङ्गो निर्देशः । तत्रार्थाद्भार्यामिति गम्यते । नान्यां भार्यां कुर्वीत नोद्वहेत् ॥ २७ ॥

अन्यतराभावे कार्या प्रागग्न्याधेयात् ॥ २८ ॥

धर्मप्रजयोरन्यतराभावे कार्योद्वाह्या । तत्रापि प्रागग्न्याधेयान्नोर्ध्वमाधानात् । एतदर्थमेवेदं वचनम् । उभयसंपत्तौ [न] कार्येत्युक्तेऽन्यतराभावे कार्येत्यस्यांशस्य प्राप्तत्वात् । यदा चान्यतराभावेऽपि कार्या तदा का शङ्कोभयाभावे ॥ २८ ॥

कार्या प्रागग्न्याधेयादित्यत्र हेतुः—

आधाने सती कर्मभिः संबध्यते येषामेतदङ्गम् ॥ २९ ॥

आधाने सती विद्यमानकर्मभिः संपद्यतेऽधिक्रियते । कैः । येषामग्निहोत्रादीनामेतदाधानमङ्गमुपकारकं तैः । आधानेऽत्र 'दारे सति' इति वचनात् । मृते तस्मिन्प्रागूर्ध्वं चाऽऽधानात्सत्यामपि पुत्रसंपत्तौ धर्मसंपत्त्यर्थं दारग्रहणं कर्तव्यमेव । तथा च मनुः—

भार्यायै पूर्वमारिण्यै दत्त्वाऽग्नीनन्त्यकर्मणि ।
पुनर्दारक्रियां कुर्यात्पुनराधानमेव च ।। इति ।

याज्ञवल्क्योऽपि—आहरेद्विधिवद्दारानग्नींश्चैवाविलम्बयन् ।। इति ।

वाचनिकेनैव [च]कारार्थेन युक्तः क्रमः । तेनैव तं न(तन्न) चोदनीयम् । यजमानः पूर्वमेवान्वारम्भणी[य]यासंस्कृतो न तस्यायं संस्कारः पुनरापादयितुं शक्यः । भार्या च पूर्वमेव संस्कृता न तस्यां(स्या) दर्शपूर्णमासादिष्वधिकारः । स कथं तया तैर्यष्टुमर्हतीत्यन्वारम्भणीयाजन्यश्च संस्कारो यदि संयोगवदुभयनिष्ठस्तदा भार्याविनाशे नश्यतीति पुरुषस्यापि पुनः संस्कारो न लोपपरः । यान(न्य)न्वारम्भणीयाना(म)पेक्षते(न्ते) स्य(स्मा)र्तानि गार्ह्याणि तैरधिकारस्तस्या अप्यविरुद्धः ।

ननु च प्रागप्यग्न्याधानात्कर्मभिः संबध्यते गार्ह्यैस्तस्मा (ह्यैः स्मा)र्तैश्च तत्किमुच्यते, आधाने हि सती कर्मभिः संबध्यत इति । सत्यम् । तस्मादेव हेतुनिर्देशादवसीयते प्रागाधानात्सत्यामपि धर्मसंपत्तौ प्रजासंपत्तौ च रागान्धस्य कदाचिद्दारग्रहणे नातीव दोष इति । अथ यस्याऽऽहिताग्नेर्भार्या सत्येव कर्मसु श्रद्दधाना शक्ता वा न भवति पुत्राश्च मृता अनुत्पन्ना वा तस्य कथम् । परेषां युक्तो धर्मप्रजासंपन्न इति कर्मभिः संबध्यत इति च तदा कर्तव्यो विवाहः । भारद्वाजसूत्रस्याप्ययमेव विषयः । अथ यद्याहिताग्निरक्रियां कुर्वीत यदग्नीन्नो त्यजेयुर्लौकिकाः संपद्येरन्तस्य पुनरग्न्याधेयं कुर्वीतेत्याश्मरथ्यः । पुनराधेयमित्यालेखनः । पुनराधानमेव कुर्यादित्यौडुलोमिरिति ।। २९ ।।

सगोत्राय दुहितरं न प्रयच्छेत् ।। ३० ।।

कन्यागोत्रमेव गोत्रमस्य तस्मै कन्या न देया । [यथा] हारीताय हारीती वात्स्यायनाय वात्स्यायनीत्यादि ।। ३० ।।

मातुश्च योनिसंबन्धेभ्यः ।। ३१ ।।

मातुश्च योनिसंबन्धा ये कन्याया मातुलादयः । चकारात्परेऽप्येवं (पितुरप्येवम्) । तेभ्यो न देया कन्या । अत्र मनुः—

असपिण्डा च या मातुरसगोत्रा च या पितुः ।
सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने ।।
स्नात्वा समुद्वहेत्कन्यां सवर्णां लक्षणान्विताम् ।
यवीयसीं भ्रातृमतीमसगोत्रां प्रयत्नतः ।।
मातुः सगोत्रामप्येके नेच्छन्त्युद्वाहकर्मणि ।

जन्मनाम्नोरविज्ञाने उद्वहेदविशङ्कितः ॥
मातुः सपिण्डा यत्नेन वर्जनीया द्विजातिभिः ॥ इति ।

गौतमः—असमानप्रवरैर्विवाह ऊर्ध्वं सप्तमात्पितृबन्धुभ्यः' । वसिष्ठः—गृहस्थो विनीतक्रोधहर्षो गुरुणाऽनुज्ञातः स्नात्वाऽसमानार्षेयामस्पृष्टमैथुनामव[र]वयसीं सदृशीं भार्यां विन्देत पञ्चमीं मातृबन्धुभ्यः सप्तमीं पितृबन्धुभ्यः इति । हारीतः—चि(श्वि)त्री कुष्ठु(ष्ठु)दरी यक्ष्मामह्य (याव्य)ल्पायुरनार्षेयब्रह्मसमानार्षेयामित्येतानि, अपतितान्यपि कुलानि वर्जनीयानि भवन्ति । कुलानुरूपाः प्रजा भवन्तीत्यादितः षं(ष)डमज्ञा(याज्ञि)यत्वादनार्षेयमवेदत्वादब्राह्ममेककुलत्वात्समानार्षेयमिति । तस्मात्सप्त पितृतः परीक्ष्य पञ्च मातृतो नग्निकामश्रेष्ठां भ्रातृमतीं भार्यां विन्देत । पैठीनसिः—असमानार्षेयां [कन्यां वरयेत्] । पञ्च मातृतः परिहरेत्सप्त पितृत इति । त्रीन्मातृतः पञ्च पितृतो वा । याज्ञवल्क्यः—

अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् ।
अनन्यपूर्विकां कान्तामसमानार्षगोत्रजाम् ॥
पञ्चमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथा ॥

विष्णुः—असगोत्रायमसमानवप्रवरां विन्देत मातृतः पञ्चमात्पितृतः सप्तमात् ।

नारदः—स(आ)सप्तमात्पञ्चमाच्च बन्धुभ्यः पितृमातृतः ।
अविवाह्याः सगोत्राः स्युः समानप्रवरास्तथा ॥

शातातपः—परिणीय सगोत्रां तु समानप्रवरामथ ।
कृत्वा तस्याः समुत्सर्गमतिकृच्छ्रं विशोधनम् ॥
मातुलस्य सुतामूढा(द्वा) मातृगोत्रां तथैव च ।
समानप्रवरां चैव द्विजश्चान्द्रायणं चरेत् ॥

मनुः—पैतृष्वसेयीं भगिनीं स्वस्रीयां मातुरेव तु ।
मातुश्च भ्रातृसंबन्धां(तुस्तनयां) गत्वा चान्द्राय' चरेत् ॥
एतास्त्रिय(स्तिस्र)स्तु भार्यार्थे नोपयच्छेत्तु बुद्धिमान् ।
द्वितीये(ज्ञातित्वे)नानुपेयास्ताः पतन्ति(ति) स्वयंधन(ह्युपयन्नधः) ॥

सगोत्रां चेदुपयच्छेदमत्या मातृवदेतां बिभृयात् । सगोत्रां च गत्वा चान्द्रायणमुपदिशेत् । व्रते परिनिष्ठिजे(ते) चाब्राह्मणीं त्यजेत् । मातृवद्भगिनीवद्धर्मे न दुष्यति काश्यप (?) इति विज्ञायते । अथ संपातेऽविवाहः । तस्यायं (?) वर्जयेत् । बौधायनस्य तु प्रमाणं हि कर्तव्यम् । मानव्यो हि प्रजा इति च विज्ञायते ।

गोत्राणां तु सहस्राणि प्रयुतान्यर्बुदानि च ।
एतेन ~ (ऊनपञ्चाश)देवैषां प्रवरा ऋषिदर्शनात् ॥
एक एव ऋषिर्यावत्प्रवरेष्वनुवर्तते ।
तावत्समानगोत्रत्वमन्यत्राङ्गिरसां भृगोः ॥ इति ।

सुमन्तुः—' पितृपत्न्यः सर्वा मातरः । तद्भ्रातरो मातुलाः । तत्सुता मातुलसुताः । तस्मात्ता नोपगन्तव्या इति ॥ ३१ ॥

कन्यादानप्रसङ्गाद्विवाहभेदमाह—

बन्धुशीलश्रुतारोग्याणि बुद्ध्वा प्रजां सहत्वकर्मभ्यः प्रतिपादयेद्ब्राह्मे विवाहे शक्तिविषयेणालंकृत्य दद्यात् ॥ ३२ ॥

ब्राह्मणा सृष्टो ब्राह्मः । तस्मिन्विवाहे वरस्य बन्ध्वादीन्बुद्ध्वा परीक्ष्य प्रजां दुहितरं सहत्वकर्मभ्यः सहकर्तव्यानि यानि कर्माणि तेभ्यः तानि कर्तुं प्रतिपादयेत् । शक्तिविषयेण विभक्तिविषयेण । विभक्तिप्ररूपकोऽयं निपातः । यथाशक्ति तस्यार्थे द्रष्टव्यः । यथाशक्त्यलंकृत्य दद्यादित्येष ब्राह्मो विवाहः । प्रजासहत्वकर्मभ्य इति पाठे प्रजार्थं सहत्वकर्मार्थं चेति ॥ ३२ ॥

आर्षे दुहितृमते मिथुनौ गावौ देयौ ॥ ३३ ॥

ऋषिभिर्दृष्टविवाहे मिथुनौ गावौ देयौ । स्त्रीगवी पुंगवश्च दुहितृमते मिथुनौ देयौ । एष आर्षो विवाहः ॥ ३३ ॥

दैवे यज्ञतन्त्र ऋत्विजे प्रतिपादयेत् ॥ ३४ ॥

देवैर्दृष्टविवाहे यज्ञतन्त्रे वितत ऋत्विजे कर्मकुर्वते कन्यां दद्यात् । एष दैवो विवाहः ॥ ३४ ॥

मिथः कामात्सांवर्तेते स गान्धर्वः ॥ ३५ ॥

यत्र कन्यावरौ मिथो रहसि कामाद्रागात्परस्परं सांवर्तेते मिथुनी भवतः स गान्धर्वो विवाहः । समो दीर्घः पूर्ववत् । पु(अ)त्र संयोगादुत्तरकालं विवाहसंस्कारः कर्तव्यः ॥ ३५ ॥

यथाशक्ति द्रव्याणि दत्त्वा वहेरन्स आसुरः ॥ ३६ ॥

यत्र विवाहे कन्यावते यथाशक्ति द्रव्याणि दत्त्वा वहेरन्कन्यां स आसुरो विवाहः ।

' वित्तेनाऽऽनतिः[स्त्री] मना(ता)मासुरः ' इति गौतमः । कन्यायै गृहक्षेत्रादिदानेन विवाहो नाऽऽसुरः ॥ ३६ ॥

दुहितृमतः प्रोथयित्वा वहेरन्स राक्षसः ॥ ३७ ॥

प्रमथ्य यत्र वहेरन्स राक्षसो विवाहः । ' हत्वा भित्त्वा च शीर्षाणि रुदतीं रुदद्भ्यो हरेत्स राक्षसः ' इत्याश्वलायनः । अत्रापि विवाहसंस्कारः । द्वौ चापरौ विवाहौ शास्त्रान्तरेषूक्तौ । तत्राऽऽश्वलायनः—' सह धर्मं चरत इ(मि)ति प्राजापत्यः । सुप्तानां सुप्तां प्रमत्तानां(प्रमत्तां) वाऽऽहरेत्स पैशाचः ' इति । ताविह पृथङ्नोक्तौ । ब्राह्मराक्षसयोरन्तर्भावात् ॥ ३७ ॥

तेषां त्रय आद्याः प्रशस्ताः ॥ ३८ ॥

तेषां विवाहानां मध्य आद्यास्त्रयो ब्रह्मार्षदैवाः प्रशस्ताः । तत्रापि विशेषमाहाऽऽपस्तम्बः—पूर्वः पूर्वोऽतिशयेन प्रशस्त इति ॥ ३८ ॥

यथा युक्तो विवाहस्तथा युक्ताः प्रजा भवन्ति ॥ ३९ ॥

प्रशस्ते विवाहे जाताः प्रजाः प्रशस्ता भवन्ति । निन्दिते निन्दिताः । अत्र मनुः—

ब्र(ब्रा)ह्मादिषु विवाहेषु चतुर्ष्वेवानुपूर्वशः ।
ब्रह्मवर्चसिनः पुत्रा जायन्ते शिष्टसंमताः ॥
रूपसत्त्वगुणोपेता धनवन्तो यशस्विनः ।
पर्याप्तभोगा धर्मिष्ठा जीवन्ति च शतं समाः ॥
इतरेषु च जायन्ते नृशंसानृतवादिनः ।
तनया दुर्विवाहेषु ब्रह्मधर्मजुगुप्सिताः ॥ इति ।

प्राजापत्येन सह ब्राह्माद्याश्चत्वारः [ब्राह्मणस्य] । गान्धर्वराक्षसौ क्षत्रियस्य । आसुरस्तु वैश्यशूद्रयोः । पैशाचो न कस्यचिदिति ॥ ३९ ॥

उत्पादयितुरपि फलमाह—:

पुत्रेण लोकाञ्जयति पौत्रेणामृतं सूतेऽथ पुत्रस्य
पौत्रेण प्राप्नोति ब्रध्नस्य विष्टपं दौहित्रस्तत्प्राति
मुञ्चति यत्प्राप्तं महद्भयम् ॥ ४० ॥

लोकान्भूरादींस्त्रीन् । अमृतं महर्लोकः । ब्रध्नस्य विष्टपं जनलोकादि । सांसारिकं महद्भयं यत्तद्दुहितृपुत्रो नाशयति । स्पष्टमन्यत् ॥ ४० ॥

**ब्राह्मदेवास्त्वधिकारिणः पाणिमूढं ब्राह्मणेन नाप्रोक्षि-
तमभितिष्ठते ॥ ४१ ॥**

ब्राह्मणस्य पाणि[ना स]मूढ,मुपलिप्तं संमृष्टं वा प्रदेशमप्रोक्षितं नाभितिष्ठेत्। प्रोक्ष्यैवाभितिष्ठते(ष्ठेत्) ॥ ४१ ॥

अग्निं ब्राह्मणं चान्तरेण नातिक्रामेत् ॥ ४२ ॥

अग्नेर्ब्राह्मणस्य च मध्ये न गच्छेत् ॥ ४२ ॥

अनुज्ञाप्य वाऽतिक्रामेत् ॥ ४३ ॥

स्पष्टम् ॥ ४३ ॥

ब्राह्मणांश्च न ॥ ४४ ॥

अग्निमध्ये नातिक्रामेत् । अग्नेर्ब्राह्मणस्य मध्य इत्यर्थ ॥ ४४ ॥

अग्निमपश्च न युगपद्धारयेत् ॥ ४५ ॥

अग्निमुदकं च न युगपद्धारयेत् ॥ ४९ ॥

अग्नीनां संनिवापं च वर्जयेत् ॥ ४६ ॥

पृथगवस्थितानामग्नीनामेकत्र समावपनं न कुर्यात् । अग्नावग्निं न क्षिपेदि-त्यन्ये ॥ ४६ ॥

अवचनात् ॥ ४७ ॥

विना वचनम् । वचने सति तु कुर्यात् ॥ ४७ ॥

**प्रतिमुखमग्निमाह्रियमाणं नाप्रतिष्ठितं भूमौ प्रद-
क्षिणी कुर्वीत ॥ ४८ ॥**

यदास्व(ऽस्य) गच्छतः प्रतिमुखमग्निराह्रियते तदा न तं प्रदक्षिणी कुर्यात् । स चेद्भूमौ प्रतिष्ठितो न भवति । प्रतिष्ठिते त्वग्नौ प्रदक्षिणी कुर्यात् ॥ ४८ ॥

पृष्ठतश्चाऽऽत्मनः पाणी न संश्लेषयेत् ॥ ४९ ॥

स्वे पृष्ठभागे स्वपाणिद्वयं न संश्लेषयेत् । न बध्नीयात्स्वयम् ॥ ४९ ॥

**सूर्याभ्युदितोऽहनि नाश्नीयाद्वाग्यतोऽह-
स्तिष्ठेत् ॥ ५० ॥**

सूर्योदयकाले सुप्तस्तत्र दिवा नाश्नीयात् । वाचंयमो दिवा च स्यात् । रात्रावेवा-श्नीयादित्यर्थः ।

सुप्ते यस्मिन्नस्तमेति सुप्ते यस्मिन्नुदेति च ।
अंशुमानभिनिर्मुक्तोऽभ्युदितश्च यथाक्रमम् । इत्यमरः ॥ ५० ॥

सूर्याभिनिम्रुक्तो नाश्नन्वाग्यत आसीत श्वोभूत उदकमुपस्पृश्य वाचं विसृजेत् ॥ ५१ ॥

सूर्याभिनिम्रुक्तो नाश्नन्, अभुञ्जानस्तूष्णींभूतो रात्रिं सर्वामासीत । अथापरेद्युः प्रातः स्नात्वा वाचं विसृजेत् । अयमस्य निर्वेषः ॥ ५१ ॥

आ तमितोः प्राणमायच्छेदित्येके ॥ ५२ ॥

यावदङ्गानां ग्लानिर्भवति तावत्प्राणमायच्छेत्प्राणवायुमाकृष्य धारयेत् । प्राणायामं कुर्यादित्येके मन्यन्ते । शक्यप(क्त्यपे)क्षो विकल्पः । अत्र मनुः—

सव्याहृतिकां सप्रणवां गायत्रीं शिरसा सह ।
त्रिः पठेदायतप्राणः [प्राणायामः] स उच्यते ॥ इति ।

एवमावर्तयेद्यावद्ग्लानिः ॥ ५२ ॥

स्वप्नं वा पापकं दृष्ट्वा ॥ ५३ ॥

पापकः स्वप्नो दुःस्वप्नः । मर्कटास्कन्दनादिः । तं दृष्ट्वा ॥ ५३ ॥

अर्थं वा सिसाधयिष्यन् ॥ ५४ ॥

अर्थः प्रयोजनम् । तं दृष्टमदृष्टं च वा साधयितुमिच्छन् ॥ ५४ ॥

नियमातिक्रमे चान्यस्मिन् ॥ ५५ ॥

नियमानामुदङ्मुखो मूत्रं कुर्यादित्येवमादीनां व्यतिक्रमे चाऽऽ तमितोः प्राणमायच्छेदिति सर्वशेषः ॥ ५५ ॥

दोषफलसंशये न तत्कर्तव्यम् ॥ ५६ ॥

यस्मिन्कर्मणि कृते पक्षे दोषफलं संगृह्यते न तत्कुर्यात् । यथाऽसहाये देश एकाकिनो गमनमिति ॥ ५६ ॥

एवमध्यायानध्यायसंशये ॥ ५७ ॥

इत्युपसमस्तमप्यपेक्षते । अध्यायोऽनध्याय इति संशये न तत्कर्तव्यमिति । संधावन(नु)स्तनितमित्याद्युदाहरणम् । पूर्वस्यायं प्रपञ्चः ॥ ५७ ॥

---

१ 'अनाश्नन्' इति क. पुस्तके पाठः ।

न संशये प्रत्यक्षवद्ब्रूयात् ॥ ५८ ॥

संशये(यि)तमर्थमात्मनोऽज्ञानपरिहाराय प्रत्यक्षवन्निश्चितवन्न ब्रूयात् ॥ ५८ ॥

अभिनिम्रुक्ताभ्युदितकुनखी(खि)या(श्या)वदग्र(ग्रे)दिधिषुदिधिषूपतिपर्याहितपरिष्टिपरिवेत्तृपरिवित्तृ(त्ति)परिविविदानेषु चोत्तरोत्तरास्मिन्नशुचिकरनिर्वेषो गरीयान् ॥ ५९ ॥

आदितौ(तो) द्वौ गतौ । कुनखी कृष्णनखः । श्यावा दन्ता यस्य श्यावदन् विवर्णदन्तः । 'विभाषा श्यावारोकाभ्याम्'[1] इति दत्रादेशः । तस्यान्तलोपश्छान्दसः । ज्येष्ठायाम· नू(नू)ढायां पूर्वं [कनीय]स्या वोढा, अग्र(ग्रे)दिधिषुः । पश्चादितरस्या वोढा दिधिषूपतिः । ज्येष्ठेऽकृताधाने कृताधानः कनिष्ठः पर्याधाता ज्येष्ठः पर्याहितः । ज्येष्ठेऽकृतसोमयागे कृतसोमयागः कनिष्ठः पर्यष्टा(ष्टा) । ज्येष्ठः परीष्टः । अकृतविवाहे ज्येष्ठे कृतविवाहः कनिष्ठः परिवेत्तेति प्रसिद्धः । ज्येष्ठः परिवित्तिः । ज्येष्ठभार्यायामुपग(य)च्छमानः परिवित्ततरः । यस्मिन्नगृहीतभागे वा कनिष्ठ(ष्ठो) भागं गृह्णाति स ज्येष्ठः परिविविदा न चकारो विदानपर्याधातृप्रभृतीनां समुच्चयार्थः । एतेष्वभिनिम्रुक्तादिषु योऽयमु(उ)त्तरस्तस्मिंस्तस्मिन् द्वादशमासादिमास्यादि(सादि)शुचिकरनिर्वेषो यः पूर्वमुक्तस्तत्र गरीयान्गरीयान्भवति । पूर्वत्र पूर्वत्र लघीयान् अभिनिम्रुक्ताभ्युदितयोरनन्तरोक्तं प्रायश्चित्तद्वयमपि विकल्पेन भवति ॥ ५९ ॥

तच्च लिङ्गं चरित्वोद्धार्यमित्येके ॥ ६० ॥ (ख० १०) ॥

इति सत्याषाढहिरण्यकेशिश्रौतसूत्रे (धर्मसूत्रापरपर्याये) सप्तविंशप्रश्ने चतुर्थः पटलः ॥ ४ ॥

यस्मिन्कौनख्यादिके लिङ्गे यत्प्रायश्चित्तमुक्तं तच्चरित्वा तत्कौनख्यादिकं लिङ्गमुद्धरेदित्येके मन्यन्ते । अन्यत्र दाराग्निभ्य इति स्मृत्यन्तरम् ॥ ६० ॥ (ख० १०) ॥

इति सत्याषाढहिरण्यकेशिधर्मसूत्रव्याख्यायां महादेवदीक्षितविरचितायामुज्ज्वलायां वृत्तौ सप्तविंशप्रश्ने चतुर्थः पटलः ॥ ४ ॥

---

[1] (पा० सू० ५ । ४ । १४४) ।

अथ पञ्चमः पटलः ।

सह देवमनुष्या अस्मिँल्लोके प(पु)रा बभूवुरथ देवाः कर्मभिर्दिवं जग्मुरहीयन्त मनुष्यास्तेषां कर्माणि तथाऽऽरभन्ते सह देवैर्ब्रह्मणा चामुष्मिँल्लोके भवन्त्यथैतन्मनुः श्राद्धशब्दं कर्म प्रोवाच ॥ १ ॥

तत्र श्राद्धविधित्समानस्य प्ररोचनार्थमयमर्थवादः—पुरा किल देवाश्च मनुष्याश्चामुष्मिन्नेव लोके परा (सह) बभूवुः । अथ त(तं)सह सा(मा)[व]मसहमाना देवाः कर्मभिः श्रौतैर्गार्ह्यैः स्मार्तैश्च यथावदनुष्ठितैर्दिवं जग्मुः । मनुष्यास्तु तथा कर्तुमसमर्था अहीयन्त हीना अभवन् । इहैव लोके स्थिताः । एवं कर्मणां सामर्थ्यम् । अत इदानीमपि तेषां मनुष्याणां मध्ये ये तथा कर्माण्यारभन्ते कुर्वन्ति यथाऽऽरभन्ते(त) देवास्तै(ते) देवैर्ब्रह्मणा च सहामुष्मिँल्लोके भवन्ति । अथैवं हीनान्मनुष्यान्दृष्ट्वा मनुर्वैवस्वतः श्राद्धशब्दं श्राद्धमिति शब्दजात(ब्दचमान)मेतत्कर्म प्रोवाच ॥ १ ॥

किमर्थम्—

प्रजानिःश्रेयसा च ॥ २ ॥

तादर्थ्ये एषा चतुर्थी । प्रजानां निःश्रेयसार्थम् । निःश्रेयसा चेति च्छान्दसो यकारस्य षकारः । अपर आह—छान्दसो लिङ्गव्यत्ययः । प्रजा निःश्रेयसा चास्य स्वकर्मणः फलति ॥ २ ॥

तत्र पितरो देवता ब्राह्मणस्त्वाहवनीयार्थे ॥ ३ ॥

तत्र श्राद्धशब्दे कर्मणि पितरः पितृ[पितामहप्र]पितामहा देवताः । ब्राह्मणस्तु भुञ्जान आहवनीयकृत्ये वेदितव्यः । त्रीणि श्राद्धे करणानि । होमो ब्राह्मणभोजनं पिण्डदानं चेति । तत्र भोजने प्रधानत्वख्यापनार्थोऽयमर्थवादः ॥ ३ ॥

मासिश्राद्धमपरपक्षस्योत्तमेऽहनि ॥ ४ ॥

कर्तव्यमिति शेषः । अकरणे प्रत्यवायश्रवणान्नित्यम् । उत्तमेऽहन्यमावास्यायाम् । स्पष्टमाहाऽऽपस्तम्बः—'मासि मासि कार्यम्' । तदिदं कर्म मासे मासे कर्तव्यम् । वीप्सावचनाद्यावज्जीविकोऽभ्यास इति च व्याख्यातम् ॥ ४ ॥

अपराह्णः श्रेयान् ॥ ५ ॥

अपरपक्षस्येत्यनुवर्तते । अपरपक्षस्य यान्यहानि तेष्वपराह्णः प्रशस्तः ॥ ५ ॥

तथाऽपरपक्षस्य जघन्यान्यहानि ॥ ६ ॥

तथै(स्यै)व पक्षस्य यान्यहानि पञ्चदश तेषां यथोत्तरं श्रेयस्त्वम् ॥ ६ ॥

सर्वेष्वहःसु कृष्णपक्षस्य क्रियमाणे पितॄन्प्रीणाति
कर्तुस्तु कालाभिनियमात्फलविशेषः ॥ ७ ॥

गृह्येऽपरपक्षस्य वाऽयुक्ष्वहस्त्वि(स्त्वि)ति विहितस्य नार्थवाद इति कृत्वाऽयुजानि विषमाणीति व्याचक्षते केचित् । नैतानि फलानि प्रयोगान्तरत्वात् ॥ ७ ॥

कोऽसावित्याह—

प्रथमेऽहनि स्त्रीप्रायमपत्यं जायते ॥ ८ ॥

यः प्रतिपदि नियमेन श्राद्धं करोति तस्यापत्ये प्रजासंताने स्त्रीप्रायं जायते । प्रायेण स्त्रियो जायन्ते ॥ ८ ॥

द्वितीयेऽस्तेनाः ॥ ९ ॥

अचोराः पुत्रा जायन्ते ॥ ९ ॥

तृतीये क्षुद्रपशुमान् ॥ १० ॥

क्षुद्राः पशवोऽजादयस्तद्वान्कर्ता भवति ॥ १० ॥

चतुर्थे ब्रह्मवर्चसिनः ॥ ११ ॥

पुत्रा ब्रह्मवर्चसिनः । व्रताध्ययनसंपत्तिर्ब्रह्मवर्चसम् । आपस्तम्बस्तु विपरीतं फल-माह—तृतीये ब्रह्मवर्चसिनश्चतुर्थे क्षुद्रपशुमानिति । उत्तरत्राप्येकवचनेषु कर्तुर्वा(दो) द्रष्टव्यः ॥ ११ ॥

पञ्चमे पुमाꣳसो बह्वपत्यो भव्यापत्यो न चा[न]पत्यः प्रमीयते ॥ १२ ॥

पुमांस एव भवन्ति बहवश्च । भव्या रूपविद्या भवति । न चानपत्यः प्रमीयते । जीवत्स्वेव पुत्रेषु स(संनि)हितेषु च स्वयं म्रियते । न तेषु मृतेषु नापि देशान्तरगतेषु नापि स्वयं देशान्तरगत इति ॥ १२ ॥

षष्ठेऽध्वशीलोऽक्षशीलश्च ॥ १३ ॥

अध्वशीलः पान्थः । किंततः(कितवः) अक्षशीलः ॥ १३ ॥

सप्तमे कर्षे राद्धिः ॥ १४ ॥

कर्षः कृषिः । राद्धिः सिद्धिः ॥ १४ ॥

अष्टमे पुष्टिः ॥ १५ ॥

स्पष्टम् ॥ १५ ॥

नवम एकखुराः ॥ १६ ॥

अश्वादयः ॥ १६ ॥

दशमे व्यवहारे राद्धिः ॥ १७ ॥

व्यवहारो वाणिज्यं व्यवहारशास्त्रपरिज्ञानम् ॥ १७ ॥

एकादशे कृष्णायसं त्रपुसीसम् ॥ १८ ॥

कृष्णायसं कृष्णमयः । त्रपुसीसे लोहविशेषौ ॥ १८ ॥

द्वादशे पशुमान् ॥ १९ ॥

द्वादश्यां बहवः पशवो भवन्ति ॥ १९ ॥

त्रयोदशे पुमांसो बह्वपत्यो[बहुमित्रो] दर्शनीया-पत्यो युवमारिणस्तु भवन्ति ॥ २० ॥

त्रयोदश्यां बहवः पुत्रा मित्राणि च भवन्ति । अपत्यानि च दर्शनीयानि । किंतु ते पुत्रा युवमारिणो भवन्ति युवान एव म्रियन्ते । अयुवमार(रि)ण इत्यन्ये । युक्तं चैतत् ॥ २० ॥

चतुर्दशे आयुधे राद्धिः ॥ २१ ॥

संग्रामे जयः ॥ २१ ॥

पञ्चदशे पुष्टिः ॥ २२ ॥

स्पष्टम् ॥ २२ ॥

तत्र द्रव्याणि तिलमाष(षा) व्रीहियवा आपो मूलफलानि च ॥ २३ ॥

तत्र श्राद्धे तिलादिद्रव्याणि यथायथमवश्यमुपयोज्यानि तेषु फलविशेषे(षो) ब्राह्मणे नाऽऽह—

एतानि मासं प्रीणन्ति पितृलोके विज्ञायते स्नेहवति त्वेवान्ने तीव्रतरा पितॄणां तृप्तिर्द्राघीयांसं च कालम् ।

यद्वा तद्वाऽन्नं भवतु स्नेहवति तु तस्मिन्नाज्यादिभिरुपासिक्तं(क्ते) पितॄणां तीव्रतरा प्रीतिर्भवति । स(सा) च द्राघीयांसं कालमनुवर्तते ॥ २३ ॥

तथा धर्माहृतेन द्रव्येण तीर्थे प्रतिपन्नेन ॥ २४ ॥

धर्मार्जितं यद्द्रव्यं पात्रे च प्रतिपादितं तेनापि पूर्वोक्ता प्रीतिः ॥ २४ ॥

संवत्सरं गव्येन मांसेन प्रीतिः ॥ २५ ॥

गव्येन मांसेन पितॄणां संवत्सरं प्रीतिर्भवति ॥ २५ ॥

भूयांसमितो माहिषेण ॥ २६ ॥

माहिषेण मांसेन, इतः संवत्सराद्भूयांसं बहुतरं कालं प्रीतिर्भवति ॥ २६ ॥

एतेन ग्राम्याणां पशूनां माꣳसं मेध्यं व्याख्यातम् ॥ २७ ॥

एतेन माहिषेण गव्येन च मांसेनान्येषामपि ग्राम्याणामजादीनां मांसं मेध्यं व्याख्यातं पितॄणां प्रीतिकरमिति । मेध्यग्रहणं प्रतिषिद्धानां ग्रहणं मा भूदिति ॥ २७ ॥

खड्गोपस्तरणे खड्गमाꣳसेनाऽऽनन्त्यं कालम् ॥ २८ ॥

खड्गचर्मोपस्तरणेना(ष्वा)सनेषूपविष्टेभ्यो दत्तेन खड्गमांसेनानन्तं कालं पितॄणां तृप्तिर्भवति । स्वार्थे ष्यञ् ॥ २८ ॥

तथा शतबलेर्मत्स्यस्य माꣳसेन ॥ २९ ॥

शतबलिर्बहुशकलो(ल्को) रोहिताख्यः ॥ २९ ॥

तथा वार्ध्राणसस्य ॥ ३० ॥

व्याख्यातो वार्ध्राणसः । तस्य मांसेनाऽऽनन्त्यं कालं प्रीतिः ॥ ३० ॥

एतेनाऽऽरण्यानां पशूनां (ख० ११) मेध्यं माꣳसं व्याख्यातम् ॥ ३१ ॥

गतमेतत् ॥ ३१ ॥ (ख० ११) ।

प्रयतः प्रसन्नमनाः सृष्टो भोजयेद्ब्राह्मणान्ब्रह्मविदो योनिगोत्रमन्त्रान्तेवास्यसंबन्धान् ॥ ३२ ॥

प्रयतः स्नानादिना शुद्धः । प्रसन्नमना अव्याकुलचित्तः । सृष्ट उत्साहवान् । सृष्टश्चेद्ब्राह्मणवधेऽहत्वा प्रीतिदर्शनात् । '[1]वृत्तिसर्गतायनेषु क्रमः' इत्यत्र सर्ग उत्साहः । एवंभूतो ब्राह्मणान्भोजयेत् । कीदृशः । ब्रह्मविदो योन्यादिभिरसंबन्धान् । योनिसंबन्धा मातुलादयः । गोत्रसंबन्धाः सगोत्रादयः । मन्त्रसंबन्धा ऋत्विग्याज्याध्वर्य्वादयो द्विजन्माग्र्याश्च । अन्तेवास्य(सि)संबन्धाः शिष्याश्चाऽऽचार्याश्च ॥ ३२ ॥

नार्थापेक्षो भोजयेत् ॥ ३३ ॥

द्रव्याद्यपेक्षया न भोजनीयः ॥ ३३ ॥

गुणहान्यां तु परेषाꣳ समुदेतः सोदर्योऽपि भोजयितव्यः ॥ ३४ ॥

यदि परेऽगोत्रसंबन्धा वृत्तादिगुणहीना एवं लभ्यन्ते तदा समुदेतो वृत्तादिभिर्युक्तः सोदर्योऽपि भोजयितव्यः । किमन्ये मातुलादय इत्यपिशब्दार्थः ॥ ३४ ॥

एतेनान्तेवासिनो व्याख्याताः ॥ ३५ ॥

एतेन सोदर्येणान्तेवासिनो बहुवचननिर्देशाद्योन्यादिसंबन्धो(धा) व्याख्यातः(ताः) । अन्येषामलाभे समुदेता भोजयितव्या इति । अत्र मनुः—

---

[1] (पा० सू० १ । ३ । ३८) ।

एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः ।
अनुकल्पस्त्वयं ज्ञेयः सदा सद्भिरनुष्ठितः ॥
मातामहं मातुलं च स्वस्रीयं श्वशुरं गुरुम् ।
दौहित्रं विट्पतिं बन्धुमृत्विग्याज्यौ च भोजयेत् ॥ इति ॥ ३९ ॥

अथाप्युदाहरन्ति ॥ ३६ ॥

संबन्धिनो न भोज्या इत्यस्मिन्नर्थे धर्मज्ञा वचनमुदाहरन्ति ॥ ३६ ॥

संभोजनी नाम पिशाचभिक्षा नैषा पितॄन् गच्छति नोत देवान् ।
इहैव सा चरति क्षीणपुण्या शालान्तरे गौरिव नष्टवत्सा ॥३७॥

परस्परं भुञ्जतेऽस्यामिति संभोजनी । अधिकरणे ल्युट् । नामेदमस्याः पिशाचभिक्षायाः । सा न पितॄन्गच्छति । नापि देवान्गच्छति । किंतु क्षीणपुण्या परलोकप्रयोजनरहिता सती, इहैव लोके चरति । मृतवत्सा गौर्गृहाभ्यन्तर एव चरति न बहिर्गच्छति ॥ ३७ ॥

तद्व्याचष्टे—

इहैव संभुञ्जती दक्षिणा कुलाकुले(लं) विनश्यतीति ॥ ३८ ॥

संभुञ्जती परस्परभोजनस्य निमित्तभूता दक्षिणा श्राद्धदानक्रिया गृहाद्गृहं गत्वेहैव लोके नश्यतीत्यर्थ इति ॥ ३८ ॥

बहुषु तुल्यगुणेषूपस्थितषु कः परिग्राह्यः—

तुल्यगुणेषु वयोवृद्धः श्रेयान्द्रव्यकृशश्चेप्सन् ॥ ३९ ॥

यो वयोवृद्धः स तावद्ग्राह्यः । तत्रापि यो द्रव्यकृश ईप्सांल्लिप्समानश्च भवति स ग्राह्यः । यद्वा वयोवृद्धो ग्राह्योऽद्रव्यकृशोऽपि द्रव्यकृशोऽप्यवृद्धोऽपीति । द्वयोस्तु समवाये यथारुचीति ॥ ३९ ॥

पूर्वेद्युर्निवेदनम् ॥ ४० ॥

श्राद्धदिनात्पूर्वेद्युरेव ब्राह्मणेभ्यो निवेदितव्यं श्वः श्राद्धं भविता । तत्र भवताऽऽहवनीयार्थे प्रसादः कर्तव्य इति ॥ ४० ॥

अपरेद्युर्द्वितीयमामन्त्रणम् ॥ ४१ ॥

अपरेद्युः श्राद्धदिने द्वितीयमामन्त्रणं निवेदनं कर्तव्यम् । यदा (अद्य) श्राद्धमिति । ततस्तृतीयमामन्त्रणमिति गम्यते । अन्यथाऽपरेद्युरामन्त्रणमित्येव ब्रूयात् । स्पष्टमाहेदमापस्तम्बः—‘ अपरेद्युर्द्वितीयं तृतीयमामन्त्रणम् ’ इति । आमन्त्रणमाह्वानम् । भोजनकाले सिद्धमागम्यतामिति तृतीयं भवति ॥ ४१ ॥

त्रिः प्रायमेके श्राद्धमुपदिशन्ति ॥ ४२ ॥

न केवलं निवेदनमेव त्रिर्भवति । किं तर्हि । यच्च यावच्च श्राद्धे क्रियते तत्सर्वं त्रिरावृत्तमित्येके मन्यन्ते । अत्र पक्षे भोजनानामप्यावृत्तिस्तस्मिन्नेवापराह्णे ॥ ४२ ॥

यथा प्रथममेवं द्वितीयं तृतीयं च कर्तव्यम् ॥ ४३ ॥

येन प्रकारेण प्रथमश्राद्धमेवं द्वितीयं तृतीयं च कर्तव्यम् ॥ ४३ ॥

सर्वेषु वृत्तेषु सर्वतः शेषं समवदायाश्नीयात् ॥ ४४ ॥

सर्वेषु श्राद्धेषु त्रिष्वपि वृत्तेषु समाप्तेषु सर्वतस्त्रयाणां श्राद्धानां य ओदनशेषस्ततः समवदाय प्राश्नीयात् । सकृत्प्रयोगे तु श्राद्ध एकस्मिन्वृत्ते प्राश्नीयात् । अत्र प्रयोगः—पूर्वेद्युर्निवेदनम् । तद्वदपरेद्युः प्रातर्भोजनकाल आमन्त्रणम् । ततो होमादिपिण्डनिधानान्तमेकैकमपवर्ज्य ततः समवदाय प्राशनमिति ॥ ४४ ॥

उदीच्यवृत्तिस्त्वासनगतानां हस्तेषु तिलमिश्रोदपात्रानयनं तिलानुप्रकिरणं च ॥ ४५ ॥

प्रागुदञ्चौ विभजते हंसः क्षीरोदकं यदा(था) ।
विदुषां शब्दसिद्ध्यर्थं सा नः पातु शरावती ॥ इति । वैयाकरणाः ।

तस्याः शरावत्या उदकतीरवर्तिन उदीच्यास्तेषां वृत्तिराचारः । आसनेषूपविष्टानां ब्राह्मणानां हस्तेषूदपात्रानयनमुदपात्रादर्घ्यपात्रादप आदायार्घ्यदानमिति । अमुष्मै स्वधा नम इति गृह्योक्तेन प्रकारेणार्घ्यं दद्यात् । ततस्तिलाञ्श्राद्धभूमौ विकिरेत् । यद्यप्युदीच्यवृत्तिरित्युक्तं तथाऽपि प्रकरणपाठसामर्थ्यात्सर्वेषामेव भवति ॥ ४५ ॥

उद्धरिष्याम्यग्नौ च करिष्यामीत्यामन्त्रयते ॥ ४६ ॥

होमकालेऽनेन मन्त्रेण ब्राह्मणानामन्त्रयते ॥ ४६ ॥

काममुद्ध्रियतां काममग्नौ च क्रियतामित्यतिसृष्ट उद्धरेज्जुहुयाच्च ॥ ४७ ॥

अथ ब्राह्मणाः काममुद्ध्रियतां काममग्नौ च क्रियतामित्यतिसृजेयुः । तैश्चातिसृष्ट उद्धरेज्जुहुयाच्च । उद्धरणं नाम ब्राह्मणार्थं पक्वादन्यदन्नं कृत्वा तदन्यस्मिन्पात्रे पृथक्करोति । पृथगन्नकरणं ज्ञापितं सूत्रकारेणाष्टकाश्राद्धे ॥ ४७ ॥

श्वभिरपपात्रैश्च श्राद्धस्य(द)र्शनं परिचक्षते ॥ ४८ ॥

श्वभिरिति बहुवचनाद्ग्रामसूकरवराहादीनां तादृशानां ग्रहणम् । अपपात्राः पतिता-

दयः प्रतिलोमाश्च । तैश्च श्राद्धस्य दर्शनं परिचक्षते गर्हन्ते शिष्टाः । अतो यथा ते न पश्येयुस्तथा परिश्रिते[न] कर्तव्यमिति ॥ ४८ ॥

शिपिविष्टः परतल्पगाम्यायुधी[य]पुत्रः श्वित्री कुष्ठी वृषलीपतिः सर्वविक्रयी राजभृत्यः प्रज्ञातोत्पन्नो ब्राह्मण्यामित्येते श्राद्धे भुञ्जानाः पङ्क्तिदूषणा भवन्ति ॥ ४९ ॥

शिपिविष्टः खलतिः । विगतरे(शेफ) इत्यन्ये । परतल्पगामी परतल्पं गत्वाऽकृतप्रायश्चित्तस्तस्य ग्रहणम् । आयुधी(य)पुत्रः क्षत्रियवृत्तिमाश्रितो य आयुधेन जीवति ब्राह्मणस्तस्य पुत्रः । श्वित्री चित्रकुष्ठी । कुष्ठी प्रसिद्धः । वृषली शूद्रकन्या, अदत्ता रजस्वला वा । तस्याः पतिः । निषिद्धद्रव्यविक्रयी तिलकम्बलरसादिद्रव्यं न विक्रेतव्यं तस्य सर्वस्य विक्रेता । राजभृत्यो राज्ञः सकाशाद्भृतिं वेतनं गृह्णाति स राजभृत्यः । ब्राह्मण्यामेवोत्पन्नः सत्यस्यात्पादविसंदिधेः सततादुत्पन्न एवेति(?) । एते शिपिविष्टादयः श्राद्धे भुञ्जानाः पङ्क्तिं दूषयन्ति । अतस्ते न भोज्या इति ॥ ४९ ॥

अथाप्युदाहरन्ति । वेदाध्यायी पञ्चाग्निस्त्रिसुपर्णो ज्येष्ठसामिको ब्राह्मदेयानुसंतानी पञ्चैते पङ्क्तिपावनाः ॥ ५० ॥

वेदस्याध्ययनपरो वेदाध्यायी । पञ्चगार्हपत्याद्यग्नयोऽस्येति पञ्चाग्निः । त्रिसुपर्णश्चतुष्कपर्दा इत्यादिकस्तृचः । अन्ये तु ति(तै)त्तिरीयके ब्रह्ममेतु मामित्यादयस्त्रयोऽनुवाका इत्याहुः । तत्र हि य इमं त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यादिति श्रूयते पुरुषे वृत्तिः । ब्राह्मदेयानुसंतानी ब्राह्मो विवाहविशेषः 'ब्राह्मे विवाह आहूय दीयते शक्त्यलंकृता' इत्युक्तस्तद्देया या विप्रा तस्याः संतानं यस्य सः । आपस्तम्बस्तु 'त्रिमधुस्त्रिसुपर्णस्त्रिना(णा)चिकेतश्चतुर्मेधः पञ्चाग्निर्ज्येष्ठसामगो वेदाध्याय्यनूचानपुत्रः श्रोत्रिय इत्येते श्राद्धे भुञ्जानाः पङ्क्तिपावना भवन्ति' । मधुवाता इति त्रयं त्रिमधुः । त्रिना(णा)चिकेतोऽग्निस्तैत्तिरीयककठवल्लीशतपथेषु पठ्यते । तत्रि[त]यगतब्राह्मणमन्त्रान्यो वेद सः । तथा चतुर्मेधोऽश्वमेधपुरुषमेधसर्वमेधः(ध)पितृमेधान्वेद स तथा । गतमन्यत् । अनूचानपुत्रस्त्रैविद्यपुत्रः । श्रोत्रिय इत्यपि पठन्ति । तदादरार्थं द्रष्टव्यम् । एते श्राद्धे भुञ्जानाः पङ्क्तिं शोधयन्ति । वेदाध्यायीत्यस्याप्यनन्तरं यशब्दं पठन्ति । सोऽपपाठः । एतेन पञ्चाग्नीत्यविभक्तिपाठो व्याख्यातः । इति पङ्क्तिपावनाः । तदविरोधाद्ग्राह्यम् ॥ ५० ॥

न च नक्तꣳश्राद्धं कुर्वीत ॥ ५१ ॥

श्राद्धकर्मण्यारब्धे कारणाद्विलम्बे मध्ये यद्यादित्योऽस्तमियात्तदा श्राद्धशेषं न नक्तं कुर्वीत । अपरेद्युर्दिवैव कुर्वीत ॥ ९१ ॥

आरब्धे चाभोजनमासमापनात् ॥ ५२ ॥ (ख० १२) ।

पूर्वेद्युर्निवेदनप्रभृत्यातिलाञ्जलिदानान्मध्ये कर्तुर्भोजनप्रतिषेधः । श्राद्धशेषं परेद्युः समापयेत् ॥ ९२ ॥ (ख० १२) ।

तथा—

विलयनं मथितं पिण्याकं मधु माꣳसं च वर्जयेत् ॥ ५३ ॥

विलयनं नवनीतमलम् । यस्य दध्नो हस्तादिना मथनमात्रो न जलेन मिश्रणं तन्मथितम् । तथा च नैघण्टुकाः–'तक्रं ह्युदश्विन्मथितं पादाम्ब्वर्धाम्बु निर्जलम्' इति ॥ यन्त्रपीडितानां तिलानां कल्कः पिण्याकम् । मधुमांसे प्रसिद्धे । मांसमप्रतिषिद्धमपि । एतद्विलनयनादिकं वर्जयेत् ॥ ९३ ॥

कृष्णधान्यꣳ शूद्रान्नं च ये चान्येऽनाश्यसंमताः ॥ ५४ ॥

कृष्णधान्यं कृष्णकुलत्थादि न कृष्णा व्रीहयः । शूद्रान्नं शूद्रदत्तमन्नं पक्वमपक्वं च । ये चान्येऽनाश्यत्वेनाभोज्यत्वेन संमतास्तांश्च वर्जयेत् ॥ ५४ ॥

अहविष्यमनृतं क्रोधं येन च क्रोधयेत् ॥ ५५ ॥

अहविष्यं कोद्रवादि । अनृतं मिथ्यावादं(दः) । क्रोधः कोपः । येन च कृतेन क्रोधयेत्तद्वर्जयेत् ॥ ९९ ॥

स्मृतिमिच्छन्यशो मेधाꣳ स्वर्गं पुष्टिं द्वादशैतानि वर्जयेत् ॥ ५६ ॥

स्मृतिरविदितस्य स्मरणम् । यशः ख्यातिः । मेधा प्रज्ञा । स्वर्गपुष्टी प्रसिद्धे । स्मृत्यादिकमिच्छन्पूर्वोक्तानि द्वादश वर्जयेत् । स्मृत्यादिकमिच्छन्वर्जयेदिति गुणार्थोऽनुवादः । स्मृत्यादिकं फलं विधातुं द्वादशैतानीति वचनं विलनादेरपि ग्रहणार्थम् । केवलमहविष्यादिकमेवानन्तरं मा भूदिति ॥ ९६ ॥

अधोनाभ्युपरिजान्वाच्छाद्य त्रिषवणमुदकमुपस्पृशन्ननग्निपक्ववृत्तिरच्छायोपगतः स्थानासनिकः संवत्सरं व्रतं चरेदेतद(द)ष्टाचत्वारिꣳशत्संमितमित्याचक्षते ॥ ५७ ॥

अधोनाभ्युपरिजान्वाच्छाद्येति व्याख्यातम् । त्रिषवणं त्रिषु कालेषु प्रातर्मध्यंदिने सायमिति । उदकमुपस्पृशन्स्नानं कुर्वन् । अनग्निपक्ववृत्तिः,[वृत्तिः] शरीरयात्रा साऽग्नौ पक्केन न कार्या । अग्निग्रहणात्कालपक्वस्याऽऽम्रादेरदोषः । अच्छायोपगतश्छायामनुपगच्छन् । स्थानासनिकः स्थानासनवान् । दिवा स्थानं रात्रावासनं न कदाचिच्छयनम् । तत एतद्विलयनं मथितमित्यारभ्यानन्तरमुक्तं व्रतं संवत्सरमेतद्व्रतं चरेत् । एतद्व्रतमष्टाचत्वारिंशद्वर्षसामान्यं ब्रह्मचारिव्रतेन संमितं सदृशं यावत्तस्य फलं तावदस्यापीत्याचक्षते धर्मज्ञाः । न केवलं स्मृत्यादिकमेव प्रयोजनमिति । अपर आह—विलयनं मथितं पिण्याकमित्यादिकं व्रतान्तरं स्मृत्यादिकमस्य । अधोनाभीत्यादिकं तु संमितं व्रतमिति । एतद्ब्रह्मचारिणो गृहस्थस्य च भवति । तथा च बौधायनः—' अष्टाचत्वारिंश[त्संमि]तमित्याचते । तस्य तस्य संक्षेपः संवत्सरः । तत्संवत्सरव्रतं व्याख्यास्यामः । स यदि ब्रह्मचारी स्यान्नियमेन प्रतिपद्येत । अथ यद्यब्रह्मचारी स्यात्केशश्मश्रुलोमनखानि वापयित्वा तीर्थे गत्वा स्नात्वा ' इत्यादि ॥ ५७ ॥

नित्यश्राद्धम् ॥ ५८ ॥

अहरहः श्राद्धं वक्ष्यते तस्य नित्यश्राद्धमिति नाम ॥ ५८ ॥

बहिर्ग्रामाच्छुचयः शुचौ देशे सꣳस्कुर्वन्ति ॥ ५९ ॥

तन्नित्यश्राद्धं बहिर्ग्रामात्कर्तव्यम् । यस्यान्नसंस्कर्तारः शुचौ देशेऽन्नं संस्कुर्वन्ति । शुचय इति वचननाधिक्यार्थम् । 'आर्याः प्रयताः ' इति पूर्वमेव प्रायत्यस्य विहितत्वात् ॥ ५९ ॥

तत्र नवानि द्रव्याणि ॥ ६० ॥

॥ ६० ॥

कानि पुनस्तानि—

यैरन्नꣳ सꣳस्क्रियते येषु च भोज्यते ॥ ६१ ॥

यैर्भाण्डैरन्नसंस्कारः क्रियते येषु च कांस्यादिषु भोज्यते तानि नवानीति ॥ ६१ ॥

तानि च भुक्तवद्भ्यो दद्यात् ॥ ६२ ॥

तानि भाण्डानि कांस्यादीनि च भुक्तवद्भ्यो दद्यात् । एवं प्रत्यहम् ॥ ६२ ॥

समुदेताꣳश्च भोजयेत् ॥ ६३ ॥

समुदेतग्रहणं गुणाधिक्यार्थम् ॥ ६३ ॥

न चातद्गुणायोच्छिष्टं प्रयच्छेत् ॥ ६४ ॥

माण्डेषु यद्भुक्तशिष्टं तद(दि)होच्छिष्टम् । तदप्यतद्गुणाय भुक्तवतां ये गुणास्तद्र-हिताय न दद्यात् । तद्गुणायैव दद्यात् ॥ ६४ ॥

तदलाभ आह—

तानि भुक्तवद्भ्यो ददाति ॥ ६५ ॥

उच्छिष्टानि श्राद्धे भुक्तवद्भ्य एव दद्यात् ॥ ६९ ।

एवं संवत्सरम् ॥ ६६ ॥

एवमेतन्नित्यश्राद्धं संवत्सरं कर्तव्यमहरहः ॥ ६६ ॥

तेषामुत्तमं लौहेनाजेन कार्यम् ॥ ६७ ॥

तेषां संवत्सरस्याह्नामुत्तममहः समाप्तिदिनं लौहेन लोहितवर्णेनाजेन श्राद्धं कर्त-व्यम् । दृश्यते चात्रास्मिन्नर्थे लोहशब्दः । ' लोहस्तूपरो भवति । अथ तूपरः कृष्ण-सानं(रङ्)गो लोहितसारङ्गो वा ' इति । च[म]केषु चिद्ध(च भ)वति—' श्यामं च मे लोहं च मे ' इति ॥ ६७ ॥

मानं च कारयेत्प्रतिच्छन्नम् ॥ ६८ ॥

मानं धिष्ण्यं वेदिका । दृश्यं(श्यते) हि मिनोतेरयमस्मिन्नर्थे प्रयोगः—अग्रेणाग्निं चतुरस्रां वेदिं विमितं विमिन्वन्ति । पुरस्तादुन्नतं पश्चान्निम्नमिति । तस्यैवायमुपसर्ग-रहितस्य प्रयोगः । तन्मानं कारयेत्कर्मकरैः । प्रतिच्छन्नं तद्भवति तिरस्करण्यादिना । इदमपि ग्रामाद्बहिरेव ॥ ६८ ॥

तस्योत्तरार्धे ब्राह्मणान्भोजयेत् ॥ ६९ ॥

तस्य मानस्योत्तरस्मिन्नर्धे ब्राह्मणा भोजयितव्याः ॥ ६९ ॥

उभयान्पश्यति ब्राह्मणांश्च भुञ्जानान्माने च पितॄ-
नित्युपदिशन्ति ॥ ७० ॥

तस्यैवं कृतस्य कर्मणो महिम्ना, उभयान्पश्यति । कांश्च कांश्च ब्राह्मणांश्च भुञ्जानान् तत्तस्मिन्नेव च माने पितॄन्यथा ब्राह्मणान्भुञ्जानान्प्रत्यक्षेण पश्यते(ति) तथा माने समागतान्पितॄनपि प्रत्यक्षेण पश्यतीत्युपदिशन्ति धर्मज्ञाः ॥ ७० ॥

कृताकृतमत ऊर्ध्वम् ॥ ७१ ॥

अत ऊर्ध्वं मासिश्राद्धं कृताकृतम् । क्रियतां वा मा कारि । अकरणेऽपि न प्रत्य-वाय इति ॥ ७१ ॥

श्राद्धेन तृप्तिं हि वेदयन्ति पितरः ॥ ७२ ॥

हि यस्मादन्त्येऽहनि दर्शनमुपगच्छन्ति तच्छ्राद्धेन तृप्तिं हि वेदयन्ति ज्ञापयन्ति। तस्मात्कृताकृतामिति ॥ ७२ ॥

अथ पुष्टिकामस्य प्रयोगः। पुष्टिकाम इत्यादिसमुदेतांश्च भोजयेदित्यन्त एकः—

पुष्टिकामस्तिष्येण गौरसर्षपाणां चूर्णानि कारयित्वा तैः पाणिपादं प्रक्षाल्य कर्णौ मुखं प्रास्य यद्वातो नातिवाति तदासनोऽजिनं बस्तस्य प्रथमः कल्पो दक्षिणाभिमुखो वाग्यतो भुञ्जीत ॥ ७३ ॥

पुष्टिकामः पुरुषो वक्ष्यमाणं प्रयोगं कुर्यात्। तिष्येण '[1] नक्षत्रेण च(त्रे च) लुप्याधिकारेण(पि ' इत्यधिकरणे) तृतीया। नक्षत्रेण गौराणां सर्षपाणां संबन्धीनि चूर्णानि कर्मकरैः कारयेत्। कारयित्वा तैश्चूर्णैः पाणी पादौ कर्णौ मुखं च प्रक्षालयेत्। प्रक्षाल्य चूर्णशेषं प्रास्येद् विकिरेत्। एतत्प्रतितिष्यम्। विशेषकृत्यं प्रत्यहं कर्तव्यम्। प्रास्य च यद्वातो नातिवाति तदासनः। अ(यद)धो नातीत्य वाति तदासनस्तादृगासनः। भुञ्जीतेति वक्ष्यमाणेन संबन्धः। अजिनं बस्तस्य प्रथमः कल्पः। तत्र बस्ताजिनमासनं स्यादिति मुख्यः कल्पः। दक्षिणाभिमुखो वाग्यतो भुञ्जीत ॥ ७३ ॥

अनायुष्यं त्वेवंमुखस्य भोजनं मातुरित्युपदिशन्ति ॥ ७४ ॥

एवं मुखस्य भोजनं तस्य भोक्तुर्या माता तस्या अनायुष्यं अनायुष्करमिति धर्मज्ञा उपदिशन्ति। तस्मान्मातृमता नैतद्व्रतं कार्यमिति ॥ ७४ ॥

औदुम्बरश्चमसः सुवर्णनाभो भोजनीयं प्रशस्तः ॥ ७५ ॥

चमु अदने। चम्यते यत्र[स]चमसः। भोजनीयं भोजनार्हं पात्रम्। स औदुम्बरस्ताम्रमयः। सुवर्णनाभः सुवर्णेन मध्येऽलंकृतः प्रशस्तो भोजने ॥ ७५ ॥

न चान्येनाभिभोक्तव्यः ॥ ७६ ॥

अभि धात्वर्थात् (नु)वादि। × भोक्तव्य इति पुंलिङ्गपाठेऽप्येष एवार्थः॥७६॥

यावद्ग्रास[2] संनयन्नस्कन्दयन्(न्ना)भिजिह्वि(ही)ताभिजिहीत वा कृत्स्नं ग्रासं ग्रसीत सहाङ्गुष्ठम्॥७७॥

---

१ (पा० सू० २ । ३ । ४५)। × 'अत्र उक्तादन्येन पात्रेण नाभिभोक्तव्यम्' इति ग्रन्थत्रुटिनः। तथा च सूत्रे ' भोक्तव्यम् ' इति नपुंसकलिङ्गपाठेन भाव्यमिति भाति। अत एव पुंलिङ्गपाठ इति साधु संगच्छते। २ क. पुस्तके ' अस्पन्दयन् ' इत्यधिकं विद्यते।

यावद्ग्रासं यावदेवाशितुं शक्यं तावदेव संनयन्पिण्डीकुर्वन्नस्कन्दयन्भूमावन्नमपातयन्कृत्स्नं ग्रासं ग्रसीतेत्यन्वयः । आस्ये ग्रासप्रवेशे यथाऽङ्गुष्ठोऽप्यनुप्रविशति तथा सर्वेणैव ग्रासानुक्तेन प्रकारेण ग्रसीतेति । मध्ये क्रियान्तरविधिः । नाभिजीहीत । भोजनपात्रं सव्येन पाणिना न विमुञ्चेत् । अभिजिहीत वा विमुञ्चेद्वा । किमर्थमिदम् । यावता न प्रकारान्तरं संभवति । सत्यम् । ' प्रक्रमात्तु नियम्यते ' इति न्यायेन [य]एव प्रकारः प्रथमे भोजने स एवान्तो(न्ता)दनुष्ठातव्य इति । एवमर्थमिदम् ॥ ७७ ॥

न च मुखशब्दं कुर्यात् ॥ ७८ ॥

भोजनदशां यावत् । इदमे(मि)त्रोत्तरम् ॥ ७८ ॥

पाणिं च नावधुनुयात् ॥ ७९ ॥

पाणिरत्र दक्षिणः ॥ ७९ ॥

आचम्योर्ध्वौ पाणी धारयेदा भोदकीभावात् ॥ ८० ॥

भुक्त्वाऽऽचम्य पाणी ऊर्ध्वौ धारयेत् । यावत्प्रगतोदकौ शुष्कोदकौ भवतः ॥८०॥

ततोऽग्निमुपस्पृशेत् ॥ ८१ ॥

भुक्त्वा चाग्निरुपस्प्रष्टव्यः ॥ ८१ ॥

दिवा च न भुञ्जीतान्यन्मूलफलेभ्यः ॥ ८२ ॥

मूलानि कन्दाः । फलान्याम्रादीनि । एतेभ्योऽन्यद्दिवा न भुञ्जीत । तद्भक्षणे न दोषः ॥ ८२ ॥

स्थालीपाकानुदेश्यानि वर्जयेत् ॥ ८३ ॥

तेन ब्राह्मणं विद्यावन्तं परिवेवेष्टि, इत्यादौ न भुञ्जीत । अनुदेश्यानि पितृभ्यो देवताभ्यश्च संकल्पितानि तानि [च] न भुञ्जीत ॥ ८३ ॥

नैयमिकं च श्राद्धꣳ स्नेहवदेव दद्यात् ॥ ८४ ॥ (ख० १३) ।

यन्नियमेन कर्तव्यं मासि श्राद्धं तत् स्नेहयुक्तमेव दद्यान्न शुष्कम् ॥ ८४ ॥ (ख० १३)।

तत्र विशेषः —

सर्पिर्मांसमिति प्रथमः कल्पः ॥ ८५ ॥

स्पष्टम् ॥ ८५ ॥

अभावे तैलꣳ शाकमिति ॥ ८६ ॥

सर्पिषोऽभावे तैलं मांसाभावे शाकम् । इतिशब्दाद्यच्चान्यदेवं युक्तम् ॥ ८६ ॥

मघासु चाधिकꣳ श्राद्धेन कल्पेन सर्पिर्ब्राह्मणान्भोजयेत् ॥८७॥

मघासु च पूर्वपक्षेऽपि श्राद्धविधानेन सर्पिर्मिश्रमन्नं ब्राह्मणान्भोजयेत् ॥ ८७ ॥

तिलानां द्रोणं येनोपायेन शक्नुयात्तथा दद्यात् ॥ ८८ ॥

येनोपायेनोपयोजयितुं शक्नुयात् । अभ्यङ्ग उद्वर्तने भक्ष्ये भोज्ये चेति तेनोपायेन श्राद्धे तिलानां द्रोणमुपयोजयेत् । तत्रैकैकस्य ब्राह्मणस्य द्रोणं द्रोणमुपयोजयितुमशक्यत्वात्समुदितानुपयोजयेत् ॥ ८८ ॥

समुदेतांश्च भोजयेत् ॥ ८९ ॥

व्याख्यातमिदम् ॥ ८९ ॥

अथ पुष्टिकामस्य(स्यै) वापरः प्रयोगः—

उदगयन आपूर्यमाणपक्षे तिष्येन(ण) स्थालीपाकं श्रपयित्वा महाराजमिष्ट्वा ब्राह्मणं भोजयित्वा पुष्टिकामः सिद्धिं वाचयेत् ॥ ९० ॥

पुष्टिकामः पुरुष उदगयन आपूर्यमाणपक्षे पूर्वपक्षसंबन्धिनि पुष्येण तस्मिन्नक्षत्रे स्थालीपाकं श्रपयेत् । श्रपयित्वा महाराजं वैश्रवणं यजेत । अग्निमुखान्ते महाराजाय स्वाहेति प्रधानहोमः । ततः स्विष्टकृदादि । ततः स्थालीपाकेन ब्राह्मणं भोजयेत् । उत्तरविवक्षयेदं वचनम् । भोजयित्वा सिद्धिं वाचयेत । पुष्टिरासि(स्त्वि)ति ॥ ९० ॥

एवमहरहरा परस्मात्तिष्यात् ॥ ९१ ॥

एवमिदं स्थालीपाकश्रपणादि सिद्धिवाचनान्तमहरहः कर्तव्यम् । अपरस्मात्तिष्याद्यावदपरस्तिष्य आगच्छति ॥ ९१ ॥

द्वौ द्वितीये ॥ ९२ ॥

द्वितीयतिष्ये प्राप्ते द्वौ भोजयेत् । अन्यत्समानमेवमा तृतीयात् ॥ ९२ ॥

त्रीꣳस्तृतीये ॥ ९३ ॥

तृतीये पुष्ये त्रीन्भोजयेत् । आ चतुर्थात् ॥ ९३ ॥

एवमभ्युच्चयेन संवत्सरम् ॥ ९४ ॥

एवमेतत्कर्म यावत्संवत्सरः पूर्येत तावत्कर्तव्यम् । ब्राह्मणभोजनमभ्युच्चयेन भवति । चतुर्थे(र्थ)प्रभृति चत्वारः पञ्चमप्रभृति पञ्चेत्यादि ॥ ९४ ॥

एवं कृते फलमाह—

महान्ते पोषं पुष्यति ॥ ९५ ॥

महत्यायुष्ये युक्तो भवति ॥ ९५ ॥

आदित एवोपवासः ॥ ९६ ॥

उपवासस्त्वादित एव पुष्ये भवति न प्रतिपुष्यम् ॥ ९६ ॥

आत्ततेजसां भोजनं वर्जयेत् ॥ ९७ ॥

आत्ततेजांसि तक्रवाजिनादीनि । तानि नोपभुञ्जीत ॥ ९७ ॥

भस्मतुषाधिष्ठानं च ॥ ९८ ॥

वर्जयेदित्येव । भस्मतुषांश्च नाधितिष्ठेन्नाऽऽक्रामेत् ॥ ९८ ॥

पदा पादस्य क्षालनं वर्जयेदधिष्ठानं च ॥ ९९ ॥

एकेन पदा पादस्य क्षालनमधिष्ठानं [च] वर्जयेत् ॥ ९९ ॥

पादयोः प्रेङ्खोलनं च ॥ १०० ॥

प्रेङ्खोलनमान्दोलनमितस्ततश्चालनम् ॥ १०० ॥

जानुनि वाऽत्याधानं च जङ्घायाः ॥ १०१ ॥

एकस्मिञ्जानुनीतरस्य(स्या) जङ्घाया अत्याधानमवस्था[प]नं च वर्जयेत् ॥ १०१ ॥

नखैश्च नखच्छेदनवादनस्फोटनानि ष्ठीवनान्य-कारणात् ॥ १०२ ॥

पर्वाङ्गुलीनां स्फोटनानि वर्जयेदकारणात् । कारणं वातादि[१] वादनस्फोटनानीति समासपाठेऽप्येष एवार्थः । ष्ठीवनान्यपि च वर्जयेत् । अकारणादित्येव ॥ १०२ ॥

यच्चान्यत्परिचक्षते ॥ १०३ ॥

यच्चान्यदुक्तव्यतिरिक्तं तृणच्छेदनादि परिचक्षते गर्हन्ते तदपि वर्जयेत् ॥ १०३ ॥

योक्ता च धर्मयुक्तेषु द्रव्यपरिग्रहेषु ॥ १०४ ॥

धर्माविरुद्धा ये द्रव्यपरिग्रहास्तेषु योक्तोत्पादयिता स्यात् ॥ १०४ ॥

---

१ 'ष्ठीवनानि चाकारणात्' इति क. पुस्तके चशब्दघटितः पाठः ।

प्रतिपादयिता च तीर्थे यन्ता चातीर्थे यतोऽ भयꣳ स्यात् ॥ १०५ ॥

तीर्थेषु तीर्थं गुणवत्पात्रं यत्र(ज्ञो) वा । तत्र द्रव्यस्यार्जितस्य प्रतिपादयिता स्यात् । यन्ता नियन्ताऽप्रदाता । अतीर्थे यन्ता च स्यात् । यतः पुरुषादप्रतिपादने न भयं स्यात् । भयसंभवे तु पिशुनादिभ्यो देयम् ॥ १०५ ॥

संग्रहीता च मनुष्यान् ॥ १०६ ॥

अर्थप्रदानप्रियवचनानुसारेण मनुष्याणां संग्रहणशीलः स्यात् ॥ १०६ ॥

भोक्ता च धर्माविप्रतिषिद्धान्भोगान् ॥ १०७ ॥

धर्माविप्रतिषिद्धा ये भोगाः स्रक्चन्दनस्थानभार्यासेवादयस्तेषां च भोगशीलः स्यात् ॥ १०७ ॥

एवंवर्तमान उभौ लोकावभिजयति ॥ १०८ ॥(ख०१४) ।

एवं महत्या पुष्ट्या युक्त उक्तप्रकारमनुतिष्ठन्नुभौ लोकावभिजयति । भोगेनेमं लोकं तीर्थे प्रतिपादनेन चामुं लोकम् ॥ १०८ ॥ (ख० १४) ।

सर्वाश्रमाणां समयपदानीत्युक्तं पुनस्ते क आश्रमा इत्याह—

चत्वार आश्रमा गार्हस्थ्यमाचार्यकुलं मौनं वानप्रस्थमिति ॥ १०९ ॥

आश्रमाभ्यन्तरेषु (श्राम्यन्त्येषु) पुरुषाः श्रेयोर्थिन इत्यास(त्याश्र)माः । एषा सामान्यसंज्ञा । उत्तरा विशेषसंज्ञाः । गृहे तिष्ठति कुटुम्बभरण इति गृहस्थः । तस्य भावो गार्हस्थ्यम् । स एक आश्रमः । आचार्यकुलम् । आचार्यकुले वासोऽप्येकः । मनु अवबोधने । मनुत इति मनुर्ज्ञानपरस्तस्य भावो मौनं संन्यासः परः । वनं प्रतिष्ठित इति वा(व)नप्रस्थः । स एव वानप्रस्थः । प्रज्ञादित्वात् । तस्य भावो वा वानप्रस्थम् । इतिशब्दः परिसमाप्त्यर्थः । एतावन्त एवाऽऽश्रमा इति । चतुर्णामेवोपदेशेऽपि चत्वार इति वचनं, ए(ऐ)काश्रम्यत्वादाचार्यैः प्रत्यक्षविधानाद्गार्हस्थ्यादि स्मृत्यन्तरोक्तं मा ग्राहीरिति ॥ १०९ ॥

तेषु [सर्वेषु] यथोपदेशमव्यग्रो वर्तमानः क्षेमं गच्छति ॥ ११० ॥

तेष्वाश्रमेषु सर्वेषु चतुर्ष्वपि यथोपदेशं यथाशास्त्रमव्यग्रः समाहितमना भूत्वा यो वर्तते स क्षेममभयं पदं गच्छति । अ[ने]नाऽऽश्रमविवेको(विकल्पो) ब्राह्मो(उक्तो)वेदि-

तव्यः । निःश्रेयसार्थिनाऽन्यतरस्मिन्नाश्रमे यथाशास्त्रमवहितेन वर्तितव्यमिति । तथा च गौतमः—'तस्याऽऽश्रमविकल्पमेके ब्रुवते' इति ॥ ११० ॥

सर्वेषामुपनयनप्रभृति समान आचार्यकुले ब्रह्मचारिवासः ॥ १११ ॥

उपनयनप्रभृति य आचार्यकुले वासोऽष्टाचत्वारिंशदादीनामन्यतमः सर्वेषामाश्रमाणां समानः ॥ १११ ॥

कस्मादाचार्यकुले वासः समान इति[चेत्]—

बुद्ध्वा कर्माणि यत्कामयेत तदारभेत ॥ ११२ ॥

प्रत्याश्रमं यानि कर्माणि तानि बुद्ध्वा गृहस्थस्यैवैतानि, एतेषाम[न]नुष्ठाने प्रत्यवायः फलं चेदम्, एषामेतानि शक्यान्यनुष्ठातुं नैतानीत्याचार्यादुपश्रुत्य यत्कर्म फलं वा कामयेत तदारभेत तमाश्रमं प्रतिपद्येतेति ॥ ११२ ॥

सर्वेषामनु(नू)त्सर्गो विद्यायाः ॥ ११३ ॥

विद्याया अनु(नू)त्सर्गः सर्वेषामाश्रमाणां समान एव । तत्र गृहस्थस्य तत्रैवमेव प्रपञ्चितत्वात् ॥ ११३ ॥

अध्ययनानन्तरं प्रविवासितस्याऽऽचार्यकुलस्य च रूपमाह—

यथा विद्यार्थस्य नियम एतेनैवाऽऽन्तमनुप्रयुञ्जानस्य वाऽऽचार्यकुले शरीरन्यासः ॥ ११४ ॥

यथा विद्यार्थस्योपकुर्वाणकस्य ब्रह्मचारिणः 'अथ ब्रह्मचर्यविधिः' इत्यारभ्याग्नीन्धनादिनियम उक्तोऽनेनैव नियमेनाऽऽन्तमा शरीरपातादनुप्रयुञ्जानस्योपासीनस्योपसदनं कुर्वत आचार्यकुले शरीरन्यासो देहत्यागो भवति ब्रह्मचारिणो नैष्ठिकस्य । तत्रैवाऽऽमरणादधितिष्ठेन्नाऽऽश्रमान्तरं गच्छेत् । यदि तमेवाऽऽश्रममात्मनः क्षेमं मन्यत इति । अत्र मनुः—

आचार्ये तु खलु प्रेते गुरुपुत्रे गुणान्विते ।
गुरुदारे सपिण्डे वा गुरुवद्वृत्तिमाचरेत् ॥
एषु त्वविद्यमानेषु स्थानासनविहारवान् ।
प्रयुञ्जानोऽग्निशुश्रूषां साधयेद्देहमात्मनः ॥
एवं चरति यो विप्रो ब्रह्मचर्यमविप्लुतः ।
स गच्छत्युत्तममस्थानं न चेहाऽऽजायते पुनः ॥ इति ॥ ११४ ॥

इति ब्रह्मचारिवासः ॥ ११५ ॥

एवं नैष्ठिकब्रह्मचारिणो वास आश्रमः ॥ ११५ ॥

अथ परिव्राजः ॥ ११६ ॥

अथानन्तरं परिव्राज(जो) धर्मा उच्यन्ते । दृष्टादृष्टार्थान्सर्वानेवाऽऽरम्भान्परित्यज्या- त्मज्ञः (ऽऽत्मलाभाय) संन्यासाश्रमं परिव्रजतीति परिव्राट् संन्यासी ॥ ११६ ॥

अत एव ब्रह्मचर्यवान्प्रव्रजति ॥ ११७ ॥

अत एव ब्रह्मचर्याश्रमादेव ब्रह्मचर्यवानविप्लुतब्रह्मचर्यः प्रव्रजति प्रव्रज्यां कुर्याद्यदि तत्रैव पक्वकषायो भवति । श्रूयते च ‘ ब्रह्मचर्यादेव प्रव्रजेत्, गृहाद्वा वनाद्वा ’ इति । ‘ यदहरेव विरजेत्तदहरेव प्रव्रजेत् ’ इति च । अत एवेति वचनाद्गृहाश्रमं प्रविष्टस्य तत्परित्यागे नाऽऽश्रमान्तरप्राप्तिराचार्यस्याभिमतेव लक्ष्यते । तत्रायमभिप्रायः—दारपरिग्रहे सति ‘यावज्जीवमग्निहोत्रं जुहुयात् ’ इति श्रुत्या विरुध्यते स कथं प्रव्रजेदिति । तस्मा- त्सत्यपि वैराग्ये काम(म्य)स्य कामपरित्यागेन नित्यानि नैमित्तिकानि च कुर्वन्प्रतिषि- द्धानि च वर्जयन्गृहस्थो मुच्यत इति । यथाऽऽह याज्ञवल्क्यः—

न्यायार्जितधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः ।
श्राद्धकृत्सत्यवादी च गृहस्थोऽपि विमुच्यते ॥ इति ।

अथ योऽनाहिताग्निस्तस्य विरक्तस्याऽऽत्मप्रव्रजने को विरोधः । तथाहि— ‘ जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते । ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः ’ इति । मनुरपि—

ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ।
अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः ॥ इति ।

मोक्ष आश्रमः । नन्वेवं ब्रह्मचर्यादपि प्रव्रज्या नोपपद्यते । अथवा तत्र ‘ यदहरेव विरजेत्तदहरेव प्रव्रजेत् ’ इति श्रुत्युक्तं प्रव्रजनं गृहस्थस्यापि विरक्तस्य युक्तं भवि- ष्यति । स्मर्यते च—

प्राजापत्यां निरुप्येष्टिं सार्ववेदसदक्षिणाम् ।
आत्मन्यग्नीन्समारोप्य ब्राह्मणः प्रव्रजेद्गृहात् ॥ इति ।

तथा यो गृहस्थो मृतभार्यो वृद्धः पुनर्दारक्रियायामसमर्थस्तस्यापि युज्यते प्रव्रज्या- यदहरेव विरजेदिति । एष एव कालः प्रव्रज्यायाः । सर्वमन्यद्विरक्तस्येति युक्तम् । एव-

कारस्तु सूत्रे श्रुत्यनुसारेण प्रयुक्तः । यदा गृहाद्वा वनाद्वेति । वाचैव (ब्रुवाणैव) श्रुतिः ब्रह्मचर्यादेव प्रव्रजेदित्याह तथेति ॥ ११७ ॥

तस्योपदिशन्ति ॥ ११८ ॥

तस्य परिव्राजः कर्तव्यमुपदिशन्ति धर्मज्ञाः ॥ ११८ ॥

अनग्निरनिकेतः स्यादशर्माऽशरणो मुनिः स्वाध्याय उत्सृज्यमानो वाचं ग्रामे प्राणवृत्तिं प्रतिलभ्योपनिष्क्रम्यानीहोऽनमुत्रश्चरेत् ॥ ११९ ॥

ब्रह्मचारिणः समिदाधानमग्निकार्यम् । गृहस्थस्यौपासनमग्निहोत्रहोमः । वानप्रस्थस्य 'क्रमेणैकेनाग्नीनाधाय' इत्यादिना विहितेऽग्नौ होमादि । तस्य तु नैवंविधं किंचिदग्निकार्यं ताव[दस्ती]त्यनग्निः । निकेतो वासस्थानं स्वभूतं तदभावादनिकेतः । शर्म सुखं तदस्य नास्तीत्यशर्मा । किंचिदपि शरणत्वेनाप्रपन्नो न वा कस्यचिच्छरणभूत इत्यशरणः । स्वाध्यायः प्रणवादिपवित्राणां जपः । तत्रैव वाचं विसृजेत् । अन्यत्र मौनः(नव्रतः)स्यात् । यावता प्राणा ध्रियन्ते सा प्राणवृत्तिः । तावतीं भिक्षां ग्रामे प्रतिलभ्य । एतावानस्य ग्रामे प्रवेशः । अन्यदा बहिर्वासः । इ(ई)हाऽर्थ(र्थाः) कृष्यादयः परलोकार्था जपहोमादयो यस्य न सन्ति सोऽनीहोऽनमुत्र इत्युक्तः । स एवंभूतश्चरेत् । एकस्मिन्स्थाने द्व्यहमात्रमपि न वसेत् । अत्र गौतमः—'न द्वितीयां मुनी रात्रिं ग्रामे वसेत्' इति । 'वर्षासु ग्रामवासशीलः' इति च ॥ ११९॥

तस्य मुक्तमाच्छादनं विहितम् ॥ १२० ॥

यत्परैर्मुक्तं परित्यक्तमयोग्यतया [तत्] तस्य विहितमाच्छादनम् । तदसावाच्छादयेन्निबध्नीयात् ॥ १२० ॥

सर्वतः परिमोक्षमित्येके ॥ १२१ ॥

सर्वैरेव वासोभिः परिमोक्षमेक उपदिशन्ति । न किंचिदपि वासो बिभृयान्नग्न एव चरेदिति । अपर आह— सर्वतो विधितो निषेधतश्चास्य परिमोक्षमेके ब्रुवत इति न किंचिदस्य वर्ज्यमिति ॥ १२१ ॥

एतदेवोदाहरणैः प्रपञ्चयति—

सत्यानृते सुखदुःखे प्रियाप्रिये वेदानिमं लोकममुं च परित्यज्याऽऽत्मानमन्विच्छेत् ॥ १२२ ॥

सत्यमेव वक्तव्यमिति यो नियमस्तं परित्यज्य। तथाऽत्र वक्तव्यमनृतं ताद्धि सत्याद्विशिष्यत इत्यादिके विषये नानृतं वक्तव्यमिति यो नियमस्तं न परित्यज्य। सुखमिष्टभोजनादिजन्यम्। दुःखं शीतवातादिजन्यम्। प्रियाप्रिये मित्रशत्रू। वेदान्स्वाध्यायाध्ययनम्। इमं लोकमैहलौकिकं काम्यं कर्म। अमुं च लोकं पारलौकिकं च काम्यं कर्म। सर्वमेतत्परित्यज्याऽऽत्मानमध्यात्मपटलोक्तमन्विच्छेदुपासीतेति। तदेवं ज्ञानबलाबलं विनाऽकृतविधिनिषेधा ये स्वैरं प्रवर्तन्ते सिद्धास्तेषां मतमुपन्यस्तम्॥ १२२॥

अथैषां स्वैरचारिणां किं तत आह—

बुद्धे क्षेमप्रापणमिति॥ १२३॥

आत्मनि बुद्धेऽवगते सति तदेव ज्ञानं सर्वमलं प्रक्षाल्य क्षेम प्रापयति। स्मर्यते च—

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा॥ इति॥ १२३॥

तदिदं नित्यं(रा)करोति—

तच्छास्त्रैर्विप्रतिषिद्धम्॥ १२४॥

यानि यतेरवश्यं(श्य)कर्तव्यकर्मप्रतिपादनपराणि शास्त्राणि तैरेतद्विप्रतिषिद्धम्।

तत्र मनुः—क्रुध्यन्तं न प्रतिक्रुध्येदाक्रुष्टं कुशलं वदेत्।
सप्तद्वारावकीर्णां च न वाचमकृ(नृ)तां वदेत्॥
न चोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया।
नानुशासनवादाभ्यां भिक्षां भिक्षेत कर्हिचित्। इति॥

अतो नियम(यति)मेव प्रकृत्य यानि कर्माणि विहितानि तानि कर्तव्यानि। यानि च निषिद्धानि तानि वर्ज्यानि॥ १२४॥

क्रुद्धैः(बुद्धे) क्षेमप्रापणं प्रकृत्य वाहिकत्वात्तानि विहितानि(?)। बुद्धे क्षेमप्रापणमित्येतच्च प्रत्यक्षविरुद्धमित्याह—

बुद्धे चेत्क्षेमप्रापणमिहैव न दुःखमुपलभेत॥ १२५॥

आत्मनो बोधमात्रेण चेत् क्षेम प्राप्यते तदा, इहैव शरीरे दुःखं नोपलभ्य(भेत)ते। ज्ञानि(नी)ने (न) चैतदस्ति। नहि ज्ञानेषु प्रतिषिद्धेषु कथं नहि त्वग्ज्ञानमात्रेण दुःखं नानुभूयत इत्यस्ति मनुः—अशरीरं नावसंप्रियाप्रिये न स्पृशत इति॥ १२५॥

[तरति] शोकमात्मविदित्यादिश्रुतिभ्य इहैव विशोकत्वं श्रुतं विरुध्येतेति चेत्तत्राऽऽह—

एतेन परं व्याख्यातम्॥ १२६॥

तत्त्वज्ञाने जातेऽपि दुःखिताया भावाद्दुःखक्षयो येन साधनेन भवति तदन्यत्परं ज्ञानोत्पत्तिसाधनमस्तीति व्याख्यातम् । तच्चाध्यात्मपटले सूचितम् । मैत्र्यादि चाऽऽसनाभ्यासेन वासनानाशः । अष्टाङ्गयोगेन मनोनाश इति । तदनुष्ठेयं कटाक्षमनिक्षिपन् । अष्टाङ्गयोगनिरतो मुच्यत इति ॥ १२६ ॥

अथ वानप्रस्थः ॥ १२७ ॥

अथानन्तरं वानप्रस्थाश्रम उच्यते ॥ १२७ ॥

अत एव ब्रह्मचर्यवान्प्रव्रजति ॥ १२८ ॥

प्रकर्षेण व्रजते (ति) । अपुनःप्रवेशाय वनं प्रतिष्ठत । इति । तथा च गौतमः— 'ग्रामं च न प्रविशेत् ' इति ॥ १२८ ॥

तस्योपदिशन्ति ॥ १२९ ॥

गतमेतदुत्तरं च ॥ १२९ ॥

एकाग्निरनिकेतः स्यादशर्माऽशरणो मुनिः स्वाध्याय उत्सृज्यमानो वाचम् ॥ १३० ॥

[ए,कस्यैकोऽग्निः । न तावदौपासनाग्निः । ब्रह्मचर्यत्वात् । तस्य लौकिकेऽग्नौ यथापूर्वं सायं प्रातः समिधमादध्यादित्येषोऽर्थो विवक्षितः । अपर आह—श्राम(व)णकेऽ(ना)ग्निमाधायेति । गौतमः—श्राम(व)णकं नाम वैखानससूत्रम् । तदुक्तेन प्रकारेणै एकोऽग्निराधेयः । तस्मिन्सायं प्रातरग्निकार्यमिति । अन्यद्गतम् ॥ १३० ॥

तस्याऽऽरण्यमाच्छादनं विहितम् ॥ १३१ ॥

अरण्ये भवमारण्यमजिनवल्कलादि ॥ १३१ ॥

ततो मूलैः फलैः पत्रैस्तृणैरिति वर्तयंश्चरत् ॥ १३२ ॥

ततो मूलफलादिभिर्वर्तयन्वृत्तिः प्राणयात्रा तां कुर्वंश्चरेच्चरणशीलः स्यात् ॥ १३२ ॥

अन्ततः प्रवृत्तानि ॥ १३३ ॥

मूलादिभिः स्वयं गृहीतैः किंचित्कालं वर्तयित्वाऽन्ततोऽन्ते प्रवृत्तानि स्वयमेव पतितानि तान्यभिनिश्चित्य तैर्वर्तयेदिति ॥ १३३ ॥

आपो वायुराकाशः ॥ १३४ ॥

कियन्तंचित्कालमब्भक्षस्ततो वायुभक्षस्तत आकाशं न किंचिद्भक्षयेदिति ॥ १३४ ॥

तेषामुत्तरोत्तरः संयोगः ॥ १३५ ॥ (ख० १५) ।

संयुज्यते संश्रीयत इति संयोगः । तेषां मूलादीनां मध्य उत्तरमुत्तरं द्रव्यं फलतो विशिष्टमिति ॥ १३५ ॥ (ख० १९)।

अथ वानप्रस्थस्यैवाऽऽनुपूर्व्यमेके उपदिशन्ति ॥ १३६ ॥

अथेति पक्षान्तरोपन्यासे। पूर्वं ब्रह्मचर्यादेव वनप्रवेश उक्तः । एके त्वाचार्यास्तस्यैव वानप्रस्थस्यैवाऽऽनूपूर्वं(र्व्यं) कर्माण्युपदिशन्ति ॥ १३६ ॥

विद्यां समाप्य दारं कृत्वाऽग्नीनाधाय कर्माण्यारभेत सोमावरार्ध्यानि यानि श्रूयन्ते ॥ १३७ ॥

ब्रह्मचर्यस्थितो विद्यां समाप्य गृहस्थो भूत्वाऽग्नीनाधाय कर्माणि कुर्यात् । कानि । सोमावरार्ध्यानि । अवराधयेत्स्वोर्ध्वं(अवरार्धं पश्चादर्धं तत्र भवोऽवरार्ध्यः) सोमोऽवरा र्यो (र्ध्यो) येषां तानि सोमावरार्ध्यानि । हविर्यज्ञाख्यानि चातुर्मास्यादीनि । हविर्यज्ञान्सोमं वेत्यर्थः । यानि श्रूयन्ते यानि श्रुतानि विहितानि ॥ १३७ ॥

गृहान्कृत्वा सप्रजः सदारः सहाग्निभिर्बहिर्ग्रामाद्वसेत् ॥ १३८ ॥

ग्रामाद्बहिररण्ये गृहान्कृत्वा सकुटुम्बैः सहैव चाग्निभिर्वसेत् । अस्मिन्पक्षे प्रागुक्तमेकाग्निरित्येतन्नास्ति ॥ १३८ ॥

एको वा ॥ १३९ ॥

अथवा पुत्रेषु भार्यां निक्षिप्य स्वयमेक एव वने वसेत् । अस्मिन्पक्षे ‘ प्राजापत्यां निरू(रु)प्येष्टिम् ’ इति परिव्राज उक्तेन न्यायेन श्रौताग्नीनात्मनि समारोप्य श्राम(व)णकेनाग्निमाधायैकाग्निर्भवेत् ॥ १३९ ॥

शिलोञ्छेन वर्तयेत् ॥ १४० ॥

व्याख्यातः शिलोञ्छः । (ते)न वर्तयेत्प्राणयात्रां कुर्यात् । इदं सकुटुम्बस्यैकाग्नेश्च साधारणम् । एकाकिन एवेत्यन्ये ॥ १४० ॥

संवत्सरावरार्ध्यं न चात ऊर्ध्वं प्रतिगृह्णीयात् ॥ १४१ ॥

यदा शिलोञ्छवृत्तिगतोऽत ऊर्ध्वं न किंचिदपि प्रतिगृह्णीयात् ॥ १४१ ॥

अभिषिक्तश्च जुहुयात् ॥ १४२ ॥

यदा जुहुयात्तदाऽभिषिक्तः स्नातो जुहुयात् । अनुवादोऽयं स्नाने विशेषं विधातुम् ॥ १४२ ॥

शनैरपोऽभ्यवेयादभिघ्नन्नभिमुख आदित्यमुदक-
मुपस्पृशेत् ॥ १४३ ॥

शनैरवेगेन जलाशयं प्रविशेत् । प्रविश्य चाभिघ्नन्हस्तेनोदकं ताडयेत् । उदकमुप-स्पृशेत्स्नायात् ॥ १४३ ॥

सर्वत्रैवोदकोपस्पर्शनविधिः ॥ १४४ ॥

सर्ववर्णाश्रमसाधारणमेतत् । तथा चोत्तरत्र तस्य ग्रहणम् ॥ १४४ ॥

क्षारलवणं(ण)मधुमांसानि च वर्जयेत् ॥ १४५ ॥

गतमेतत् ॥ १४५ ॥

तस्य द्वंद्वं पात्राणामेक उपदिशन्ति पाकार्थ-
भोजनार्थे वाससी परशुदात्रकाञ्चानाम् ॥१४६॥

यानि पाकार्थं ताम्रभाण्डादीनि यानि च भोजनार्थानि कांस्यादीनि तेषां सर्वेषां वा कांस्यादीनां चतुर्णामेकैकस्य विधाय द्वंद्वे द्रव्ये उत्पाद्य(द्ये) एकमु(क उ)पदि-शन्ति । काञ्चमपि वास्यादिति, उपकरणविशेषो दारुमयः ॥ १४६ ॥

एकैकमादायेतराणि दत्त्वाऽरण्यमवतिष्ठेत ॥ १४७ ॥

तेषां पाकादिसाधनानां द्रव्याणामेकैकं द्रव्यं स्वयमादायेतराणि च भार्यायै दत्त्वाऽ-रण्यमवतिष्ठेतोपतिष्ठेत्समाश्रयेदिति ॥ १४७ ॥

तस्यारण्येनैव होमा(मो) वृत्तिः प्रतीक्षाऽऽच्छा-
दनं विहितम् ॥ १४८ ॥

तस्य वानप्रस्थस्यारण्यप्रदे(त्वे)शादूर्ध्वमारण्येनैव निवासा(नीवारा)दिना होमो वृत्तिः प्रतीक्षाऽऽच्छादनं विहितम् । [वृत्तिः] प्राणयात्रा । प्रतीक्षाऽतिथिपूजा । आच्छा-दनं वस्त्रं वल्कलादिना ॥ १४८ ॥

येषु कर्मसु पुरोडाशाश्चरवस्ते कार्याः ॥ १४९ ॥

येषु दर्शपूर्णमासादिषु पुरोडाशा विहिता गृहस्थस्य तेष्वस्य तत्स्थाने चरवः कार्या न पशुबन्धादि(दौ) ॥ १४९ ॥

सर्वं चोपांशु सह स्वाध्यायेन ॥ १५० ॥

सर्वत्र कर्मकाण्डं साङ्गं प्रधानमुपांशु भवति। पारायणब्रह्मयज्ञोऽध्ययनेन सह तदप्यु-पांशु कर्तव्यम् ॥ १५० ॥

नारण्यमभ्याश्रावयेत् ॥ १५१ ॥

उपांशुवचनादेव सिद्धे वचनमाभिमुख्यप्रतिषेधार्थम् । तेनारण्यस्था यथा नाभिमुख्येन श्रृणुयुस्तावदुपांश्विति ॥ १९१ ॥

अग्न्यर्थꣳ शरणम् ॥ १५२ ॥

शरणं गृहम् । तदग्न्यर्थमेव कर्तव्यम् ॥ १९२ ॥

आकाशे स्वयम् ॥ १५३ ॥

स्वयमाकाश एव विशे(वसे)त् ॥ १९३ ॥

अनुपस्तीर्णे शय्यासने ॥ १५४ ॥

शयनमासनं चानुपस्तीर्णे देशे कुर्यात् । न नु(तु) किंचिदुपस्तीर्य ॥ १९४ ॥

नवे सस्ये प्राप्ते पुराणमनुजानीयात् ॥ १५५ ॥

नवे धान्ये प्राप्ते श्यामाकनीवारादौ प्राप्ते जाते पुराणं पूर्वसंचितं सस्यमनुजानीयात्परित्यजेत् । अत्र मनुः—

त्यजेदाश्वयुजे मासि उत्पन्नं(मुन्यन्नं) पूर्वसंचितम् ।
जीर्णानि चैव वासांसि पुष्पमूलफलानि च ॥ इति ॥ १९५ ॥

भूयाꣳसमिच्छन्प्रत्यहमेव पात्रेण सायं प्रातरर्थमाहरेत् ॥ १५६ ॥

इदमेकाकिनो वानप्रस्थस्य । भूयांसं नियममिच्छन्न सस्यं संचिनुयात् । किं तर्हि । प्रत्यहमन्वहमेव पात्रेण येन केनचित्सायं प्रातरर्थमदनीयमाहरेद्वनस्थेभ्य एव ॥१९६॥

एवं कियन्तंचित्कालं वर्जयित्वा—

ततो मूलैः फलैः पत्रैस्तृणैरिति वर्तयꣳश्चरेदन्ततः प्रवृत्तान्यापोवायुराकाश इत्युत्तर उत्तरः संयोगः फलतो विशिष्टः ॥ १५७ ॥ (ख० १६) ।

सर्वं गतम् । निरूपिता आश्रमाः ॥ १५७ ॥ (ख० १६) ।

अथेदानीं तेषामेव पक्षप्रतिपक्षरूपेण प्राधान्यमप्राधान्यं च निरूप्यते—

अथ पुराणे श्लोकावुदाहरन्ति । अष्टाशीतिसहस्राणि ये प्रजामीषिर ऋषयो दक्षिणेनार्यम्णः पन्थानं ते श्मशानानि भेजिरे ॥ १५८ ॥

प्रजामीषिरे प्रजानामिष्टान्यभ्यनन्दन् । अर्यम्णो यो दक्षिणेन पन्था दक्षिणेन मार्गस्तं प्राप्य छन्दो(छान्दोग्यो)क्तेन धिष्ण्या(धूमा)दिमार्गेण गत्वा पुनराभि(वि) संभूय

श्मशानानि भेजिरे मरणं प्रापुः । जायस्व म्रियस्वेत्याजयं(जीवं)जयीताचमाशे- दिह(?)इति गृहस्थानां निन्दा ॥ १९८ ॥

अष्टाशीतिसहस्राणि ये प्रजां नेषिर ऋषय उत्त- रेणार्यम्णः पन्थानं तेऽमृतत्वꣳहि भेजिरे ॥१५९॥

ये तु प्रजातन्तुं नाभ्यनन्दत(न्)उत्तरेण मार्गं प्राप्य शि(च्यार्चि)रामार्गेण गत्वाऽमृतत्वं विभाक्तिव्यत्ययः, अमृतत्वं हि भेजिरे । वचनव्यत्ययः । समर्थाः संपद्यन्ते ॥ १९९ ॥

इत्यूर्ध्वरेतसां प्रशꣳसाऽथापि संकल्पसिद्धयो भवन्ति ॥ १६० ॥

अपि च संकल्पसिद्धयो भवन्ति ॥ १६० ॥

तेषामूर्ध्वरेतसां तत्रोदाहरणम्—

यथा वर्षं प्रजादानं दूरे दर्शनं मनोजवता यच्चा- न्यदेवं युक्तम् ॥ १६१ ॥

यदि महत्यामनावृष्टौ वर्षतु देव इति ते कामयेरन्, कामवर्षी पर्जन्यो भवति । यदि वा कंचिदपुत्रमनुगृह्णीयुः पुत्रोऽस्य जायतामिति पुत्रवानेव भवति । यदि वा तेष्ववस्थितास्ते तथैव हिमवन्तं दिदृक्षेरंस्तथैव तद्भवति । मनसो जवो येषां ते मनोजवाः । तेषां भावो मनोजवता । तां यदि कामयेरन् । नियत्यामेव का(ल्क)ल्यायां प्राप्नुयामेति ततो यावता कालेन मनस्तं देशं प्राप्नोति तावता तं देशं प्राप्नुयुरिति । यच्चान्यदेवं युक्तं रोगिणामारोग्यादि तदपि संकल्पादेव तथा भवति ॥ १६१ ॥

यस्मादेवं—

तस्माच्छ्रुतितः प्रत्यक्षफलत्वाच्च विशिष्टानेतानाश्र- मानेके ब्रुवते ॥ १६२ ॥

श्रुतितः ‘ यदहरेव विरजेत्तदहरेव प्रव्रजेत् ’ इत्यादिश्रुत्याऽनुमतत्वादुक्तेन प्रकारेण प्रत्यक्षफलत्वाच्चैतानूर्ध्वरेतसामाश्रमान्विशिष्टान्गार्हस्थ्यादुत्कृष्टानेके ब्रुवत इति ॥१६२॥

तदिदं गार्हस्थ्यस्योत्कर्षप्रतिपादनेन नियोगं(रा) करोति—

त्रैविद्यवृद्धानां तु वेदाः प्रमाणमिति निष्ठा तत्र यानि श्रूयन्ते व्रीहियवपश्वाज्यपयः-

कपालपत्नीसंबन्धान्युच्चैर्नीचैः कार्यमिति प्रसिद्धाचारो न प्रमाणमिति मन्यन्ते ॥ १६३ ॥

व्यवथवा विद्या त्रिविद्या त्रयो वेदाः । ज्ञानेन च(तां ये) पाठतश्चार्थतश्च व(वि)दन्ति । ते त्रैविद्याः तेषु पक्कज्ञानास्त्रैविद्यवृद्धाः । तेषां वेदा एव प्रमाणमतीन्द्रियार्था (येऽर्थ) इति निष्ठा निर्णय इति । यथाऽऽह भगवाञ्जैमिनिः—'चोदनालक्षणोऽर्थो धर्मः' इति । 'प्रत्यक्षमनिमित्तम्' इति च । ततश्च तत्र वेदेषु यानि कर्माणि श्रूयन्ते । किंलक्षणानि । व्रीह्यादिभिः संबन्धा(द्धा)नि उच्चैर्ऋचा क्रियते । उपांशु यजुषेत्येवमादि(दीनि) तैर्विरुद्ध आचारः प्रमाणं न भवतीति मन्यन्ते । एतदुक्तं भवति । सर्वेषु वेदेषु सर्वासु शाखास्वग्निहोत्रादीनि विश्वसृजामयन पर्यन्तानि कर्माण्येव तात्पर्येण विधीयन्ते । अतो गार्हस्थ्यमेव श्रेष्ठम् । ऊर्ध्वरेतसां त्वाश्रमास्तद्विरुद्धा [नैव] समाश्रयणीया यदि वेदाः प्रमाणमिति । तथा च गौतमः—'ए[ऐ]काश्रम्यं त्वाचार्यैः [र्याः] प्रत्यक्षविधानाद्गार्हस्थ्यस्येति ॥ १६३ ॥

एवं गार्हस्थ्यं प्रशस्य ते श्मशानानि भेजिर इति निन्दां परिहरति—

यत्तु श्मशानमुच्यते नानाकर्मणामेषोऽन्ते पुरुषसꣳस्कारो विधीयते ॥ १६४ ॥

यत्तु गृहस्थानां श्मशानं श्रूयते स एष नानाकर्मणामन्ते पितृमेधाख्यः पुरुषसंस्कारो विधीयते । ननु(तु) पिशाचा भूत्वा श्मशानमेव सेवत(न्त) इति ॥ १६४ ॥

कुत इत्याह—

ततः परमनन्त्यफलमपरिमित(तं) स्वर्गशब्दꣳ श्रूयते ॥ १६५ ॥

ततः परं श्मशानकर्मणोऽनन्तरमनन्तं(न्त्यं) अपरिमित(तं) स्वर्गशब्दवाच्य फलं श्रूयते स एष यज्ञायुधो यजमानोऽञ्जसा स्वर्ग्यं लोकं प्राप्नोति । अनन्तस्वर्ग्यमिति दकारश्छान्दसः । उपसर्जनः । अपपाठो वा ॥ १६५ ॥

पुनरेवं गार्हस्थ्यमेव प्रकारान्तरेण स्तौति—

अथाप्यस्य प्रजातिममृतमाम्नाय आह प्रजामनु प्रजायसे तदु ते मर्त्यामृतमिति ॥ १६६ ॥

अथापि चास्य गृहस्थस्य प्रजातिं प्रजासंतानममृतममरणमाम्नायो वेद आह । हे मर्त्य मरणधर्मन्प्रजां जायमानामनु त्वं प्रजायसे त्वमेव प्रजारूपेण जायसे तदेव ते मरणधर्मणोऽमृतममरणमिति । न त्वं म्रियसे त्वं प्रजारूपेण तिष्ठसीति ॥ १६६ ॥

उपपन्नं चैतदित्याह—

अथापि च स एवायं विरूढः पृथक्प्रत्यक्षे-
णोपलभ्यते दृश्यते चापि सारूप्यं देहत्वमेवा-
न्यत् ॥ १६७ ॥

अपि च स एवायं पृथग्विरूढः प्रत्यक्षेणोपलभ्यते । स एव द्विधा भूत इति लक्ष्यते । दृश्यते हि सारूप्यं द्वयोर्देहमात्रं तु भिन्नदेहत्वमिति । सा(स्वा)र्थिकस्त्व ॥१६७॥

यदि पुत्ररूपेणावस्थानं किमेतावदेव नेत्याह—

ते शिष्टेषु कर्मसु वर्तमानाः पूर्वेषाꣳ सांपरायेण
कीर्तिः(र्तिं) स्वर्गं च वर्धयन्ति ॥ १६८ ॥

ते पुत्राः शिष्टेषु चोदितेषु कर्मसु वर्तमानाः पूर्वेषां पितृपितामहादीनां सांपरायेण परलोकेन संबन्धा(द्धा)नां कीर्तिं वर्धयन्ति । अस्यायं पुत्र एवंकर्माऽस्यायं पौत्र इति स्वर्गं च वर्धयन्ति । कीर्तिमतां हि स्वर्गवासः श्रूयते ॥ १६८ ॥

एवमपरोऽपरः परेषाम् ॥ १६९ ॥

एवमनेन प्रकारेण । कीर्तिं स्वर्गं च वर्धयन्ति ॥ १६९ ॥

आ भूतसंप्लवात्ते स्वर्गजितः ॥ १७० ॥

भूतसंप्लवो महाप्रलयः । आ तस्मात्ते पुत्रिणः स्वर्गजितो भवन्ति ॥ १७० ॥

पुनः सर्गे बीजार्था भवन्तीति भविष्यत्पुराणे ॥ १७१ ॥

प्रलयानन्तरं सर्गः । तत्र संसारस्य बीजार्थाः प्रजापतयो भवन्तीति भविष्यत्पुराणे श्रूयते ॥ १७१ ॥

अथापि प्रजापतेर्वचनम् ॥ १७२ ॥

अपि च प्रजापतेरपि वाक्यमस्मिन्नर्थे भवति गार्हस्थ्य[मेव वरिष्ठ]मिति ॥१७२॥

त्रयीं विद्यां ब्रह्मचर्यं प्रजातिꣳ श्रद्धां तपो यज्ञ-
मनुप्रदानं य एतानि कुर्वते तैरु(रि)त्सह स्मो
रजो भूत्वा ध्वꣳसतेऽन्यत्प्रशꣳसन्निति ॥१७३॥

त्रयीं विद्यानां(विद्यां) त्रयाणां वेदानामध्ययनम् । ब्रह्मचर्यमष्टाचत्वारिꣳशादित्यादिकम् । प्रजातिं प्रजोत्पादनम् । श्रद्धामास्तिक्यम् । तप उपवासादि । यज्ञमग्निहोत्रादिसोमयागान्तम् । अनुप्रदानमन्तर्वेदि बहिर्वेदि प्रदानम् । य एतानि कर्माणि कुर्वते तैरुक्तै(रित्तै)रेव सह वयं स्मः । त एवास्माकं सहायाः । अन्यदूर्ध्वरेतसामाश्रमादिकं प्रशंसन्पुरुषो रजः

पांसुला(भूत्वा) ध्वंसते नश्यति । इतिशब्दो वचनसमाप्त्यर्थः ॥ १७३ ॥

यद्येवं तर्हि शिष्टेषु वर्तमानाः पुत्राः पूर्वेषां सुकीर्तिं स्वर्गं च वर्धयन्ति । य(त)था प्रतिषिद्धेषु वर्तमाना अकीर्तिं नरकं च वर्धयेयुस्तत्राऽऽह—

तत्र ये पापकृतस्त एव ध्वꣳसन्ति यथा पर्णं वनस्पतेर्न परान्हिꣳसन्ति ॥ १७४ ॥

तत्र प्रजासंताने ये पापस्य कर्तारस्त एव ध्वंसन्ति । ध्वंसनेऽपि न परान् पित्रादीन् हिंसन्ति कीटादिदूषितं तदेव पतति न वनस्पतिं शाखां वा पातयति तद्वत् ॥ १७४ ॥

नास्यास्मिँल्लोके कर्मभिः संबन्धो विद्यते तथा परस्मिन्कर्मफलैः ॥ १७५ ॥

अस्येति सामान्यापेक्षमेकवचनम् । अस्य पित्रादेः पूर्वपुरुषस्यास्मिन्लोके पुत्रकृतैः कर्मभिः संबन्धो न विद्यते । दृष्टान्तो यथा—पुत्रकृतेषु कर्मसु पित्रादेः कर्तृता नास्ति तथा परस्मिँल्लोके कर्मफलैरपि संबन्धो नास्तीत्यर्थः ॥ १७५ ॥

अथापि प्रजापतेर्ऋषीणामित्ययं सर्गः ॥ १७६ ॥

प्रजापतेर्हिरण्यगर्भस्य ऋषीणां च मरीच्यादीनामयं सर्गो दैवो हि नि(वि)सर्गान्तः (देवादिस्तिर्यगन्तः) । न (ते) चाध्वस्ता एव स्वे स्वे पदे वर्तन्ते । यदि पुत्राः पापकृतः स्वयं ध्वंसमानाः परानपि ध्वं(स)सेयुस्तदेतन्नोपपद्यते । पुण्यकृतः सुखेनाद्यापि वर्तन्त इति ॥ १७६ ॥

अत्रोदाहरणमाह—

तेषां प्रकृतयः परा ज्वलन्त्य उपलभ्यन्ते ॥ १७७ ॥

तत्र सर्गे ये पुण्यकृतो वसिष्ठादयः प्रकृतयः शरीराणि परा उत्कृष्टा ज्वलन्त्यो दीप्यमाना उपलभ्यन्ते । दिवि यथा सप्तर्षिमण्डलम् । श्रूयते च—‘ सुकृतां वा एतानि ज्योतीꣳषि यन्नक्षत्राणि ’ इति । इदमपि प्रमाणं पुत्राणां ध्वंसे पूर्वेषामपि न ध्वंस इति ॥ १७७ ॥

स्यात्तु कर्मावयवेन तपसा वाकश्चित्सशरीरोऽन्तवन्तं लोकं जयेद् “दर्स्वर्गं लोकं जयेद” भिस्वर्गं लोकं जयतीति संकल्पसिद्धिः स्यान्न ततो ज्येष्ठा (ज्येष्ठयमा)श्रमाणाम् ॥ १७८ ॥ [ख० १७] ।

---

१ अवतरणस्थितो ग्रन्थोऽधिक इति भाति ।

कर्मविपर्ययेन तपसा पूर्वार्जितानां कर्मणां भुक्तशेषेणैकदेशेन तपसा वा तीव्रेण कश्चि-दूर्ध्वरेता सह शरीरेणान्तवन्तं लोकं जयेदभिस्वर्गं लोकं जयतीति यत्तस्यासं-वेऽपि यच्च संकल्पादेव सिद्धिः स्यादिति तदपि स्यात् । न तु तदाश्रमाणां ज्यैष्ठ्यका-रणमिति । ‘ तदेवमे(मै)काश्रम्यं त्वाचार्य ’ इत्येव पक्षः स्थापितः । अन्ये मन्यन्ते— सर्वे आश्रमा दूषिता अदूषिताश्च भवन्ति । ततश्च तेषु सर्वेषु यथोपदेशमव्यग्रो वर्तमानः क्षेमं गच्छतीत्येतदेव स्थितमिति ॥ १७८ (ख० १७) ।

व्याख्याताः सर्ववर्णानां साधारणवैशेषिका
धर्मा राज्ञस्तु विशेषाद्वक्ष्यामः ॥ १७९ ॥

उक्तवत्प्र(क्ष्य)माणसंकीर्तनं श्रोत्र(तृ)बुद्धिसमाधानार्थम् । अहिंसासत्यास्तेयादयः सर्ववर्णानां साधारणा धर्माः । अध्ययनादयस्त्रयाणाम् । अध्यय(ध्याप)नादयो ब्राह्म-णस्य । युद्धादयः क्षत्रियस्य । कृष्यादयो वैश्यस्य । शुश्रूषा शूद्रस्य । राजाऽभिषिक्तो विवक्षितः । तस्यैव हि वक्ष्यमाणं धर्मजातं संभवति ॥ १७९ ॥

दक्षिणाद्वारं वेश्म पुरं च मापयेत् ॥ १८० ॥

वेश्म गृहम् । पुरं नगरम् । तदुभयमपि दक्षिणाद्वारं मापयेत् । अ(स्थ)पत्यादिभिः कारयेत् । दक्षिणपार्श्वे द्वारं यस्य तथोक्तम् ॥ १८० ॥

अन्तरस्यां पुरि वेश्म ॥ १८१ ॥

सर्वेषामेव पुराणां मध्ये या पूस्तस्यामन्तरस्यां पुरि वेश्म मापयेदात्मनः ॥१८१॥

तस्य पुरस्तादावसथस्तदामन्त्रणमित्याचक्षते ॥ १८२ ॥

तस्य वेश्मनः पुरस्तादावसथः कारयितव्यः । एत्य वसन्त्यस्मिन्नित्यावसथः । आस्था-नमण्डपः । तस्याऽऽमन्त्रणसंज्ञा ॥ १८२ ॥

दक्षिणेन पुरं दक्षिणोदग्द्वारं सभा कार्या यथोभयं
संदृश्येत बहिरन्तरं च ॥ १८३ ॥

दक्षिणेनेत्येनबन्तम् । पुरमिति ‘एनपा द्वितीया’[1] इति द्वितीयान्तम् । पुरस्य दक्षिणतोऽ-दूरे सभा कार्या । तथा दक्षिणोदग्द्वारं दक्षिणस्यामुत्तरस्यां दिशि द्वारे यस्याः सा तथोक्ता । किमर्थमुभयत्र द्वारमिति चेत् , यद्बहिर्वृत्तं यच्चाभ्यन्तरवृत्तं तदुभयमपि यथा संदृश्येतेति । किमर्थमिति ॥ १८३ ॥

सर्वत्रैवाजस्रा अग्नयः स्युः ॥ १८४ ॥

---

१ (पा० सू० २ । ३ । ३१) ।

वेश्मन्यावसथे सभायामित्येतेषु सर्वेष्वेवावस्थानेषु लौकिकाग्नयोऽजस्राग्नयः स्यु- रविच्छेदेन धार्याः ॥ १८४ ॥

अग्निपूजा च नित्या यथा गृहमेधे ॥ १८५ ॥

तेष्वेवाग्निषु नित्यमाग्निपूजा कार्या । यथा गृहमेध औपासने सायंप्रातर्होम इत्यर्थः। मन्त्रान(व)पि ताने(वे)व द्रव्यमपि तदेव ॥ १८९ ॥

आवसथे श्रोत्रियावरार्ध्यानतिथीन्वासयेत् ॥ १८६ ॥

आवसथाख्ये स्थानेऽतिथीन्वासयेत् । ते विशेष्यन्ते श्रोत्रियावरार्ध्यानिति । अवर- पर्यायोऽवरार्ध्यशब्दः । यदि सर्वान्वासयितुं न शक्नोति श्रोत्रियानपि तावद्वासये दिति ॥ १८६ ॥

तेषां पूजा श्रेयस्यात्मनः कार्या ॥ १८७ ॥

आत्मनो यत्क्रियते ततोऽपि श्रेष्ठा पूजा कार्याऽतिथीनाम् । तेभ्यो या पूजा साऽऽत्मकार्यादपि श्रेष्ठाऽऽवश्यकी ॥ १८७ ॥

तेभ्यो यथागुणमावसथमन्नपानं च विदेयम् ॥ १८८ ॥

तेषामतिथीनां यथागुणं विद्यावृत्ताद्यनुगुणमावसथादि विदेयं विशेषेण देयम् । आवसथं पाकार्थं (अपव)करकादयः(दि)। अन्नमोदनादि । पानं तक्रादि ॥ १८८ ॥

सर्वाणीतश्च स्याद्गुरूनमात्यांश्च नातिजीवेत् ॥ १८९ ॥

गुरवः पित्रादयः। अमात्या मन्त्रिणः । तान्नातिजीवेत् । भक्ष्यभोज्याच्छादनादिषु तान्नातिशयीत ॥ १८९ ॥

न चास्य विषये क्षुधा रोगेण हिमातपाभ्यां
वाऽवसीदेदभावात्कश्चित् ॥ १९० ॥

अस्य राज्ञो विषये क्षुधाऽऽहाराभावेन बुभुक्षया। रोगेण व्याधिना। हिमेन नीहारेण। वर्षादीनामप्युपलक्षणमेतत् । आतप आदित्यरश्मितापः । एतैः प्रकारैरभावादबुद्धिपूर्वं वा नकारैर्न कश्चिद्व(द्वा)ह्मणोऽवसीदेदवसन्नो न स्यात् । राज्ञोऽप्ययमपराधो यथाऽऽ- हाराद्यभावेन कश्चिदवसन्नः स्यात् । आपस्तम्बे विशेषः—' बुद्धिपूर्वं वा कश्चित् '। तस्यार्थः— बुद्धिपूर्वं वेत्यत्रोदाहरणम् । यदा कश्चित्करणं ऋणं वा दाप्यो भवति तदा नासौ हिमातपयोरुपवेशयितव्यः । भोजनादिवि(द्वा नि)रोधयः(द्व्यः) । तथा कुर्वाणो(णं)राजा दण्डयेदिति ॥ १९० ॥

सभायां मध्येऽधिदेवनमुद्धत्यावोक्ष्याक्षान्निवप
(पे)द्यथार्थान्युग्मान्वैभीतकान् ॥ १९१ ॥

पूर्वोक्तायां सभायां मध्येऽधिदेवनं यस्योपरि कितवा अक्षैर्दीव्यन्ति तत्स्थानमधिदेवनम् । तत्पूर्वं काष्ठादिनोद्धन्ति । उद्धत्यावोक्षति । अवोक्ष्य तत्राक्षान्युग्मसंख्यान्बिभीतकवृक्षस्य विकारभूतान्यथार्थान्यावद्भिर्द्यूतं निर्वर्तते तावतो निवपति । यः क[कः, य]स्तत्र नियुक्तः । स हि तन्नामा ॥ १९१ ॥

आर्या विशुचयः सत्यशीला दीवितारः स्युः ॥ १९२ ॥

आर्या द्विजातयः । विशुचयोऽर्थशुद्धाः सत्यशीलाः सत्यवादिनः । एवंभूता एव पुरुषास्तत्र दीवितारो देवितारः स्युः । [ते] एवं तत्र देवितुं लभ(न्ते) इत्यर्थः । तत्र (ते च) तत्र देवित्रा (त्वा)यथापहिता(भाषितं)विहितपणं सनि(मि)काय दत्वा गच्छेयुः । स च राज्ञे तमायमहरहः प्रतिमासं प्रतिसंवत्सरं दद्यात् । स एव स्थानान्तरे दीव्यतां(तो) दण्डयेत् । सभास्थाने च कलहकारान् । तत्र याज्ञवल्क्यः—

गलछलिव(ग्लहे शतिक) वृद्धेस्तु सभ्यिः क[मिकः]ञ्चकं शतम् ।
गृह्णीयाद्धूर्तकितवादितराद्दशकं शतम् ॥
स सम्यक्पालितो दद्याद्राज्ञ(ज्ञे)भागं यथाकृतम् ।
सि(जि)तमुद्रा(द्ग्रा)हयेजैत्र(ज्जेत्रे) दद्यात्सत्य(त्यं) वदा(चः)
क्षयी(मी) ॥ १९२ ॥

सर्वधर्मणां सर्वधर्मानुष्ठानानि नियमेषु च युक्तः स्यात् ॥ १९३ ॥

सर्वेषां धर्माणां स्वकर्मानुष्ठानानि नियमेषु च स्वकर्मानुष्ठानं प्रजापालनादि तत्र ये अनि(ये नि)यमाः(मा नी) अनीतयस्तेषु च युक्तः सावधानः स्याद्भवेत् । अनीतयो न कार्या इत्यर्थः ॥ १९३ ॥

आयुधग्रहणं नृत्यगीतवादित्राणि राजाधीनेभ्योऽन्यत्र न विद्येरन् ॥ १९४ ॥

आयुधग्रहणादीनि राजाधीनेभ्यो राजायत्ता ये पुरुषास्तेभ्योऽन्यत्र न विद्येरन्न भवेयुः । उत्सवादिष्वन्यत्रापि भवत्याचारः ॥ १९४ ॥

क्षेमकृद्राजा न चास्य विषये ग्रामेऽरण्ये वा तस्करभयं विद्यते ॥ १९५ ॥

अस्य राज्ञो विषये ग्रामेऽरण्ये च चोरभयं न भवति । स एव राजा क्षेमकृत् क्षेमकरो न त्वन्यः शतं तुभ्यमिति ददानोऽपि ॥ १९५ ॥

भृत्यानामनुपरोधेन क्षेत्रं वित्तं च ददद्ब्राह्मणेभ्यो यथार्हमनन्ताँल्लोकानभिजयति ॥ १९६ ॥

भृत्यानामनुपरोधेन भृत्यवर्गस्य यथोपरोधो न भवति तथा ब्राह्मणेभ्यो यथार्हं विद्यावृत्ताद्यनुगुणं क्षेत्रं वित्तं च दद्यात् । दददनन्ताँल्लोकानभिजयति ॥ १९६ ॥

ब्राह्मणस्वान्यपजिहीर्षमाणो राजा यो हन्यते तमाहुरात्मयूपो यज्ञोऽनन्तदक्षिण इति ॥ १९७ ॥ (ख० १८)।

ब्राह्मणस्वानि चोरादिभिरपहृतान्यपजिहीर्षमाणे(णो ब्राह्मणे)भ्य आदा(दाना) यावजित्य ग्रहीतुमिच्छन्नसौ राजा यदि चोरैर्हन्यते तमात्मयूपोऽनन्तदक्षिणो यज्ञ इत्याहुर्धर्मज्ञाः । संग्रामे युद्धयज्ञे तस्याऽऽत्मा यूपस्थानीयः । आत्मेति शरीरमाह । अन्तरा यदि चोरैर्हन्यते तमात्मयूपोऽनन्तदक्षिणो यज्ञ इत्याहुः । आत्मा तु पशुस्थानीयः । प्रत्यानिर्नीषितं द्रव्यं दक्षिणा । सूत्रे तं यज्ञमित्याहुरिति॥१९७॥ (ख०१८)।

एतेनान्ये शूरा व्याख्याताः प्रयोजने युध्यमानास्तनुत्यजः ॥ १९८ ॥

अन्ये राजव्यतिरिक्ता अपि यदि शूराः सन्तो ब्राह्मणस्वापहारामियुध्यमानाश्चोरैर्हतास्तेषामपि तथैव यज्ञकृतं फलं पूर्वोक्तं भवति । प्रयोजनग्रहणमन्यस्यापि धर्मस्य कार्यस्योपलक्षणम् । तदेवमपि युध्यमानास्तथैव फलं लभन्ते ॥ १९८ ॥

ग्रामेषु निगमेषु चाऽऽर्याञ्छुचीन्सत्यशीलान्धर्मार्थकुशलान्प्रजागुप्तये निदध्यात् ॥ १९९ ॥

ग्रामादिषु प्रजासंरक्षणार्थमेतादृशान्पुरुषांस्त्रैवर्णिकान्स्थापयेदाधिकारिणः शुचीन्निर्मलान्तःकरणान्सत्यवादिनो धर्मज्ञानर्थशास्त्रेष्वपि कुशलान् ॥ १९९ ॥

तेषां पुरुषास्तथागुणा एव स्युः ॥ २०० ॥

तेषां नियुक्तानां ये पुरुषास्तेऽपि तथागुणा आर्यादिगुणा एव स्युः ॥ २०० ॥

सर्वतो योजनं नगरं तस्करेभ्यो रक्ष्यम् ॥ २०१ ॥

सर्वतः सर्वासु दिक्षु योजनमात्रं नगरं तस्करेभ्यो रक्षणीयम् ॥ २०१ ॥

क्रोशो ग्रामेभ्यः ॥ २०२ ॥

ग्रामेभ्यस्तु सर्वासु दिक्षु क्रोशो रक्ष्यः । ग्रामेभ्यः ‘ यतश्चाध्वकालपरिमाणं तत्र पञ्चमी वक्तव्या ’ इति पञ्चमी ॥ २०२ ॥

तत्र यन्मुष्यते तैस्तस्मातिन्दाप्यम् ॥ २०३ ॥

तत्र योजनमात्रे क्रोशमात्रे वा यन्मुष्यते चोर्यते ते न(नि)युक्तास्तत्प्रतिदद्युः। राजा तैस्तत्प्रतिदापयेदिति ॥ २०३ ॥

धर्म्यं शुल्कमवहारयेत् ॥ २०४ ॥

ग्राहयेदिति । मूलादिषु विशेषस्तेनैवोक्तः—मूलफलपुष्पौषधमकरमिति ॥ २०४ ॥

अकरः श्रोत्रियः ॥ २०५ ॥

श्रोत्रियाद्राज्ञा करो न ग्राह्यः ॥ २०५ ॥

सर्ववर्णानां स्त्रियः ॥ २०६ ॥

अकरा इति परिणामः ॥ २०६ ॥

कुमाराश्च प्राग्व्यञ्जनेभ्यः ॥ २०७ ॥

व्यञ्जनानि श्मश्र्वादीनि । यावत्तानि नोत्पद्यन्ते तावदकराः ॥ २०७ ॥

ये च विद्यार्थो वसन्ति ॥ २०८ ॥

विद्यामुद्दिश्य गुरुषु ये वसन्ति तेऽसमाप्तविद्या अप्यकराः ॥ २०८ ॥

तपस्विनश्च ये धर्मपराः ॥ २०९ ॥

धर्मपरा इति किम् । येऽभिचारकमन्त्रसिद्धये तपस्तप्यन्ते तेऽकरा मा भूवन्निति ॥ २०९ ॥

शूद्रश्च पादावनेक्ता ॥ २१० ॥

त्रैवर्णिकानां पादावनेजनवृत्तिर्यः स शूद्रोऽप्यकरः ॥ २१० ॥

अन्धमूकबधिररोगाविष्टाश्च ॥ २११ ॥

अन्धादयोऽप्यकराः ॥ २११ ॥

ये व्यर्था द्रव्यपरिग्रहैः ॥ २१२ ॥

ये परिव्राजकादयो द्रव्यपरिग्रहैर्व्यर्था निष्प्रयोजनाः शास्त्रतो येषां द्रव्यपरिग्रहः प्रतिषिद्धस्तेऽप्यकराः । तथा च वसिष्ठः—अकरः श्रोत्रियो राजा पुमाननाथः प्रव्रजितो बालवृद्धतरुणप्रजा(शा)ता(न्ता) इति ॥ २१२ ॥

अबुद्धिपूर्वमलंकृतो युवा परदारमनुप्रविशन्कुमारीं वा वाचा बाध्यः ॥ २१३ ॥

यत्र परदारा आवस(आस)ते कुमारीं(री) वा पतिंवरा तत्र युवाऽलंकृतोऽबुद्धिपूर्वमज्ञानादनुप्रविशन्वाचा बाध्यः 'अत्रा(त्रे)यमास्ते मां(मा) प्रतीक्षत(विशः)' इति ॥ २१३ ॥

बुद्धिपूर्वं तु दुष्टभावो दण्ड्यः ॥ २१४ ॥

यस्तु जानन्नेव प्रलोभनार्थी दुष्टभावः प्रविशति स दण्ड्यः । द्रव्यानुरूपमपराधानुरूपं च । दुष्टभावग्रहणमाचार्यादिप्रेषितस्य प्रवेशे दण्डो मा भूदिति ॥ २१४ ॥

संनिपाते वृत्ते शिश्नच्छेदनꣳ सवृषणस्य ॥ २१५ ॥

संनिपातो मैथुनम् । तस्मिन्वृत्ते शिश्नच्छेदनदण्डः । सवृषणस्येत्युपसर्जनस्यापि शिश्नस्य विशेषणम् । सवृषणस्य शिश्नस्य च्छेदनमिति ॥ २१५ ॥

कुमार्यां तु स्वान्यादाय वास्यः ॥ २१६ ॥

कुमार्यां तु संनिपाते वृत्ते सर्वस्वहरणं कृत्वा देशान्निर्वास्यः ॥ २१६ ॥

अथ राज्ञा भृत्ये ॥ २१७ ॥

अथ संनिपातात्प्रभृति परदारकुमार्यौ राज्ञा भृत्ये ग्रासाच्छादनेन भर्तव्ये ॥ २१७ ॥

रक्ष्ये चात ऊर्ध्वं मैथुनात् ॥ २१८ ॥

अतः प्रथमात्संनिपातादूर्ध्वं मैथुनाच्च रक्ष्ये । यथा पुनर्मैथुनं न चरतस्तथा कार्यं ॥ २१८ ॥

चरितनिर्वेषं स्वामिभ्योऽवसृजेत् ॥ २१९ ॥

एवं ते यदि निरुद्धे निर्वेषमुपगच्छतस्तदा स्वामिभ्यस्ते अवसृजेत् । परदारान्भर्त्रे श्वशुराय वा कुमारीं पित्रे भ्रात्रे वा । अनभ्युपगमे तु तस्य प्रायश्चित्तं यावज्जीवं निरोधः ॥ २१९ ॥

चरिते यथापुरं धर्मसंबन्धः ॥ २२० ॥

चरिते तु निर्वेषे यथापुरं यथापूर्वं धर्मेण संबन्धो भवति । यस्मादेवं तस्मादवश्यं प्रायश्चित्तं कारयितव्यम् । यज्ञविवाहादौ न कश्चन दोष इति ॥ २२० ॥

परदारप्रसङ्गादिदमुच्यते—

न सगोत्रस्थानीयां परेभ्यः समाचक्षीत ॥ २२१ ॥

योऽनपत्य आत्मनः शक्त्यभावं निश्चित्य क्षेत्रजं पुत्रमिच्छन्भार्यां परत्र नियुङ्क्ते मृते वा तस्मिन् तत्पित्रादयः संतानकाङ्क्षिणस्तद्विषयमेतत् । कुलान्तरप्रविष्टा सगोत्रस्थानीया । सा हि पूर्वं पितृगोत्रा सती भर्तृगोत्रधर्मैरधिक्रियते । अतः सा भर्तृपक्षाणां सगोत्रस्थानीया भवति । भर्ता तु साक्षात्सगोत्रां तां सगोत्रस्थानीयां न परेभ्यः(भ्योऽ)पगोत्रेभ्यः समाचक्षीत । इयमनपत्याऽस्यामपत्यमुत्पाद्य[ता]मिति । सगोत्रायैव तु समाचक्षीतेति ॥ २२१ ।

किंच—

कुलाय हि स्त्री प्रदीयत इत्युपदिशन्ति ॥ २२२ ॥

कुलाय स्त्री कन्या क्वचिद्देशेषु दीयते । गोत्रे यैः कैश्च(श्चि)दप्यनुभूयते । उक्तं च बृहस्पतिना—

अमर्तृकभ्रातृभार्याग्रहणं नातिदूषितम् ।
कुले कन्याप्रदानं च देशेष्वन्येषु दृश्यते ॥ इति ॥ २२२ ॥

तामिमं नियोगं दूषयति—

तदिन्द्रियदौर्बल्याद्विप्रतिपन्नम् ॥ २२३ ॥

केषुचिद्देशेषु यद्यप्येवं पूर्वं कृतवन्तस्तथाऽपि तदद्यत्वे विप्रतिषिद्धम् । कुतः । इन्द्रियदौर्बल्यात् । दुर्बलेन्द्रिया ह्यद्यत्वे मनुष्याः । ततश्च शास्त्रव्याजेनापि भर्तृव्यतिक्रमेऽतिप्रसङ्गापत्तिः ॥ २२३ ॥

सगोत्रा(त्र)विषये च यो विशेषः सोऽपि नास्तीत्याह—

अविशिष्टं परत्वं हि पाणेः ॥ २२४ ॥

येन पाणिना पूर्वमग्निसाक्षिकं पाणिर्गृहीतः तस्याः कन्यायाः पाणेरन्यो भवति सगोत्रस्यापि पाणिः । यस्मादेव पाणेः परत्वमविशिष्टं समानं तस्मादविशेष इति । अवशिष्टमित्यपपाठः ॥ २२४ ॥

पाणिरन्यो भवति को दोषः—

तद्व्यतिक्रमे पुनरुभयोर्नरकः ॥ २२५ ॥

तस्य पाणेर्व्यतिक्रमे पुनरुभयोर्दम्पत्योर्नरको भवति । पुनरिति प्रसिद्धद्योतको निपातः ॥ २२५ ॥

नियमारम्भणो हि वर्षीयानभ्युदय एवमारम्भणादपत्यात् ॥ २२६ ॥

योऽयं दम्पत्योः परस्परं नियमः स आरम्भणो यस्य स नियमारम्भणः । एवंभूतो योऽभ्युदयः स एव वर्षीयान् । एवमुक्तेन प्रकारेण यदपत्यमारभते तस्मादेवमारम्भमाणादपत्याद्वर्षीयानिति । अपत्यादिति प्रायेण पठन्ति ॥ २२६ ॥

वाश्य आर्यः शूद्रायाम् ॥ २२७ ॥

आर्यस्त्रैवर्णिकः शूद्रायां परभार्यायां प्रसक्तो राज्ञा राष्ट्राद्वाश्यो निर्वास्यः ॥२२७॥

वध्यः शूद्र आर्यायाम् ॥ २२८ ॥

शूद्रस्त्वार्यायां त्रैवर्णिकस्त्रियां प्रसक्तो वध्यः । आर्यास्त्रैवर्णिकाः । शूद्रायां परमार्यायां प्रसक्ता एतत्र(च)यज.(योऽन्तः)पुराधि(दि)ष्वधिकृतो रक्षकः सन् स्वयमेव गच्छति तस्य भवति । अन्यस्य तु पूर्वोक्तं प्रायश्चित्तं शिश्नच्छेदनं द्रष्टव्यम् । तथा च शूद्राधिकारे गौतमः—'आर्यस्त्र्यभिगमने लिङ्गोद्धारः स्वहारश्च गोप्ता चेद्वधोऽधिकः' इति । याज्ञवल्क्येन तु प्रातिलोम्ये[न] गमनमात्रे वध उक्तः । यथाऽन्त्यजात(?) ।

स्वजातावुत्तमो दण्ड आनुलोम्ये तु मध्यमः ।
प्रातिलोम्ये वधः पुंसां स्त्रीणां नासादिकर्तनम् ॥ इति ।

सोऽनुवध्याभ्यां सा(बन्धाभ्यासाद्य)पेक्षो द्रष्टव्यः । तथा 'वध्य आर्यः शूद्रायाम्' इत्याचार्यवचनमप्यनुवध्याभ्यां सापेक्ष(क्षम्) । ब्राह्मणादेः क्रमविवाहे वा शूद्रा तद्विषयं वा द्रष्टव्यम् ॥ २२८ ॥

दारं चास्य कर्षयेत् ॥ २२९ ॥

अस्य शूद्रस्य या दारभूता तेन भुक्ता त्रैवर्णिकस्त्री तां च कर्षयेत् । तच्च नियमोपवासैर्या प्रजाता न भवति तद्विषयमेतत् ।

ब्राह्मणक्षत्रियविशां स्त्रियः शूद्रेण संगताः ।
अप्रजाता विशुध्यन्ति प्रायश्चित्ते भवेत्तु या(न नेतराः ॥ इति ॥२२९॥

सवर्णायामन्यपूर्वायां[१] सकृत्संनिपाते पादः पतति ॥ २३० ॥

अन्यः पूर्वः पतिरस्या अन्यपूर्वा । परभार्या । तस्याः सवर्णायाः सकृद्गमने पादः पतति । पतितस्य द्वादशवार्षिकं प्रायश्चित्तं तस्य तुरीयोंऽशस्त्रीणि वर्षाणि प्राकृतं ब्रह्मचर्यमस्य प्रायश्चित्तम् । एतच्च क्षात्रि(श्रोत्रि)यभार्यायामृतुकाले कामतः प्रथमदूषकस्य ब्राह्मणस्य । तत्र गौतमः—द्वे परदारे त्रीणि श्रोत्रियस्य' इति ॥ २३० ॥

एवमभ्यासे पादः पादः ॥ २३१ ॥

एवमभ्यासे प्रत्याभ्यासे पादः पादः पतति ॥ २३१ ॥

चतुर्थे सर्वम् ॥ २३२ ॥

चतुर्थे संनिपाते सर्वमेव पतति । ततश्च पूर्णं द्वादशवार्षिकं कर्तव्यम् । तृतीये नव वर्षाणि । द्वितीये षड् वर्षाणि । एतच्च प्रतिप्रयोगं स्त्रीभेदेन प्रथमदूषकस्य । एकस्यामेव त्वभ्यासे कल्प(ल्प्य)म् । तत्र 'यत्पुंसः परदारेषु तच्चैतां चो(चा)रयेद्व्रतम्' इति स्मरणात् । स्त्रिया अपि प्रतिप्रयोगं पादः पतति । तदनुरोधेन कल्प्यम् ॥२३२॥

जिह्वाच्छेदनं शूद्रस्याऽऽर्यं धार्मिकमाक्रोशतः ॥ २३३ ॥

---

१ 'आयास्त्रैव॰ इत्यादिः प्रसक्ताः' इत्यन्तो ग्रन्थः संगत्यभावादधिक इति भाति ।

शूद्रो द्विजातिनामन्यतमं धार्मिकं स्वकर्मस्थं यमाक्रोशति निन्दति विगर्हते तदा तस्य जिह्वा च्छेत्तव्येति । मनुस्तु सामान्येनाऽऽह—

येनाङ्गेनावरो वर्णो ब्राह्मणस्यापराध्नुयात् ।
तदङ्गं तस्य च्छेत्तव्यं तन्मनोरनुशासनम् ॥ इति ।

गौतमस्तु—' शूद्रो द्विजातीनभि_ सं]धायाभिहत्य च वाग्दण्डपारुष्याभ्यामङ्गमोच्यो येनोपहन्यात् ' इति ॥ २३३ ॥

वाचि पथि शय्यायामासने वेति समीभवतो दण्डताडनम् ॥ २३४ ॥

यस्तु शूद्रो वागादिष्वार्यैः समी भवति न तु तदर्थभूतं तस्य दण्डेन ताडनं कर्तव्यं स दण्डेन ताडयितव्य इति वाच्यम् । अयमस्य दण्डः ॥ २३४ ॥

पुरुषवधे स्तेये भूम्यादान इति स्वान्यादाय वधः(ध्यः) ॥ २३५ ॥

भूम्यादानं परक्षेत्रस्य बलात्स्वीकारः । पुरुषवधादिषु निमित्तेषु शूद्रः सर्वस्वहरणं कृत्वा पश्चाद्वध्यो मारयितव्यः ॥ २३५ ॥

चक्षुर्निरोधस्त्वेतेषु ब्राह्मणस्य ॥ २३६ ॥

एतेषु निमित्तेषु ब्राह्मणस्य चक्षुर्निरोधः कर्तव्यः । पट्टबन्धादिना चक्षुषी निरोद्धव्ये यथा यावज्जीवं न पश्यति । न तूत्पाटयितव्ये । न शारीरो ब्राह्मणस्य दण्डः । ' अक्षतो ब्राह्मणो व्रजेत् ' इत्यादिस्मरणात् । चक्षुनिरोध इति क्वचित्पाठे रेफलोपश्छान्दसः ॥ २१६ ॥

नियमातिक्रमणमन्यं वा रहसि बोधयेदा समापत्तेः) ॥ २३७ ॥

यो वर्णाश्रमप्रयुक्तानि(नि)यमानतिक्र(क्रा)मति तं नियमातिक्रामिणमन्यं वा प्रतिषेधा(षिद्धा)नां कर्तारं रहसि बोधयेत् । तं निगदि(डि)तं निरुध्या(न्ध्या)त् । आ समापत्तेः यावदसौ नियमान्प्रतिपत्स्येत 'प्रतिषिद्धेभ्यो निवर्तिष्ये' इति ब्रूयात्॥२३७॥

असमापत्तौ वाश्यः ॥ २३८ ॥

यद्यसौ दीर्घकालं निरुद्धोऽपि न समापद्येत ततो वाश्यो निर्वास्यः ॥ २३८ ॥

आचार्य ऋत्विक्स्नातकस्तु श्व[कः श्व]शुरो राजेति त्राणं स्युरन्यत्र वध्यात् ॥ २३९ ॥ (ख० १९) ।

इति सत्याषाढहिरण्यकेशिश्रौतसूत्रे (धर्मसूत्रापरपर्याये) सप्तविंशप्रश्ने पञ्चमः पटलः ॥ ५ ॥

यदि दण्डे प्रवृत्ते राजानं, आचार्यो ब्रूयात् ‘ अहमेनमतः पा[वा]रनि[यि]ष्यामि मुच्यताम[य]मिति ’ ततोऽङ्गदण्डे प्राप्तेऽर्धदण्डः । अर्धदण्डे प्राप्ते ताडनम् । ताडने प्राप्ते धिग्दण्डमिति कृत्वा तद्वशे विसृजेत् । एवमृत्विगिति । स्नातको विद्याव्रताभ्याम् । राजा, अनन्तरादिः सर्वः । एते राज्ञः संमान्याः । अतस्ते दण्डस्य त्राणं स्युः । उक्तेन प्रकारेण रक्षका भवेयुः । नान्यः कश्चित् । तेऽप्यन्यत्र वध्यात् । यस्य वधानुगुणोऽपराधो न तस्याऽऽचार्यादयोऽपि त्राणम् । हन्तव्य एव स इति ॥ २३९ ॥ (ख० १९) ॥

इति सत्याषाढहिरण्यकेशिधर्मसूत्रव्याख्यायां महादेवदीक्षितविरचितायामुज्ज्वलायां वृत्तौ सप्तविंशप्रश्ने पञ्चमः पटलः ॥ ५ ॥

अथ षष्ठः पटलः ।

क्षेत्रं परिगृह्योत्थानाभावात्फलाभावे यः समृद्धः स भावि तदपहार्यः ॥ १ ॥

वैश्यवृत्तिः परक्षेत्रं कृष्यर्थं परिगृह्य यदुत्थानं पतितं कृषिविषयं न कुर्यात्तदभावात्स्वफलं न स्यात्तस्मिन्निमित्ते स कर्षकः समृद्धेरेव तस्मिन्भोगे यद्भावि फलं तदपहार्योऽपहारयितव्यः । राज्ञा क्षेत्रस्वामिने दातव्यः ॥ १ ॥

अवशिनः कीनाशस्य कर्मन्यासे दण्डताडनम् ॥ २ ॥

कीनाशः कर्षकः । तस्यावशिनोऽस्वतन्त्रस्य निर्धनस्य कर्मन्यासे स चेत्कृषिकर्म न्यसेद्विच्छिन्द्यात्तस्य दण्डेन ताडनं कर्तव्यं स दण्डेन ताडयितव्यः । अर्थाभावाद् (ना)र्थदण्डः । अपर आह—अवशी, अवश्योऽविधेयो यदि क्षेत्रं परिगृह्यावशिः(शिनः) कीनाशस्य कृषिकर्म न्यसेन्न स्वयं कुर्यात्तदा स परिगृह्यो दण्डेन ताडयितव्य इति । यदि वाऽवशिन इति बहुव्रीहिः यस्य कीनाशस्या(स्य) वशी, स्वतन्त्रः क्षेत्रवान्नास्ति स यदि पूर्वकृष्टस्य क्षेत्रस्य कृषिकर्प न्यसेन्न कुर्यात्तस्य स्याद्दण्डताडनं दण्ड इति राजपुरुषस्य ॥ २ ॥

तथा पशुपस्य ॥ ३ ॥

पशुपो गोपालः । तस्यापि कर्मन्यासे पालनस्याकरणेऽस्य दण्डेन ताडनं दण्डः ॥ ३ ॥

अवरोधनं चास्य पशूनाम् ॥ ४ ॥

ये चास्य(स्मै) पशवो रक्षणाय समर्पितास्तेषां चावरोधनमपहरणं कर्तव्यम् । अन्यस्मै गोपाय समर्पणीया इति ॥ ४ ॥

हित्वा व्रजम(मा)शिनः कर्षयेत्पशून्नातिवापे-
यात् ॥ ५ ॥

ये पशून्ये(पातयेत्) पशवो गोलांनियंघो:(तुः)ं व्रजं हित्वाऽस्याऽऽविर्भावयितारो भवन्ति तास्तूपकर्षयेद्बलादिना कृशान्कुर्यात् । किंयद्रक्षितं तदा राजपुत्रादयो वान-तिवाष्टपेतं नातिवापवं कुर्यान्न ताडयेत् ॥ ५ ॥

अवरुध्य पशूनां हरणे नाशने वा स्वामिभ्योऽ-
वसृजेत् ॥ ६ ॥

यदि पशुपः पशूनवरुध्य पालयितुं गृहीत्वा भवस्थानेषु विसृज्योपेक्षया मारये-न्नाशयेद्वा । नाशनं चोरादिभिरपहरणम् । तस्मिन्सति स स्वामिभ्यः पशूनवसृजे-त्प्रत्यर्पयेत् । पश्वभावे मूल्यम् ॥ ६ ॥

प्रमादादरण्ये पशूनुत्सृष्टान् ग्राममानीय स्वामि-
भ्योऽवसृजेत् ॥ ७ ॥

कः । यस्तत्र रक्षकत्वेन राज्ञा नियुक्तः ॥ ७ ॥

पुनः प्रमादे सकृदवरुध्यत् ॥ ८ ॥

पुनः प्रमादादुत्सृष्टेषु सकृदवरुध्य स्वामिभ्योऽवसृजेत् ॥ ८ ॥

तत ऊर्ध्वं न सूक्षेत् ॥ ९ ॥

ततो द्वितीयात्प्रमादादूर्ध्वं ग्राममानीयेत्यादि यदुक्तं तन्न सूक्षेत् । न तस्मिन्वि-षये उपेक्षेत ॥ ९ ॥

परपरिग्रहमविद्वानाददान एधोदके मूले फले
पुष्पे गन्धे[1] ग्रासे शाक इति वा[चा]
बाध्यः ॥ १० ॥

एधश्चोदकं चैधोदकम् । ग्रासो गवाद्यर्थो यवसादिः । सर्वत्र विषयसप्तमी । यस्प्र-ति(यः परपरि)ग्रहोऽयमित्यविद्वानज्ञानन्नेवो(धो)दकमादत्ते गृह्णाति स तस्मिन्विषये नि-युक्तेन राजपुरुषेण प्लुतया वाचा बाध्यो निवार्यः ॥ १० ॥

---

१ क. पुस्तके ' गन्धे ग्रासे ' इति पदद्वयं नास्ति ।

विदुषो वाससः परिमोषणम् ॥११॥

यस्तु विद्वानादत्ते तस्य वाससोऽपहारः कर्तव्यः ॥ ११ ॥

अदण्डयः कामकृते तथा प्राणसंशये भोजनमाददानः ॥ १२ ॥

तथा शब्दस्य भोजनमित्यनेन संबन्धः । प्राणसंशयदशायां गन्धोदकादेरादाने कामकृतेऽप्यदण्डयः । तथा भोजनमप्याददानः प्राणसंशये न दण्ड्य इति ॥ १२ ॥

प्राप्तनिमित्ते दण्डाकर्मणि राजानमेनः स्पृशति ॥ १३ ॥

प्राप्तं दण्डनिमित्तं यस्य तस्मिन्पुरुषे दण्डाकर्मणि दण्डस्याक्रियायां यदि दययाऽर्थलाभेन वा प्राप्तं दण्डं न कुर्यात्तदा तदेनो राजानमुपस्पृशति ॥ १३ ॥

ननु शास्त्रफलं प्रयोक्त्रादिगामि । तत्कथमन्यकृतमेनोऽन्यं स्पृशेत् । बहुविधत्वात्कर्तृभावस्येत्याह—

प्रयोजयिताऽनुमन्ता कर्तेति स्वर्गफलेषु कर्मसु भागिनः ॥ १४ ॥

धर्ममधर्मं वा क्रियमाणं यः प्रयुङ्क्ते स प्रयोजयिता । स चानेकप्रकारः । आज्ञापकोऽभ्यर्थितो(र्थयिताऽ)नुग्राहक इति । भृत्यादेर्निकृष्ट[स्य प्रवर्तनाऽऽज्ञा] । गुर्वादेराराध्य[स्य प्रवर्तनाऽभ्यर्थना] । अनुग्राहको(ग्रहो) द्विविधः । उपदेशस्तत्समर्थाचरणं चेति । य इत्थमुपदिशति त्वं शत्रुमिमं व्यापादय धर्मार्जनेऽयं तेऽभ्युपाय इति स उपदेष्टा । यः पुनः पुनः के[न]चिज्जियां(घां)सितं पलायमानं निरुद्धंति(णद्धि) निरुद्धः सन्हन्यते तत्र निरोद्धा, अनुग्राहकः । यं नामस्य(यस्या)नुपात(मति)मन्तरेण कार्याकार्ये न निर्वर्तेते स राजा धर्माधर्मयोरनुमन्ता । साक्षात्क्रियानिर्वर्तकः । एते त्रयोऽपि स्वर्गफलेषु नरकफलेषु च धर्मेष्वधर्मेषु भागिनः फलस्यांशभाजो भवन्ति । सर्वेषां च कथंचित्कर्तृत्वम् ॥ १४ ॥

यद्यप्येवम्—

यो[१] भूय आरभते तस्मिन्फलविशेषः ॥ १५ ॥

तस्मि(तेषु)न्प्रयोजकादिषु यो भूया(योऽ)न्यस्य व्यापाराधिक(क्य)मर्थे निवृत्ता उपयुज्यते तस्मिन्फलविशेषो भवति ॥ १५ ॥

कुटुम्बिनो धनस्येशाते ॥ १६ ॥

१ क पुस्तके 'यस्तु भूयान्' इति भिन्नः पाठः ।

कुटुम्बिनौ दम्पती धनस्य परिग्रहे विनियोगे च वै(ईशा)ते । यद्यप्येवं तथाऽपि भर्तुरनुज्ञया विना सा(स्त्री) न वियोक्तुमर्हति । भर्ता तु प्रभवति । तदेतेन वेदितव्यं न हि भर्तुः प्रवासे नैमित्तिके संदाने स्तेयमुपदिशन्ति ॥ १६ ॥

तयोरनुमतेऽन्येऽपि तद्धितेषु वर्तेरन् ॥ १७ ॥

तयोर्दम्पत्योरनुमतेऽ(नु)मतौ सत्यामन्येऽपि पुत्रादयस्तद्धि तयोरैहिकामुष्मिकेषु वर्तेरन् । दिव्यविनियोगेनापि ॥ १७ ॥

विवादे विद्याभिजनसंपन्ना मेधाविनो धर्मेष्व- विनिपातिनः ॥ १८ ॥

अर्थिप्रत्यर्थिनोर्विप्रतिषिद्धो वादो विवादः । तत्र वृद्धाः परिणतवयसो मेधाविन ऊहापोहकुशला धर्मेषु वर्णाश्रमयुक्तेषु त्रेधाऽविनिपातिनः । विनिपातः प्रमादस्त- द्रहिताः ॥ १८ ॥

संदेहे[1] लिङ्गतो दैवेनेति विचिन्त्य ॥ १९ ॥

ते वा निर्णयन्तः संदेहस्थलेषु लिङ्गतोऽनुमानेन दैवेन तत्प्रमाणादिना । इतिशब्दः प्रकारे । यच्चान्यदेवं युक्तवचनव्यापादितेन विचिन्त्यार्थस्थितिमन्विष्य निर्णेतारः स्युरि- त्याहृतेन वाक्यसमाप्तिः ॥ १९ ॥

अथ साक्ष्यविधिः—

पुण्याहे प्रातरग्नाविद्धेऽपामन्ते राजवत्युभतः समाख्या- नसर्वानुमते मुख्यः सत्यं प्रश्नं ब्रूयात् ॥ २० ॥

पुण्याहो देवनक्षत्रम् । प्रातर्मध्यंदिनादिषु प्रापयेदिद्धेऽग्नावग्निमिद्ध्वा तत्स- मीपेऽपामन्त उदकुम्भमपि विधाय तत्समीप ईक्ष्य वा जपति । राजाधिष्ठिते सदसि, उभयत उभयोरपि पक्षयोः सत्यवचनेन साक्षिणो यद्भावि फलं तत्सत्यं ब्रूयात् । अनृतं त्यक्त्वा स्वर्गमेष्यति । उक्त्वा ततो महाघोरं नरकं प्रतिपद्यते । इत्यादिना प्रकारेण समाख्या(न्) प्राड्विवाकादिति पृष्ट इति शेषः । अर्थिप्रत्यर्थिनोः सभ्यान चानुमतौ सत्यां साक्षिणि उ(गुणैरु)पेतो दोषैश्च वर्जितः साक्षी प्रशस्तं स्पष्टमर्थसत्यं यथाऽऽत्मना ज्ञातं तथा ब्रूयात् ॥ २० ॥

अनृते राजा दण्डं प्रणयेत् ॥ २१ ॥

साक्षिणाऽनृतमुक्तमिति प्रतिपन्ने राजा दण्डं प्रणयेत् । अत्र मनुः—

---

[1] क. पुस्तके ' संदेहे ' इति नास्ति ।

यस्य दृश्येत सप्ताहात्कूटवाक्यस्य साक्षिणः ।
रोगोऽग्निर्ज्ञातिमरणमृणं दाप्याव(प्यो दमश्च) सः ॥ इति ॥२१॥

न केवलमसत्यवचने राज्ञा दण्ड्यः किं तर्हि—

नरकश्चात्राधिकः सांपराये ॥ २२ ॥

सांपरायः परलोकः । तत्र नरको भवति । तेन—

राज्ञा निधृतदण्डास्तु कृत्वा पापानि मानवाः ।
निर्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा ॥ इति ।

अस्याऽऽपद्विषयकत्वम् ॥ २२ ॥

सत्ये स्वर्गः सर्वभूतप्रशंसा च ॥ २३ ॥

सत्य उक्ते स्वर्गो भवति । सर्वाणि च भूतान्येनं प्रशंसन्ति । अपि देवाः ॥२३॥

सा निष्ठा या विद्या स्त्रीषु शूद्रेषु च ॥ २४ ॥

स्त्रीषु शूद्रेषु च या विद्या सा निष्ठा समाप्तिः । न तस्यामप्यधिगतायां कर्म परितिष्ठित इति ॥ २४ ॥

आथर्वणस्य वेदस्य शेष इत्युपदिशन्ति ॥ २५ ॥ (ख० २०) ॥

इति सत्याषाढहिरण्यकेशिश्रौतसूत्रे(धर्मसूत्रापरपर्याये)
सप्तविंशप्रश्ने षष्ठः पटलः ॥ ६ ॥

अथर्वणा प्रोक्त आथर्वणस्तस्य वेदस्य शेष इत्युपदिशन्ति । अथर्वणा प्रोक्त आथर्वणस्तस्य वेदस्य शेषोऽयं या विद्या स्त्रीषु शूद्रेषु चोपदिशन्ति धर्मज्ञाः ॥ २९ ॥ (ख० २०) ॥

इति सत्याषाढहिरण्यकेशिधर्मसूत्रव्याख्यायां महादेवदीक्षितविरचितायामुज्ज्वलायां वृत्तौ सप्तविंशप्रश्ने षष्ठः पटलः ॥ ६ ॥

सप्तविंशः प्रश्नः समाप्तः ।

इति कृच्छ्रा धर्मसमाप्तिः । श्रीकृष्णार्पणमस्तु ।